भाषितव्या हिता भाषा, स्वपक्षगुणकारिणी ॥२२॥

एवं विचिन्त्य स पुण्यात्मा विशेषतो धर्मकर्म करोति ।

**[पितृसङ्केतितद्यूतकारैः सह द्यूतरमणे जिनदत्तस्यैकादशकोटिद्रव्यहानिः]**

अन्यदा अनुत्पन्नापरोपायेन पित्रा द्यूतकारवर्गः सङ्केतितः यथा — अयं मत्पुत्रो निज-समुदायान्तर्गृह्यताम् । तैर्हृष्टैः 'भवत्वेवम्' इति श्रेष्ठिवचोऽङ्गीकृतम् । एकस्मिन् दिने स जिनदत्तः सौवर्णसुखासनारूढो जिनालयं गच्छंश्चतुष्पथमध्ये द्यूतकारैर्विलग्योच्चारितो भाषितश्च— त्वमद्य द्यूते रमस्व । इति श्रुत्वा द्रव्येण होडवाह्यद्यूतनियमं परिग्रहप्रमाणमध्ये स्मृत्वा च तद्वचः कर्णे चित्तेऽपि न धत्ते स्म कुमारः । तथापि प्रसह्य मनसा विनापि तैर्द्यूतकारैस्तत्प्रवृत्तिं कारितः । ततो धूर्तैस्तैः पूर्वं कत्यपि लक्षाः स जापितः[2], पश्चादेकादश द्रव्यकोटीर्हारितः । एवं स रम-माणोऽपराह्ने सुकुमारतया क्लान्त उत्तिष्ठन् हारितद्रव्यं तैर्याचितः । ततस्तेन द्रव्यार्पणार्थं

1. उपदेशमन्तरेणापि कामार्थयोः कुशलः स्वयं लोकः । धर्मोपग्रहणं शिक्षां विना न, तस्मात् तस्यां= शिक्षायां यतितव्यम् ॥ 2. जापितः = जयं प्रापित. ॥

धूर्तकरेण पत्र्यां प्रेषितायां भाण्डागारिको ज्ञातवृत्तान्तोऽसद्व्ययत्वात् तन्नायच्छत्, परं ते धूर्ता निर्धाटिताः ।

ततः केनापि विमलमत्यै तद्व्यतिकरे प्रोक्ते सा लज्जमाना श्वश्रू-श्वशुरयोरकथयन्ती भर्तुर्भक्त्या स्वगवालयात्[1] कृष्ट्वा पञ्चदशकोटीप्रमाणं कञ्चुकं धूर्तानां कृते प्रैषीत् । तैस्त-मड्डाणकं[2] क्वापि हट्टे मुक्त्वा लभ्यद्रव्यं गृहीत्वा स मुक्तः ।

ततः कुमारः स्वगृहं गतो लज्जमानो दध्यौ—"हा ! मया किं कृतम् ? यतः—

मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ।
न कल्पमपि कृष्णेन लोकद्वयविरोधिना ॥२३॥

तथा—

रूव पतिट्ठा माणो[3] लज्जा धम्मो कुलक्कमो महिमा ।
अत्थो माया महिला, हारिज्जइ जूयरमणेण ॥२४॥

अथ सङ्घलोकस्य कथं स्वमुखं दर्शयिष्यामि ? " इति । अभुञ्जानो जनकेनाश्वासितः—वत्स ! का लक्ष्मीः ? यदि हारिता तदा हारिताऽभूत्, आत्मीये गृहे पुराऽपि द्रव्यस्येयत्ता, पुनर्बह्वी भविष्यति, ततो मा खेदं कुरु, शीघ्रमुत्तिष्ठ, भुङ्क्ष्व । इत्युक्त्वा भोजयित्वा जनको गतः

**[हारितद्रव्यलज्जया छलेन विमलमतिं पितृगृहे मुक्त्वा जिनदत्तस्य प्रच्छन्नं विदेशगमनम्]**

अथ **जिनदत्तेन** चिन्तितम्—'अस्य नगरस्य मध्ये मया न स्थेयम्, कमप्युपायं कृत्वा विदेशं यामि, ममेह माने गते स्थितिरनुचिता, यतः—

माणु[4] पइट्ठइ जइ न तणु, तो देसडा चइज्ज ।
मा दुज्जणकरपल्लविहिं दंसिज्जंतु भमिज्ज ॥२५॥
वसेन्मानाधिकं स्थानं, मानहीनं विवर्जयेत् ।
भग्नमानं सुरैः सार्धं विमानमपि सन्त्यजेत् ॥२६॥

तथा—

वरं प्राणपरित्यागो, मा मानपरिखण्डना ।
मृत्युश्च क्षणिकं दुःखं मानभङ्गो दिने दिने ॥२७॥

---

1. स्वसङ्ग्रहात् । गवालय='गवाळो' इति भाषायाम् ॥ 2. 'अडाणुं=गिरो' इति भाषायाम् ॥ 3. रूपं प्रतिष्ठा मानः लज्जा धर्मः कुलक्रमः महिमा अर्थो माया महिला हार्यते द्यूतरमणेन ॥ 4. मानः प्रतिष्ठति यदि न तनुः = अल्पः, ततो देशं त्यजेत्; मा दुर्जनकरपल्लवैः दर्शयन् भ्रमेव ॥

तथा—

जन्ममालिन्य-दारिद्र्याऽपमान-व्यसनागमे ।
परदेशं विना नान्यदिह श्रेयो मनस्विनः ॥ २८ ॥

परं स्नेहलां सुकुमालां बालां मद्वियोगे सम्भाव्यमानदुःखमालां पितृगृहे मुञ्चामि, यथा तत्र सुखेन तिष्ठति" ।

अन्यदा श्वशुरालापेन कूटलेखमानीय जनपार्श्वात् पितुः करेऽर्पयामास । तं वाचयित्वा कमपि महमुद्दिश्य जामातृ-पुत्र्योराकारणं ज्ञात्वा पिता तत्प्रेषणमकरोत् । ततः स **जिनदत्तोऽ**-खण्डप्रयाणैः श्वसुरालये गतः । श्वसुरादिस्वजनानां मिलितः । परस्परं हर्षोत्कर्षेण केनाप्यागमन-कारणं न पृष्टम् । ततस्तत्र कुमारो महासुखेन दिनानि कत्यपि स्थितः, श्वश्रूगौरवितश्च, यतः —

[1]थीयहं तिन्नि पियारडां, कलि कज्जल सिंदूर ।
अन्न वि तिन्नि पियारडां, दुद्ध जमाई तूर ॥२९॥

तथा च—

[2]सासू दिइ जमाइइं पुत्तह खंचइ हत्थ ।
एक्कह छोरिकारणिहिं, वंचइ सघलउ सत्थ ॥३०॥

अन्यदा तेनाचिन्ति यथा — "इह मम स्थातुमयुक्तम् यतः—

[3]थी पीहर( रि ) नरु सासरउ( इ ), संजमियां सहवास ।
ए त्रिण्णि इ अलखामणां, जउ जोईइ तपास ॥३१॥

अन्यदा स चैकाकी देशान्तरं प्रति चलितः यतः —

दीसइ[4] विविहऽच्छरियं, जाणिज्जइ सुयण-दुज्जणविसेसो ।
अप्पाणं च कलिज्जइ, हिंडिज्जइ तेण पुढवीए ॥३२॥

तथा—

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
स्थानभ्रष्टा सुशोभन्ते सिंहाः सत्पुरुषा गजाः ॥३३॥

---

1. स्त्रीणां त्रीणि प्रियाणि—कलिः १ कज्जलं २ सिन्दूरम् ३ अन्यान्यपि त्रीणि प्रियाणि— दुग्धं १ जामाता २ तूरम् ३ ॥ 2. श्वश्रूः ददाति जामात्रे पुत्रात् खचयति=संकोचयति हस्तम्, एकस्मात्, पुत्रीकारणाद् वञ्चयति सर्वं सार्थम् ॥ 3. स्त्री पितृगृहे, नरः श्वसुरगृहे, संयमिनः सहवासे, एतानि त्रीण्यपि अप्रियाणि; यदि दर्श्यते तत्पार्श्वम् ॥ 4. दृश्यते विविधाश्चर्यम्, ज्ञायते सुजन-दुर्जनविशेषः, आत्मा च कल्यते; हिण्ड्यते तेन=तस्मात् पृथिव्याम् ॥

**[दशपुरवास्तव्यऔदत्तश्रेष्ठिगृहे जिनदत्तस्य प्रतिपन्नपुत्रत्वेनावस्थानम]**

ततो **जिनदत्तो** विदेशं गच्छन् कियद्भिर्दिवसैः दशपुरनगरपरिसरे गतः । तत्र **दशपुर**नगरोद्यानवाटिकामध्येऽशोकतरुतले निषण्णः, खेदान्निद्रायितश्च । तद्भाग्येन शुष्काऽपि वाटिका पुनर्नवा जाता । तथा दृष्ट्वा कश्चिन्मालिकोऽशीतिकोटयधिपस्याप्यपुत्रस्य [1]वाटिकाधनिकस्य **औदत्त**व्यवहारिणोऽग्रेऽवोचत् । श्रेष्ठी पुष्पितां वाटिकां श्रुत्वा तत्र गत्वा भ्रमन् वृक्षतले जिनदत्तं वीक्ष्य हृष्टो बभाषे—कीदृशस्त्वम्? तेनोक्तम — वैदेशिकोऽहम् । श्रेष्ठिना सभाग्यं तं विज्ञाय गृहमानीय बाढं गौरयित्वा भाषितः—वत्स! त्वं विदेशं मा यासीः, त्वं मम धर्मपुत्रः सवश्वरश्च । ततस्तत्र महाऽऽग्रहेण स्थितस्य तस्य सुखेन कालो याति धर्मेण किं किं न वाञ्छितं स्यात् यतः —

आरोग्यं सौभाग्यं धनाढ्यता नायकत्वमानन्दः ।
कृतपुण्यस्य स्यादिह सदा जयो वाञ्छितावाप्तिः ॥३४॥

तथा—

यद्यपि कृतसुकृतभरः प्रयाति गिरिकन्दरान्तरेषु नरः ।
करकलितदीपकलिका तथापि लक्ष्मीस्तमनुसरति ॥३५॥

तथा—

[2]पुण्यहीण बण दीण, पामइ परिभव हासा ।
पुण्यइं सुख अनंत, पुन्नि पूरी दस दिसा ॥३६॥

तस्य[3] सर्वदा पृथक् पृथग् [4]मन्दिरेषु चतुरशीतिप्रवहणानि वहन्ति, चतुरशीतिवणिक्पुत्राश्च तन्नियुक्ताः सन्तिः ।

**[औदत्तश्रेष्ठिसहगतस्य जिनदत्तस्य सिंहलद्वीपराजपुत्र्या श्रीमत्या सह पाणिग्रहणम्]**

एकदा सर्वयानपात्राण्येकत्र मन्दिरे[5] यान्ति सन्ति । तदा पुत्राग्रे **औदत्तेन** प्रोक्तम्—वत्स! यदि कथयसि तदाऽहमेषां सार्थे चलामि, यथा द्रव्यनाशो न स्यात्, त्वं गृहे तिष्ठ । तेनोक्तम्—अहमपि समेष्यामि, त्वत्प्रसादाद् ममापि विदेशदर्शनेच्छा पूर्यताम् ।

1. वाटिकास्वामिनः । धनिक='धणी' इति भाषायाम् ॥ 2. पुण्यहीना बहवो दीनाः प्राप्नुवन्ति परिभवं हास्यम् । पुण्येन सुखं अनन्तम्, पुण्येन पूरिता दश दिशाः ॥ 3. तस्य=औदत्तव्यवहारिणः ॥ 4. अत्र 'मन्दिर' शब्दप्रयोगो वेलाकूलार्थे ज्ञेयः । मन्दिर='बंदर बंदिर' इति भाषायाम् ॥ 5. अत्रापि 'मन्दिर' शब्दो वेलाकूलार्थे ज्ञेयः ॥

ततः सुमुहूर्ते द्वावपि पितापुत्रौ यानपात्रमारुह्य चलितौ [1]बहुमन्दिराण्युल्लङ्घ्य **सिंहलद्वीपं** प्राप्तौ। तत्र राजा **घनवाहनः**। तस्य रूपेण लक्ष्मीरिव, विद्यया भारतीव, शीलेन सीतेव नवयौवना पुत्री **श्रीमती** नामास्ति। सा कर्मदोषेण सव्याधिर्जाता। तस्याः प्राहरिको यः कोऽपि रात्रौ तिष्ठति स म्रियते, तदभावे **श्रीमती**पुत्री-पुरलोक-राज्य-देशविप्लवो जायते। ततो राजादेशात् कृतायाः पत्रिकायाः क्रमेण सर्वलोको दिनं प्रति एकैको वारके तद्यामिको भवति। एवं कालो गच्छति।

तदा **जिनदत्तो** वाहनादुत्तीर्य परकार्याणि मुक्त्वा जिनभवनं दृष्ट्वा पुष्पानयनाय मालिक-गृहं गतः। तत्रैका वृद्धा मुक्तकण्ठं रोदिति। तेनोक्तम् — मातः! कथं रोदिषि? निजं दुःखं वद। तयोक्तम् —

जो[2] न हु दुक्खं पत्तो, जो न हु दुक्खस्स निग्गहसमत्थो।
जो न हु दुहिए दुहिओ, कह तस्स कहिज्जए दुक्खं? ॥३७॥

स ऊचे —

अहयं[3] दुक्खं पत्तो, अहयं दुक्खस्स निग्गहसमत्थो।
अहयं दुहिए दुहिओ, मह तेण कहिज्जए दुक्खं ॥३८॥

ततस्तया सखेदं स्वदुःखकारणमूचे — हे वत्स! श्रुणु, ममैक एव पुत्रो राजपुत्री-**श्रीमती**यामिकत्वे स्थितोऽद्य मरिष्यति तेन रोदिमि, अद्य ममाभाग्याद् मम पुत्रवारको जातः, अन्धयष्टिन्यायेन स ममाधाररूपोऽभूत्, हतदैवेन सोऽपि न संसोढः, यदुक्तम् —

व्याघ्रो नैव, गजो नैव, सिंहो नैव च नैव च।
अजापुत्रं बलिं दद्याद्, दैवो दुर्बलघातकः ॥३९॥

तथा —

दुपयं[4] चउप्पयं बहुपयं व अपयं समिद्धमहणं वा।
अणुवकए व कयंतो हरइ हयासो अपरितंतो ॥४०॥ ”

---

1. अत्रापि ‘मन्दिर’ शब्दो वेलाकूलार्थे ज्ञेयः ॥ 2. यो न खलु दुःखं प्राप्तः, यो न खलु दुःखस्य निग्रहसमर्थः, यो न खलु दुःखिते दुःखितः, कथं तस्य कथ्यते दुःखम् ॥ 3. अहं दुःखं प्राप्तः, अहं दुःखस्य निग्रहसमर्थः, अहं दुःखिते दुःखितः, मम तेन कथ्यते दुःखम् ॥ 4. द्विपदं चतुष्पदं बहुपदं वा अपदं समृद्धमधनं वा अनुपकृत इव कृतान्तो हरति हताशः अपरितान्तः = अखिन्नः ॥

इत्यादि दीनवाक्यानि श्रुत्वा तस्य करुणापरिणामेन तद्दुःखं प्रतिबिम्बितम्, यतः—

विरला[1] जाणंति गुणे, विरला पालंति निद्धणे नेहं ।
विरला परकज्जकरा, परदुक्खे दुक्खिया विरला ॥४१॥

तथा च —

' सज्जनस्य हृदयं नवनीतं ' गीतमत्र कविभिर्न तथा तत् ।
अन्यदेहविलसत्परितापात् सज्जनो द्रवति, नो नवनीतम् ॥४२॥

ततस्तेन चिन्तितम् —

' अस्थिरेण शरीरेण स्थिरं धर्मं समाचरेत् ।
अवश्यमेव यास्यन्ति प्राणा प्राघूर्णका इव ॥४३॥ '

परोपकृतिनिरतेन तेन प्रोक्तम् — त्वं स्वस्था भव, तव पुत्रस्य स्थानेऽहं यास्यामि । तयोक्तम् — वत्स ! नैवं स्यात्, त्वमपि कस्या अपि मातुः पुत्रः, तस्या अपि दुःखं मम तुल्यम्, आत्मनिष्ठया परनिष्ठा ज्ञायते, यतः —

सुखी न जानाति परस्य दुःखं, न यौवनस्था गणयन्ति धर्मम् ।
आपद्गता निष्करुणा भवन्ति, आर्ता नरा धर्मपरा भवन्ति ॥४४॥

एवं श्रुत्वाऽपि स्वप्रतिपन्नवचनभङ्गभयात् साहसात् परोपकारकरणात् स्वकायनिरपेक्षत्वाच्च **जिनदत्तो** महाऽऽग्रहेण तां मालिकस्त्रियं मानयित्वा पुष्पाण्यादाय जिनमर्चयित्वा सज्जो भूत्वा स्थितः ।

तावदारक्षका ' रे गृहान्निस्सर निस्सर ' इति हक्कयन्तः समेताः । तदा स सलीलमुत्थाय खड्गं गृहीत्वाऽग्रेऽभूत् । एवं धीराणामुचितम्, यतः —

[2]जीयं कस्स न इट्ठं ?, कस्स न लच्छी य वल्लहा होइ ? ।
अवसरवडियाण पुणो दुन्नि वि धीराण न हु किंचि ॥४५॥

तृणं ब्रह्मविदः स्वर्गस्तृणं शूरस्य जीवितम् ।
विरक्तस्य तृणं नारी, निरीहस्य तृणं नृपः ॥४६॥

---

1. विरला जानन्ते गुणान्, विरलाः पालयन्ति निर्धने स्नेहम्, विरलाः परकार्यकराः, परदुःखे दुःखिता विरलाः ॥ 2. जीवितव्यं कस्य न इष्टम् ?, कस्य न लक्ष्मीश्च वल्लभा भवति ?; अवसरपतितानां पुनः द्वे अपि धीराणां न खलु किञ्चित् ॥

ततोऽसौ राजद्वारे प्रविशन् गवाक्षस्थेन राज्ञा दृष्टः । ततः 'कोऽसौ ? क्व याति ?' इति राज्ञा पृष्टे केनापि प्रोक्तम् — पुत्रीयामिकोऽद्यैष भावी । राज्ञोक्तम् — धिग् धिग् मम नगरक्षयकारिणीयं पुत्री यदर्थे प्रत्यहमीदृशानि नररत्नानि क्षयं यान्ति, परं पुत्रीमोहात् तदपि संसोढम्, यतः —

[1]अक्खाणऽसणी, कम्माण मोहणी, तह वयाण बंभवयं ।
गुत्तीण य मणगुत्ती, चउरो दुक्खेण जिप्पंति ॥४७॥

तथा —

अहो मोहपिशाचोऽयं, कथं भवचतुष्पथे ।
मनागपि छलं प्राप्य, भविनश्छलयत्यलम् ॥४८॥

अथ कुमारीगृहमध्येऽयं गतः । ततो दोलाखट्वारूढया **श्रीमत्या जिनदत्तं** दृष्ट्वोत्थाय प्रतिपत्तिः कृता, चिन्तितं च — अहो अस्य कीदृशं रूपलावण्यसौभाग्यम्, अहो ! सत्त्वप्रकृतिः, अहो! सुन्दराकारः, अहो ! गुणनिधित्वम् । पुनस्तया चिन्तितम् —

अतिसिंहमहो ! धैर्यमतिसूर्यमहो ! महः ।
अतिस्मरमहो ! रूपं, नृरत्नस्यास्य दृश्यते ॥४९॥

नररत्नमिदं धन्यमधन्यायाः कृते मम ।
क्षयमेष्यति कल्पद्रुः, कपिकच्छूकृते यथा ॥५०॥

अहमेकैव तातस्य, कुलकल्पद्रुकानने ।
विश्वोद्वेगकरी जज्ञे, विषवल्लीव जङ्गमा ॥५१॥

ततः पृष्टम् — कस्त्वम् ? कुतः समायातः ? तेनोक्तम् — वाणिज्यार्थं विदेशादायातोऽहम्, अद्य तव समीपे रक्षार्थं स्थास्यामि । **श्रीमत्योक्तम्** — अत्र मम पार्श्वे न स्थेयं त्वया, यतो रात्रौ विरूपं भावि; अद्य मम यत् किञ्चिद् भवति तद् भवतु, परं त्वया न स्थेयम् । इत्थं मिथःसंलापैर्यामिन्याः प्रथमप्रहरे गते दोलाखट्वारूढायाः **श्रीमत्या** ईषन्निद्रा समेता ।

अथ जिनदत्तेनोपायो विचिन्त्य रचितः, यत् — पाश्चात्यदिनोज्झितमेकं मृतकं गवाक्षमार्गेणानीय स्वशय्यायां तदाऽऽच्छाद्य मुक्तवान्, स्वयं च खड्गमादाय दीपोपच्छायामाश्रयद् जाग्रदस्थाच्च, यतः —

1. अस्यां गाथायां सर्वत्र सप्तम्यर्थे षष्ठी ज्ञेया । अक्षेषु= इन्द्रियेषु अशनी=रसना, कर्मसु मोहनीयम्, तथा व्रतेषु ब्रह्मव्रतम्, गुप्तिषु च मनोगुप्तिः; [एतानि] चत्वारि दुःखेन जीयन्ते ॥

उद्यमे नास्ति दारिद्र्यं, जपतो नास्ति पातकम् ।
मौनेन कलहो नास्ति, नास्ति जागरतो भयम् ॥५२॥

लोकेऽप्येवमस्ति — 'यः सुप्तः स मृत इव, यो जागर्ति स मार्गयति'। 'अत्र किं किं भविष्यति?' इति चिन्तयता तेन दृष्टम् — पूर्वं कुमारीमुखाद् धूम्रकलिका, पश्चात् कालदारुणो महाकायो रक्ताक्ष उत्फणः फणी निर्गतः। ततः फूत्कारान् मुञ्चन् शय्योपरि गत्वा रोषेण मृतकं दष्ट्वा यावत् पश्चादागत्य नागः कन्यामुखं प्रविशति तावद् **जिनदत्तेन** हक्कितः — रे दुष्ट! चौर्यवृत्त्या मनुष्यं दष्ट्वा क्व यास्यसि? ततः सर्पः सदर्पस्तं प्रति धावितः। **जिनदत्तेन** तु पुच्छे धृत्वोर्ध्वीकृत्य पुनः पुनरन्दोलितः। ततः सर्पोऽधोमुखत्वेन गलगतान्त्रत्वादबलोऽभवत्। अहो! साहसवतां को न हि वश्यः स्यात्, यदुक्तम् —

उद्यमः साहसं धैर्यं, बलं बुद्धिः पराक्रमः ।
षडेते यस्य विद्यन्ते, तस्य देवोऽपि शङ्कते ॥५३॥

साहण[1] सउण न चंदबल न वि जोयइ धण ऋद्धि ।
इक्कलउं लक्खहं भिडइ, जिहां साहस तिहां सिद्धि ॥५४॥

ततो **जिनदत्तेन** सदयहृदयेन चिन्तितम् — "हहा! कथमेनं जीवं कदर्थयामि? यद्यस्य पादौ स्यातां तदाऽयं पलायते, अथास्य वाचा स्यात् तदा 'मां मुञ्च' इत्येवं वक्तुं शक्नोति, अथ हस्तौ स्यातां तदा तौ स्वस्यान्तरे ध्रियेते।" इति विचिन्त्य स सर्पः केहलीमध्ये[2] क्षिप्तः। कुमारेण द्वयं कृतम् — सुस्थममारिश्च। तथा लोकस्याभाणको[3] सत्यापितो यथा — 'न सर्पो म्रियते, न यष्टिर्भज्यते' इति। अहो! सज्जनानामीदृशमेव लक्षणं स्यात्, यतः —

येषां मनांसि करुणारसरञ्जितानि, येषां वचांसि परदोषविवर्जितानि ।
येषां धनानि सकलार्थिजनाश्रितानि, तेषां कृते वहति कूर्मपतिर्धरित्रीम् ॥५५॥

अथ स कुमारः सुस्थो जातश्चौरनिग्रहात्। ततः कुमारी प्रबुद्धा कुमारं प्रति वक्ति — हे सुभग! महच्चित्रकरमिदं द्वयम् — ममोदरे महती निर्वृतिर्गतशल्यसूचिनी, तव जीवितं मदीयभाग्यसूचकं चेति, त्वं किमपि कारणं वेत्सि। ततः सोऽपि सर्वं रात्रिवृत्तान्तमूचे। हृष्टा राजपुत्री दध्यौ — जयन्ति मम पुण्यानि येनेदं नररत्नं न विनष्टम्। ततः प्रतिज्ञातं

1. साधनानि शकुनानि न चन्द्रबलम्, नापि पश्यति धनं ऋद्धिम्, एको लक्षैः [सह] युध्यते, यत्र साहसं तत्र सिद्धिः ॥ 2. केहली= (?) लघुकूप, 'कियाळी' इति भाषायाम् ॥ 3. आभाणक=किंवदन्ती ॥

तया — मम भवेऽस्मिन्नयमेव वरः। ततः राजपुत्र्योक्तम् — मां वृणु। तेनोक्तम् — त्वत्पितुरादेशं विना नैव घटते। सा चाह — नीतिशास्त्रन्यायादेवं घटते, यतः —

स्वयं वरयते कन्या, माता वित्तं, पिता कुलम्।
बान्धवा धनमिच्छन्ति, मिष्टान्नमपरे जनाः ॥५६॥

सोऽप्याह — सत्यमिदम्, परमनूढालक्षणं चेदम्, अलङ्कारशास्त्रे स्वकीयनायिकालक्षणं चेत्थं दृश्यते, यथा —

देवता-गुरुसाक्ष्येण, स्वीकृता स्वीयनायिका।
क्षमावत्यतिगम्भीरप्रकृतिः सच्चरित्रभृत् ॥५७॥

तयोरित्थं मिथः संलापे जायमाने मातङ्गः शवग्रहणाय प्रातरायातः। तौ शारिपाशैं रममाणौ च दृष्ट्वा तेन राज्ञे कथितम् — देव! वर्ध्यसे, यदद्य सयामिका पुत्री विजयते। इत्याकर्ण्य नृपतिरुद्धुषिताध्युष्टिकोटिरोमो तस्य पारितोषिके सुवर्णस्य जिह्वां ददौ।

ततः सपत्नीकः सपरिच्छदः पार्थिवः कुमारीगृहे गतः। तस्य यथोचितं प्रतिपत्तिश्च जाता। ततः सिंहासनमासीनो नृपः कुमारीमुत्सङ्गे कृत्वा गाढमालिङ्गय कुमारान्निशावृत्तान्तं श्रुत्वा, सर्पं पूर्वभवद्वेषेण वैरायमाणं कमपि व्यन्तरं निश्चित्य प्रधानान् प्रोचे — अस्य महोपकारिणः कुमारस्य किमुचितं क्रियते? तैर्गदितम् — अस्य यत् क्रियते तत् स्तोकम्, परं पुत्री दियताम्। ततो राज्ञा सुलग्ने महामहेन स श्रीमत्या सह परिणायितः। ततो हस्तमोक्षणावसरे गजाश्व-दुकूलादि भूरि दानं दत्तम्। पुंसां सर्वत्र पुण्यान्यचिन्त्यसुखकारीणि स्युः, यदुक्तम् —

यदाशाया न विषयं, दुर्घटं च जनेऽपि यत्।
तदप्यारोपयत्याशु, प्राक्पुण्यं प्राणिनां करे ॥५८॥

ततः **श्रीमत्या** राज्ञा च सह **जिनदत्तो** विद्वद्गोष्ठ्या सस्नेहं सुखेन कियन्तं कालं गमयति।

**[श्रीमतीसहितस्य जिनदत्तस्य औदत्तश्रेष्ठिना सह स्वदेशागमनप्रस्थानम्]**

अत्रान्तरे **औदत्त**श्रेष्ठी सर्वं क्रय-विक्रयादि कृत्वा कुमारान्तिकमायातः — वत्स! त्वं किं कर्ताऽसि? अहं स्वपुरं प्रति यामि। स प्राह — आम तात! अहमप्यायास्यामि, क्षणं प्रतीक्षस्व यथा राजानं मुत्कलयामि। ततस्तदादेशाद् नृपान्तिकं गत्वोचे — राजन्! अहं स्वदेशे यामि, मामनुमन्यस्व। राजा ब्रूते — वत्स! त्वादृशां को विदेशः?, यतः —

को विदेशः सविद्यानां?, कः परः प्रियवादिनाम्? ।
कोऽतिभारः समर्थानां?, किं दूरं व्यवसायिनाम्? ॥५९॥

तथा युष्मादृशां धीमतां भाग्यवतां विदेशोऽपि स्वेदशाधिकः, यतः —

मानमुल्लसति यत् पदे पदे, सम्पदे भवति वाक्यडम्बरः ।
धीमतामभिमतार्थसिद्धये यद् विदेशगमनं स उत्सवः ॥६०॥

परः प्राह — देव! यद्येवं तथापि जन्मभूमिर्दुस्त्याज्या, यतः —

[1]अच्छंतु निरंतरगुरुसिणेहसब्भावनिब्भरा मणुया ।
सहवासवड्ढिया तरुवरा वि दुक्खेहिं मुच्चंति ॥६१॥

इत्याद्युक्त्वा कुमारः पुनरूचे — देव! त्वया दूरत्वान्नाहं विस्मार्यः; यतः —

[2]सुयणा न दिंति हिययं, दिन्नं न हरंति जीवियं जाव ।
इयरजणाण य नेहो, इयरह सो, दुन्नि हिययाइं ॥६२॥

ततो राजा जगाद — "वत्स! इयच्चिरं त्वया सार्धं लीलागोष्ठ्या कालो गच्छन्नपि मया न ज्ञातः, सम्प्रति —

यियासिसि निजं स्थानं, यदि त्वं तर्हि किं ब्रुवे? ।
यियासुश्च मुमुर्षुश्च, वारितौ न हि तिष्ठतः ॥६३॥

परं मम मनो भवता सार्धं समेष्यति। यत्र पुरेऽवस्थाता, ततोऽभीष्टसङ्गतिं यः करोति स मूढ एव, यदुक्तम् —

योगे सति सुखं स्वल्पं, वियोगे दुःखमुल्बणम् ।
विदन्नपीति हा मूढो, जनः संसजति प्रिये ॥६४॥

हे कुमार! त्वादृशाः सत्पुरुषाः संसारे विरला एव, यतः —

[3]नयणेहिं को न दीसइ?, केण समाणं न हुंति उल्लावा? ।
हिययाणंदं पुण जं जणेइ तं माणुसं विरलं ॥६५॥"

---

1. तिष्ठन्तु निरन्तरगुरुस्नेहसद्भावनिर्भरा मनुजाः, सहवासवर्धिता तरुवरा अपि दुःखैः मुच्यन्ते ॥ 2. सुजना न ददति हृदयम्, दत्तं न हरन्ति जीवितं यावत्। इतरजनानां च स्नेहः, इतरथा सः, द्वे हृदये ॥ 3. नयनाभ्यां को न दृश्यते?, केन समं=सह न भवन्ति उल्लापाः? हृदयानन्दं पुनर्यो जनयति स मनुष्यो विरलः ॥

इति सदुःखं चलनमनुमत्य सुवर्ण-रत्नादिसारबहुवस्तुभिर्भृतं प्रवहणं दत्त्वा **श्रीमत्या** सह राज्ञा **जिनदत्तः** प्रस्थापितः ।

**[श्रीमतीरूपमुग्धौदत्तश्रेष्ठिकृतः समुद्रे जिनदत्तप्रक्षेपः, श्रीमतीविलापश्च]**

यावता प्रवहणान्यर्धमार्गे गतानि तावता **श्रीमती**रूपं बहुद्रव्यं च दृष्ट्वा रागान्धस्य लोभान्धस्य च श्रेष्ठिनो दृष्टिश्चलिता, यतः —

रागंधो[1] मोहंधो कज्जाकज्जं न जाणई जीवो ।
धत्तूरभामिओ इव सव्वं पिच्छइ सुवन्नमहो ! ॥६६॥

ततः क्रूरकर्मणा पापिना श्रेष्ठिना केनापि च्छलेन विश्वास्य मध्यरात्रौ समुद्रमध्ये कुमारः क्षिप्तः । ततो निर्घातं श्रुत्वा 'किमपि पतितं पतितम्' इति जनकलकलो जातः ।

तस्मिन्नवसरे **श्रीमती** पृच्छन्ती स्वपतिं समुद्रमध्ये पतितं जनमुखात् श्रुत्वा 'हा नाथ ! हा नाथ !' इति तारं रुरोद । इत्थं बहु विलप्य 'हा श्वशुर ! हा तात ! पुत्रं समुद्रमध्ये मुक्त्वा क्व यासि ?' इति श्रेष्ठिनं सा बभाषे । ततः श्रेष्ठी जगौ — एवं मा ब्रूहि, मम दासोऽयम्, मया सह भोगान् भुङ्क्ष्व, त्वं मम गृहसर्वस्वस्वामिनी भवेति । ततः सा दध्यौ — "हहा ! अस्यैव दुष्टस्य चेष्टितमिदं सम्भाव्यते, किमन्यथाऽमुष्य मुखादीदृशी वाक्यपद्धतिर्निर्गच्छति ? तथा सत्यमिदं जातं यद् मनुष्यकूटस्य लकुटशुषिरत्वस्य च पारो नास्ति, अन्यच्चोक्तम् —

[2]मायावंतह माणुसह, किमइ पतीज ण जाइ ।
नीलकंठ महुरं लवइ, सविस भुयंगम खाइ ॥६७॥

तथाऽस्य परस्त्रीरतस्य श्रेष्ठिनो जीवितं धिगस्तु, यदुक्तम् —

वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि भग्नं चिरसञ्चितं व्रतम् ।
वरं हि मृत्युः सुविशुद्धकर्मणो, न चापि शीलस्खलितस्य जीवितम् ॥६८॥

तथा —

अप्पु[3] धूलिहिं मेलियं, सयणहं दीधी छार ।
पगि पगि माथाढांकणुं, जिणि जोई परनार ॥६९॥

1. रागान्धो मोहान्धः कार्याकार्यं न जानते जीवः, धत्तूरभ्रामित इव सर्वं पश्यति सुवर्णमहो ! ॥ 2. मायावतो मनुष्यस्य कथमपि विश्वासो न याति, नीलकण्ठो मधुरं लपति सविषं भुजङ्गमं खादति ॥ 3. आत्मा धूलौ मेलितः, स्वजनेषु = स्वजनोपरि दत्तं = क्षिप्तं भस्म, पदे पदे शिरःप्रच्छादनम्, येन दृष्टा परनारी ॥

विक्रमाक्रान्तविश्वोऽपि, परस्त्रीषु रिरंसया ।
कृत्वा कुलक्षयं प्राप नरकं दशकन्धरः ॥७०॥

[1]सीलब्भट्ठाणं पुण नामग्गहणं पि पावतरुबीअं ।
जा पुण तेसिं तु गई को जाणइ ? केवली भयवं ॥७१॥ ''

इत्यादि मनस्येव विचिन्त्य श्रीमती कर्णौ पिधाय प्रोचे — "हा पाप! वचनमिदमश्रोतव्यम्, पुनरीदृशं वचो मा वादीः, न जाने क्व नरके त्वं यास्यसि ? यतः —

[2]भक्खणे देवदव्वस्स, परत्थीण य संगमे ।
सत्तमं नरगं जंति, सत्तवारा य गोयमा ! ॥७२॥

तथा 'मम शीलधर्मप्रभावो यदि स्यात् तदा प्रवहणं ब्रुडतु' इति तस्याः सत्याः शापेन यानपात्रं दोलायमानं दृष्ट्वा जनो जगौ — रे दुरात्मन्! त्वं सर्वमपि समुद्रे मज्जयिष्यसि । सर्वजनाक्रोशं निशम्य भीतः श्रेष्ठी श्रीमतीपादयोः पतित्वा 'मम दुष्टस्य दुष्कृतं क्षमस्व' इति जगौ । 'हा पापिष्ठ हा अद्रष्टव्यमुख! मां मा स्पृश, दूरे भव' इति तया धिक्कृतः सः । ततो जनो बभाषे — मातः! अस्मान् निरपराधान् रक्ष रक्ष। इति श्रुत्वा सा तत्कृपया स्वकरस्पर्शेन प्रवहणं स्थिरीचकार । अहो! शीलप्रभावः । यतः —

हरति कुलकलङ्कं लुम्पते पापपङ्कं, सुकृतमुपचिनोति श्लाघ्यतामातनोति ।
नमयति सुरवर्गं हन्ति दुर्गोपसर्गं, रचयति शुचि शीलं स्वर्गमोक्षौ सलीलम् ॥७३॥

अथ सा मनस्येवं खिद्यते, यथा — "हा तात! दैवेन तत् किमपि मम पातितं यद् वक्तुमपि न शक्यते । यतः —

[3]विहिणो वसेण कज्जं जयम्मि तं किंपि दारुणं पडइ ।
जं न कहिउं, न सहिउं, न चेव पच्छाइउं तरइ ॥७४॥

तथा —

अन्न[4] चिंतवीइ अन्न हुइ, अन्न कीजइ अन्न थाइ ।
सूइ अन्न मनोरहे, अन्नेरडे विहाइ ॥७५॥

---

1. शीलभ्रष्टानां पुनर्नामग्रहणमपि पापतरुबीजम्, या पुनस्तेषां गतिः [तां] को जानाति ? केवली भगवान् ॥ 2. भक्षणे देवद्रव्यस्य, परस्त्रीणां च सङ्गमे सप्तमं नरकं यान्ति सप्तवारान् च गौतम! ॥ 3. विधेर्वशात् कार्यं जगति तत् किमपि दारुणं पतति यद् न कथयितुं न सोढुं न चैव प्रच्छादयितुं शक्यते ॥ 4. अन्यत् चिन्त्यते, अन्यद् भवति; अन्यत् क्रियते, अन्यद् भवति; सुप्ते अन्ये मनोरथाः, अन्यतराः प्रभाते ॥

हहा ! हत दैवेन ममाऽऽशातरून्मूलनं शीघ्रमेव कृतम् । यथा —

आसातरुयर[1] मउरिउ जाव फलेवा लग्ग ।
उन्मूलिउ विहिकुंजरिइं, हैअसंधिइं(?) भग्ग ॥७६॥

अतः कर्मविपाकान्न कोऽपि छटति, यतः —

देव[2] आगलि न राय न राणउ,
कर्म आगलि न को स-पराणउ ।
डुंबनउ जल वहिउं हरिचंदिइं,
भालडी मरण लाधु मुकुंदिइ ॥७७॥

[3]जं जेण कयं कम्मं अन्नभवे इहभवे वि सुहमसुहं ।
तं तेण पावियव्वं, निमित्तमित्तं परो होइ ॥७८॥

तावद् दैवेन महादुःखसागरेऽहं क्षिप्ता, सम्प्रति किं करोमि ? तातस्य गृहे व्रजामि ? अथाग्रभुवं यामि ? अथात्मानमपि समुद्रे क्षिपामि ? तावत् पितृगृहगमनमनुचितम्, यतः — पतिवर्जिता तत्र गता कथमहमभाग्या स्वकुटुम्बस्य मुखं दर्शयिष्यामि ? यतो यथा चन्द्रं विना शर्वरी, इन्द्रं विना स्वर्गभूमिः, सूर्यं विना द्यौः, मेघं विना विद्युद्, शाखां विना वृक्षम्, नाशां विना मुखं न शोभते, तथा पतिं विना स्त्रीति । अथाऽग्रतो गत्वा किं करोमि ? स्वजनाभीष्टाद्यभावात् । तथा समुद्रपात-शस्त्रघातादिना स्वात्महत्या जिनैर्निषिद्धा । यदुक्तम्—

[4]रज्जुग्गह-विसभक्खण-जलजलणपवेस-तिण्ह-छुहदुहओ ।
गिरिसिरपडणाओ मया, सुहभावा हुंति वंतरया ॥७९॥

मरणे प्रायः शुभध्यानं न स्यात्, ततो दुर्गतिहेतुत्वात् कुमरणमिदं न घटते । तथा चास्य पापिनः सार्थः सर्वथा मोक्तव्य एव" ।

---

1. आशातरुवरो मुकुरितो यावत् फलितुं लग्नः [तावद्] उन्मूलितो विधिकुञ्जरेण हृदयसन्धौ भग्नः ॥ 2. दैवाग्रे न राजा न राणकः, कर्माग्रे न कः [अपि] स्व-परकीयः, चाण्डालस्य जलं ऊढं हरिश्चन्द्रेण, भल्लया मरणं लब्धं मुकुन्देन ॥ 3. यद् येन कृतं कर्म अन्यभवे इहभवेऽपि शुभमशुभं तत् तेन प्राप्तव्यं= भोक्तव्यम्, निमित्त-मात्रं परो भवति ॥ 4. रज्जुग्रह-विषभक्षण-जलज्वलनप्रवेश-तृष्णा-क्षुधादुःखतो गिरिशिखरपतनाद् मृताः शुभभावाद् भवन्ति व्यन्तराः ॥

[ औदत्तश्रेष्ठिसार्थपृथग्भूतायाश्चम्पानगर्यागतायाः श्रीमत्या विमलमत्या सहावस्थानम् ]

इत्थं चिन्तयन्त्यां तस्यां प्रवहणं वायुवेगेन चलत् कस्मिन्नपि द्वीपे लग्नम् । तत्र पृथग् भूत्वा स्ववाहनान्विता **श्रीमती** स्थिता ।

ततः श्रेष्ठी स्वपुरं प्रति गच्छन्निति दध्यौ, यथा — " मम **श्रीमती** कान्ताऽपि न जाता, जिनदत्तः पुत्रोऽपि नाऽऽसीत्, ततो मम द्वयमपि गतम् । यदुक्तम् —

निदाघे दाघार्तस्तरलतरतृष्णातरलितः,
सरः पूर्णं दृष्ट्वा त्वरितमुपयातः करिवरः ।
तथा पङ्के मग्नस्तटनिकटवर्त्तिन्यपि यथा,
न नीरं नो तीरं द्वयमपि[1] गतं दैववशतः ॥८०॥

तथा 'हस्तो दग्धः, पृथुकोऽपि गतः' इति सत्यापितम्, तथा ममेहलोक-परलोकयोरपि द्वयं गतम् । यदुक्तम् —

जनापवादं कुलशीललाञ्छनं धनापहारं निजबन्धुनाशनम् ।
इहैव विन्दन्ति हतात्मपौरुषा नराः परस्त्रीनिरता निरन्तरम् " ॥८१॥

इत्यादि चिन्तयन् दशपुरं गतः श्रेष्ठी ।

[2]नपुंसकत्वं तिर्यक्त्वं दौर्भाग्यं च भवे भवे ।
भवेन्नराणां स्त्रीणां चान्यकान्तासक्तचेतसाम् ॥८२॥

ततः **श्रीमती** चिन्तयति — किमहं करोमि ? पत्यौ लोकान्तरिते जीवन्ती किमहं करिष्यामि ? तस्मादिहैवानशनं गृहीत्वा परलोकं साधयामि । एवमनल्पान् विकल्पान् कल्पयन्त्यास्तस्याः पूर्वं स्वपतिना वार्तान्तरप्रोक्तं **चम्पास्थस्वभगिनीस्वरूपं** स्मृतिमायातम् । ततः साऽचिन्तयत् — चम्पापुरीस्थिताया निजपतिभार्याया **विमलमत्याः** समीपे गच्छामि, कदाचिद् दैवयोगेन तत्रस्थाया मम पतियोगोऽपि भवति । अहो ! असम्भाव्येऽपि वस्तुनि मनः कल्पनां करोति । यदुक्तम् —

हीया[3] ! मनोरह मा करउ जं कज्जह असमत्थ ।
सग्गि जि तरुवर मउरिया, तिहां[4] कि वाही हत्थ ? ॥८३॥

1. °**मपि विनष्टं विधिवशात्** ॥८०॥ प्रत्यन्तरे ॥ 2. सुभाषितत्वेनात्र मूले स्वीकृतः केवलं पु०प्रतावुपलभ्यमानः श्लोकोऽयं प्रक्षिप्त आभाति ॥ 3. हृदय ! मनोरथं मा कुरु यः कार्यस्य असमर्थः । स्वर्गे ये तरुवरा मुकुरिताः तत्र किं वाह्यते हस्तः ? ॥ 4. **तिहां पसारइ हत्थ** ॥८३॥ प्रत्यन्तरे ॥

न चेत् तत्र पतिसङ्गमस्तदा सर्वधनमिदं धर्मे व्ययित्वा दीक्षां ग्रहीष्यामि ।'' इति चिन्तयित्वा निजवाहनमारुह्य चम्पापुरीं गता ।

तत्र प्रथमं देवालयं गता विधिना देवान् नमस्कृत्य प्रान्ते **जिनदत्ता**भिधानं गृहीत्वा पुनः प्रणामं चकार ।

इतश्च पूर्वमागतया देवभवनमध्यस्थया विमलमत्या स्वपतिनामोच्चारं श्रुत्वा हृष्टया पृष्टम्—भद्रे ! त्वया कस्याभिधानं गृहीतम् ? अथ तया पतितुल्यरूपलावण्यदेहोच्चत्वादिगुणानुमानेन तां स्वभगिनीं सम्भाव्य तदग्रे सर्वोऽपि निजपतिवृत्तान्तो जगदे । पुनः **श्रीमत्या** 'त्वं स्वसम्बन्धं वद' इति भाषिता **विमलमती** स्ववृत्तान्तं प्रोच्य 'यदर्थं त्वमिहागता सैवाहं तव भगिनी' इति गदित्वा श्रीमतीं हृष्टां चकार ।

ततः सा **विमलमती** पितुर्वचनेन स्वगृहे तां नीत्वाऽऽगता । ततो द्वे अपि ते समदुःखे साध्वीसमीपे धर्मं श्रृण्वन्त्यौ दीक्षार्थिन्यौ जाते । ततः पिता प्रोचे—'हे वत्से ! युवां द्वादश वर्षाणि प्रतीक्षेथाम्, कदापि युष्मत्पुण्ययोगेन पतिरायाति । यतः —

भूमीतलि[1] भमंतेहिं मिलीइ जु मरीइ नहीं ।
बारवरसछेहिं जिम **दवदंती नल** मिलिउ ॥८४॥'

इति प्रोच्य ते द्वे अपि महाऽऽग्रहेण दीक्षां याचमाने अपि तातेन द्वादश वर्षाणि स्थापिते । तदनु सर्वं शृगारं मुक्त्वा पतिवियोगदुःखातुरे सुखपराङ्मुखे तिष्ठतः ।

इतश्च मूलसम्बन्धः कथ्यते —

**[ उत्तीर्णसमुद्रस्य जिनदत्तस्य विद्याधरराजपुत्र्या विज्जाहरीनाम्न्या सह पाणिग्रहणं विविधविद्याग्रहणं च ]**

यदा **जिनदत्तः** समुद्रमध्ये पातितस्तदा समुद्रदेवतया सत्पुरुषरत्नहत्याभयेन त्रिरुल्लालितः, तदा पूर्वपुण्यानुभावेनैकं फलकं स प्राप । अहो ! भाग्यवतां किं वाञ्छितं न स्यात् ? । यतः—

तृष्यम्बु, क्षुधि भोजनं, पथि रथः, शय्या श्रमे, नौ जले,
व्याधौ सत्परिचारकौषधभिषक्सम्पद्, विदेशे सुहृत् ।
छायोष्णे, शिशिरे शिखी, प्रतिभये त्राणं, तमिस्रे प्रभा,
धर्मः संसरतां भवेद् बहुभवे चिन्तामणिर्देहिनाम् ॥८५॥

---

1. भूमितले भ्रमद्भिर्मिल्यते, यतो म्रियते न हि, द्वादशवर्षान्ते दवदन्त्या नलो मिलितः ॥

तथा —

रणे वने शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥८६॥

फलकाधारेण स **जिनदत्तो** जलधिं तरन्नस्ति । इतश्च —

**रत्नपुरीनगर्यां विज्जाहरो** नाम राजा । तस्य चतुरशीतिपत्न्यः । तन्मध्ये **अशोकश्रीः** पट्टराज्ञी । तत्पुत्री **विज्जाहरी** नाम कुमारी । पितुरेकैव सा पुत्री, अतोऽतीववल्लभा । अपरं सौभाग्योपरिमञ्जरी यत् शीलालङ्कारिणी सर्वस्त्रीलक्षणधारिणी च, तद्रूपाग्रे सर्वदेवाङ्गनाः पदधावने यान्ति । तदुद्वहनाय भूरिशो राजकुमाराः समायान्ति, परं साध्वीसङ्गेन संसारसुखविमुखा सा बुद्धया राजानमुत्तरयामास — तात ! मम स एव वरः यो द्वाभ्यां भुजाभ्यां महासमुद्र-मुत्तीर्य समायाति, नान्यः, तदभावे दीक्षैवेति मे प्रतिज्ञा ।

ततो जनकोऽतीवदुःखी जातो दध्यौ — "इदं कार्यमसम्भाव्यमस्त्येव तथाप्युपक्रमं करोमि, कदाचिदघटमानमपि विधिवशाज्जायते । यतः —

अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते ।
विधिरेव तानि घटयति, यानि पुमान् नैव चिन्तयति ॥८७॥

तथा —

[1]विहि विहडावइ, विहि घडइ, विहि घडिउं भंजेइ ।
इमइ लोय तडप्फडइं, जं विहि करइ सु होइ" ॥८८॥

इति विचार्य पित्रा समुद्रोपकण्ठे तद्वीक्षणाय जना मुक्ताः । कियत्यपि काले गते तटासन्नं **जिनदत्त**मागच्छन्तं वीक्ष्य ते सर्वे हृष्टा भणन्ति — अहो ! पूर्वं कुमार्याः, ततो राज्ञः, ततोऽस्माकमपि च भाग्यं वर्तते, यथेष्टनररत्नप्राप्तिमनोरथसिद्धेः ।

**जिनदत्त**श्च तान् वीक्ष्य न विश्वसिति । यतः —

मुत्ताहलं[2] न गिण्हइ तारापडिबिंबभोलिओ हंसो ।
दुज्जणजणेण घट्ठो न वीससइ सज्जणजणस्स ॥८९॥

---

1. विधिर्विघटापयति, विधिर्घटयति, विधिर्घटितं भनक्ति, निरर्थकं लोको व्याकुलीभवति, यद् विधिः करोति तद् भवति ॥ 2. मुक्ताफलं न गृह्णाति ताराप्रतिबिम्बवञ्चितो हंसः । दुर्जनजनेन घृष्टः = पीडितो न विश्वसिति सज्जनजने । अत्र सप्तम्यर्थे षष्ठी ज्ञेया ॥

'सर्पजग्धानां रज्जुभयं भवति' इति स क्षणं विलम्बते। तैरुक्तम् — मा भैषीः। तव धीरोऽस्तीत्यादिवचनैर्विश्वस्तः फलकादुत्तीर्य जिनदत्तस्तटमायातः। ततोऽनन्तरं तै राजान्तिके गत्वा वर्द्धापनिका गृहीता। ततो राज्ञा मुदा सुखासनं प्रेषयित्वा स महामहेनाऽऽनायितः। राज्ञा तस्य विनयादिगुणैः कुलीनत्वं ज्ञातम्। यतः —

आचारः कुलमाख्याति, देशमाख्याति भाषितम्।
सम्भ्रमः स्नेहमाख्याति, वपुराख्याति भोजनम् ॥९०॥

तथा —

हंसा गतिं, पिकयुवा किल कूजितानि, नृत्यं शिखी, परमशौर्यगुणं मृगेन्द्राः।
सौरभ्य-शैत्यललितं मलयाद्रिवृक्षाः, कैः शिक्षिता ?विनयकर्म तथा कुलीनाः ॥९१॥

ततो राज्ञा पुत्र्यै कथापितम् त्वत्पुण्याकृष्टः समुचितो वरः प्राप्तः, तव प्रतिज्ञा पूर्णाऽस्ति। अथ 'मम मनोरथाः सेत्स्यन्ति' इति श्रुते तस्या राजसुतायाः वामनयनाङ्गस्फुरणेन हर्षोत्कर्षोऽजनि। पुनरित्थं तस्या विवेकिन्या मनसि विचारो जातः — "यन्मया पूर्वमन्यच्चिन्तिम्, दैवेन चान्यत् कृतम्, अतः कर्मगतिर्दुर्लंध्या। यतः —

उदयति यदि भानुः पश्चिमायां दिशायां, प्रचलति यदि मेरुः, शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां, तदपि न चलतीयं भाविनी कर्मरेखा ॥९२॥

अहो! महासमुद्रोल्लङ्घनकरो नरोऽत्र समेष्यतीति स्वप्नेऽपि चिन्तितं नासीत्, तदपि विधिविलसिताद् जातम्। यदुक्तम् —

यन्मनोरथशतैरगोचरं, न स्पृशन्ति कवयो गिराऽपि यत्।
स्वप्नवृत्तिरपि यत्र दुर्लभा, हेलयैव विदधाति तद् विधिः ॥९३॥"

ततस्तया भोगफलं कर्म विचार्य परिणयननिषेधो न कृतः। अनिच्छन्त्याऽपि तया स्ववाचाङ्गभयात् परिणयनमनुमतम्।

अथ राज्ञा ज्योतिषिका आहूताः, तैर्बाढं विलोक्य लग्ननिर्णयः कृतः। ततो वरः शृङ्गारितः परिणयनाय चटितः। तदा लोकास्तस्य भाग्यसौभाग्यप्रकर्षं विलोक्य परस्परं जल्पन्ति— "तत् सत्यं यच्छास्त्रे प्रोक्तम्, यथा —

जं[1] जस्स पुव्वलिहियं धण धन्नं कंचणं कलत्तं च ।
तं तस्स मग्गलग्गं पुच्छंतं घरघरंगणए ॥९४॥

अन्यथा देवदुर्लभेदृशस्त्रीरत्नयोगः कथं स्यात् ?, यतः सूक्तम् — 'संयोगा दुल्लहा हुंति'। भाग्येनैव सदृशयोगो भवति, यतः —

[2]पूनिम विण ससि खंडिउ थाइ, शशि विण पूनिम लाजइ बाइ ! ।
सुकुल पुरुष सुकुलिणी नारि, बिहूं जोड थोडी संसारि ॥९५॥

बहु किं कथ्यते ?

[3]जं जं दुलहं, जं जं च सुंदरं, जं च तिहुयणे सारं ।
तं तं धम्मफलेण य, साहीणं तिहुयणे तस्स ॥९६॥"

एवं निजकर्णमधुराणि जनवचांसि शृण्वन् जिनदत्तो विवाहमण्डपद्वारमागतः । ततो वरः [4]पुहुंकितो, मातृगृहे निवेसितः । ततश्चतुरिकायां मङ्गलेषु जायमानेषु कन्ययाऽसौ गुप्तं सङ्केतितः— स्वामिन् ! यदा मम पिता तव दानं दत्ते तदा त्वया गजाश्वादि किमपि न ग्राह्यम्, परं मत्पितुः कोशे **अनिबन्धनी-जलशोषणी-अग्निस्तम्भिनी-नगरपुरक्षोभिणी**-बहुरूपिणी-**अञ्जनी-तारणी**प्रभृतिषोडशविद्या मनश्चिन्तितं विमानं चास्ति, तत्प्रभावो महान्, नाधुना च वक्तुं शक्यते, अत एव तदेव याच्यम् । ततो **जिनदत्तेन** तदनुमेने ।

एतद् युक्तं यत् तया विचक्षणया भर्तुरग्रे गृहसारग्रहणोपायः प्रोक्तः, यतः —

मितं ददाति हि पिता, मितं भ्राता, मितं सुतः ।
अमितस्य हि दातारं भर्तारं का न पूजयेत् ? ॥९७॥

एतावता संसारे स्वार्थ एव सर्वत्र दृश्यते, न तु मातृ-पितृ-स्वजनादिसम्बन्धं कोऽपि गणयति, यदुक्तम् —

---

1. यद् यस्य पूर्वलिखितं धनं धान्यं काञ्चनं कलत्रं च तत् तस्य पश्चाल्लग्नं पृच्छद् गृहगृहाङ्गनके । अत्र भवतीति अध्याहार्यम् ॥ 2. पूर्णिमां विना शशी खण्डितो भवति, शशिनं विना पूर्णिमा लज्जते भगिनि ! । सुकुलः पुरुषः सुकुलिनी नारी [ च ], द्वयोर्युगलं स्तोकं संसारे ॥ 3. यद् यद् दुर्लभम्, यद् यत् च सुन्दरम्, यत् च त्रिभुवने सारम्, तत् तद् धर्मफलेन च स्वाधीनं त्रिभुवने तस्य ॥ 4. 'पोंख्यो' इति गूर्जरभाषायाम् । पुहुंकित = प्रोक्षित ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः, शुष्कं सरः सारसाः,
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं सेवकाः,
सर्वः कार्यवशाज्जनोऽभिरमते, कः कस्य को वल्लभः ? ॥९८॥

अत्रान्तरे कन्याजनकः संप्राप्तः, प्रोक्तवांश्च—हे वरराज ! स्वकीयं वाञ्छितं याचस्व । तेनोक्तम्—यदि याचितं ददासि तदा षोडशविद्या विमानं च देहि, नान्यत् किमपि प्रार्थये ।

अथ राज्ञा चिन्तितम्—"अहो ! कथमनेन सम्प्रत्यागतेन मम गृहमर्म ज्ञातम् ? महच्चित्रमिदम्, परमेवं जाने 'पुत्र्यैव प्रोक्तम्, नान्यः कोऽपि कथयिता घटते,' तद् ददामि, यदेकस्य कस्यापि विद्या देया एव स्युः, अन्यथा गुरोर्ऋणित्वं भवति; अन्यच्चेदृशः पुरुषः संसारे दुर्लभोऽस्ति, अपरं जामाता, तदेते एवाऽऽभाणकाः सत्या जाताः, यत् 'सुवर्णं पुनः सुरभि' 'इष्टं पुनर्वैद्योपदिष्टम्' 'घृतपूरं पुनस्तन्मध्ये घृतं क्षिप्तम्,' तथा विद्या पात्रे दातव्या, यदाह—

विज्जा[1] वि होइ बलिया, गहिया पुरिसेण भागधिज्जेण ।
सुकुलकुलबालिया विव असरिसपुरिसं पइं पत्ता ॥९९॥

अन्यच्च—

विज्जा[2] अणुसरियव्वा, न दुव्विणीयस्स होइ दायव्वा ।
परिभवइ दुव्विणीओ तं विज्जं तं च आयरियं ॥१००॥

पुनरेवमस्ति—

विद्यया सह मर्तव्यं, न दातव्या कुशिष्यके ।
विद्यया लालितो मूर्खः, पश्चात् सम्पद्यते रिपुः ॥१०१॥

महापात्रश्चायं जामाता"। इति ध्यात्वा राज्ञा तत् सर्वमन्यदपि वस्तुजातं तस्मै दत्तम् । इत्थं तां कन्यां परीणीय महता महेन भूपतिप्रदत्तसौधमागत्य **जिनदत्तः** स्थितः । तत्र च पुण्यानुभावेन सुखेन कालं गमयति, यतः—

धर्मोऽयं धनवल्लभेषु धनदः, कामार्थिनां कामदः,
सौभाग्यार्थिषु तत्प्रदः, किमपरं पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः, किमथवा नानाविकल्पैर्नृणां,
तत् किं यन्न ददाति वाञ्छितफलं स्वर्गापवर्गप्रदः ? ॥१०२॥

---

1. विद्याऽपि भवति बलवती गृहीता पुरुषेण भागधेयेन, सुकुलकुलबालिकेव असदृशपुरुषं पतिं प्राप्ता ॥
2. विद्या अनुसर्तव्या, न दुर्विनीतस्य भवति दातव्या; परिभवति दुर्विनीतः तां विद्यां तं च आचार्यम् ॥

[ जिनदत्तकृतं चम्पानगर्यां विज्जाहरीपत्नीपरिहरणं वामनरूपविकुर्वणं च ]

अथ कस्मिन्नप्यवसरे विज्जाहरीप्रियया समं सारिपाशै रममाणस्य मिथः प्रीतिसंलापं कुर्वतः कुमारस्य स्नेहादिगुणतुल्यत्वेन पूर्वं **चम्पापुरीं** मुक्ता **विमलमती** स्मृतिमागता । ततस्तेन सदुःखेन चिन्तितम्—"सा मद्वियोगेन कथं जीवितं धारयिष्यति ? रे दैव ! त्वया कस्यापि वल्लभजनस्य भवे वियोगदुःखं न दातव्यम्, यतः—

कान्तावियोगः स्वजनापमानं, ऋणस्य शेषं कुनृपस्य सेवा ।
दरिद्रभावे विमुखं च मित्रं, विनाऽग्निना पञ्च दहन्ति सद्यः ॥१०३॥

तथा केनाप्येवमुक्तम्, यथा—

[1]जइ हुज्ज मज्झ जम्मो, असारसंसारसायरुच्छंगे ।
ता सरसकव्व-पियमाणुसस्स मा हुज्ज विच्छोहो ॥१०४॥"

तदा कन्यया प्रोक्तम्—नाथ ! कथमद्य खिद्यसे ? किं क्वापि ममापि विनयच्युतिर्दृष्टा ? ततः कुमारेण 'नहि नहि' इत्युक्ते कन्या प्राह—तत् किं खेदकारणम् ? सोऽप्याह—शृणु प्रिये ! एकस्या कान्तायास्तवेव वल्लभाया विनयादिगुणाः स्मृताः, ततः खेदोऽस्ति । 'स्वामिन् ! ममापि तुल्या या स्त्री सा किं नाम्नी ? क्व चास्ति ? इति निर्बन्धेन पृष्टे **चम्पास्थितविमलमत्याः** संबन्धः प्रोक्तः ।

"[2]वरि ते पंखीया भला, माणुसपाहिं बप्पडा ।
ऊडी जाइं तिहां, जिहां मन होइ आपणुं ॥१०५॥

यद्येवं तन्मनश्चिन्तितविमाने सति कथं खेदः ?" इति चिन्तितं जिनदत्तेन ।

ततश्चम्पापुरीं गन्तुकामेन तेन प्रभाते राजा मुत्कलापितः । राजा वदति—क्व गामी ? तेनोक्तम्—स्वदेशस्वजनमिलनाय यास्यामि । ततो भृशं राज्ञा सस्नेहतयाऽसौ स्थापितोऽपि न स्थितः, तदा राज्ञा कथमप्यतिष्ठते तस्मै बहुधनं दापितं परं न गृहीतम्, यत्र तत्र सर्वसमृद्धिप्राप्तेः ।

ततो विज्जाहरी सर्वं कुटुम्बं मुत्कलाप्य तदादेशात् स्वकीयं सर्वं भूषणं गृहीत्वा मनश्चिन्तितं च विमानमारूढा ।

---

1. यदि भवेद् मम जन्म असारसंसारसागरोत्सङ्गे तर्हि सरसकाव्य-प्रियमनुष्ययोः मा भवतु विरहः ॥
2. वरं ते पक्षिणः शोभनाः मनुष्यपक्षे=मनुष्यापेक्षया दीनाः [ ये ] उड्डयित्वा यान्ति तत्र यत्र मनो भवति आत्मनः ॥

अथ निर्ध्वनिनिशायां **जिनदत्तादेशाद्** विमानं **चम्पोद्यानं** जगाम। तत्र रात्रिशेषे पूर्वं क्षणं कुमारः सुष्वाप। ततो जिनदत्तादेशाद् राजपुत्री सुप्ता। तदाऽञ्जनीविद्यया स्वयमदृश्यीभूय प्रभातं यावत् स स्थितः श्वापदादिरक्षार्थम्।

ततः कौतुकेन रूपपरावर्त्तविद्यया वामनरूपं विधाय नगरमध्ये गत्वाऽनेकगीत-नृत्यविनोदैर्लोकान् रञ्जयति। लोकाल्लब्धं सुवर्ण-दुकूलादि तदैव याचकेभ्यो ददाति। लोकमुखेन ज्ञात्वा राज्ञा स वामन आकारितः। तत्रापि राजसभायां स्वकलाप्रकटनेन सर्वं रञ्जितमस्ति।

**[ विज्जाहर्याः परिदेवनम् ]**

इतश्च सा **विज्जाहरी** प्रातर्जागरिता पतिं न पश्यति ततः पूत्कारान् करोति —
"आः! कथमहं पापिनी निद्रां कृतवती? एषा निद्रा सर्वदुःखभाजनम्, यतः —

निद्रा मूलमनर्थानां, निद्रा श्रेयोविघातिनी।
अचैतन्यकरी निद्रा, निद्रा संयोगघातिनी ॥१०६॥"

इत्यादि वदन्ती मुहुर्मुहुर्मूर्च्छति, पुनर्वनवातेन स्वस्थीभवति, भणति च — "हा नाथ! मामेकाकिनीं मुक्त्वा क्व गतोऽसि? रे विधे! त्वया वल्लभवियोगः कथं विहितः?,

यदाहुः —

[1]रे विहि! मा मा सज्जसि, सज्जसि मा देहि माणुसं जम्मं।
अह जम्मं मा पिम्मं, अह पिम्मं मा वियोगं च ॥१०७॥

तथा —

हीयडा[2] झूरि म झूरि, झरंतह नयणह हाणि।
कवण कहेसि सज्जणहं, रोयंतह कंठह प्राणि ॥१०८॥

अहो! यावद् जीवानां स्तोकोऽपि स्नेहो भवति तावन्निर्वृतिः कुतः स्यात्? यदुक्तम् —

[3]ताव च्चिय होइ सुहं जाव न कीरेइ पियजणो को वि।
पियसंगो जेण कओ दुक्खाण समप्पिओ अप्पा ॥१०९॥

---

1. रे विधे! मा मा सृज, [ यदि ] सृजसि मा देहि मानुष्यं जन्म, अथ जन्म [ ददासि ] मा प्रेम, अथ प्रेम [ ददासि ] मा वियोगं च॥ 2. हृदय! विषीद, मा [ वा ] विषीद, विषीदतो नयनयोः हानिः [ भवति ], कः कथयिष्यति सज्जनं 'रुदतः कण्ठे प्राणान्'॥ 3. तावत् खलु भवति सुखं यावद् न क्रियते प्रियजनः कोऽपि। प्रियसङ्गो येन कृतः [ तेन ] दुःखेभ्यः समर्पित आत्मा॥

तथा —

[1]जह जह बंधइ नेहो पिय-पुत्त-कलत्त-मित्त-बंधूहिं ।
तह तह खिप्पइ बहुले संसारे घोरकंतारे ॥११०॥ ”

[ विमलमती-श्रीमती-विज्जाहरीणां सहावस्थानं तपश्चर्यादिधर्मकरणं च ]

एवं महाशोकं कुर्वाणा विज्जाहरी स्वनाथविलोकनार्थमासन्नदेवालयं गता, तत्रापि तद्विरहेण रुदती सा लोकैः कारणं पृष्टा जिनदत्तवृत्तान्तं प्रोचे । ‘न जाने मां मुक्त्वाऽद्य रात्रौ क्वापि गतः’ इत्युक्त्वा सा स्थिता ।

ततो विमलश्रेष्ठिना निजजामातृनाम श्रुत्वा ध्यातम् जिनदत्तस्तावद् विद्यमानो जातः, तदेनां तद्वल्लभां गृहे नयामि यथा कस्या अपि भाग्येन स कदाचिदायाति । ततः श्रेष्ठिना तां सन्धीर्य स्वगृहं नीत्वा ‘वत्से ! अत्र सुखेन तिष्ठ, अग्रे पुत्रीद्वयं ममास्ति, तृतीया त्वमपि पुत्री’ इत्याद्युक्त्वा सबहुमानं स्थापिता । ततः सुखेन तास्तिस्रोऽपि नायिका मिथोबद्धस्नेहा मौनावलम्बिन्यस्तीव्रवियोगातुरा विशेषतो धर्मध्यानं कुर्वाणाः सन्ति । यदुक्तम् —

ओमिति पण्डिताः कुर्युरश्रुपातं च मध्यमाः ।
अधमाश्च शिरोघातं, शोके धर्मं विवेकिनः ॥१११॥

[ वामनरूपधारिजिनदत्तकृतो मौनावलम्बिनिजपत्नीत्रयवार्तालापेन सर्वजनचमत्कारः ]

अथाऽन्यदा वामनेन रञ्जितो राजा नित्यं बहु प्रसाददानं दत्ते । स च तत्कालमेवाऽर्थिभ्यो यच्छति । प्रधानैरचिन्ति — वामनोऽसौ सर्वं कोशं रिक्तीकरिष्यति, ततः केनाप्युपायेन राजा दानं ददानो वार्यते । इति ध्यात्वा तै राज्ञो विज्ञप्तम्,यत् — “स्वामिन् ! वामनस्येदं कथनीयम्, यत् त्वया सर्वो नगरलोको रञ्जितः, त्वं महान् कलावान्, परं यदि नगरेऽत्र वास्तव्यविमलश्रेष्ठिधर्मशालास्थाः पतिवियोगिनीः केनापि सहाऽजल्पन्तीस्तिस्रः स्त्रीरालापयिष्यसि तदा तव कला बुद्धिबलं च ज्ञास्यते, नाऽन्यथा” इति ।

एकदा तथैव राज्ञोक्ते वामनो जगौ — भूपते ! ताः स्त्रियः कीदृश्यः सन्ति ? पाषाणघटिताः, उत चित्रलेपकाष्ठनिर्मिता वा, देव्यो विद्याधर्यो वा ? इति श्रुत्वा राज्ञोचे — ता मानुष्य एव सन्ति । वामनः प्राह — “अहो ! तासामालापने का कथा ? देव ! यदि तव कौतुकं स्यात् तदा त्वत्सभाग्रे द्विपञ्चाशत्करप्रमिता शृङ्गारशिला नाम शिलाऽस्ति तामट्टहासेन हासयामि” । तथैव राजादेशाद् वामनेन सर्वां शिलां पट्टदुकूलादिभिराच्छादितां

---

1. यथा यथा बध्यते स्नेहः प्रिय-पुत्र-कलत्र-मित्र-बन्धूभिः तथा तथा क्षिप्यते बहुले संसारे घोरकान्तारे ॥

कृत्वा तन्मस्तके स्वहस्तं न्यस्य **तारणी** विद्या जप्ता। ततः सा शिला विद्याबलेन ऊर्ध्व-मुत्पतिता सती नभोमण्डले इतस्ततो भ्रमति चाट्टहासं मुञ्चति च। इति दृष्ट्वा सर्वैः सभालोकै-र्भयभ्रान्तैः पलायितम्। राज्ञोक्तम्—वयं त्वत्कौतुकानां प्राणाः, परं भ्रमन्तीं शिलामाकशा-दुत्तारय। वामनेनोक्तम्—राजन्! मा भैषीः, मच्छिक्षिता शिला तव किमपि न करिष्यति। इत्युक्त्वा राजादेशात् शिला स्वस्थाने निवेशिता। तुष्टेन च राज्ञोक्तम्—अहो! वाञ्छितं वरं याचस्व। वामनः प्राह—हे देव! तिस्रः स्त्रीर्यावन्नालापयामि तावत् तव प्रसादं न गृह्णामि।

इतश्च सर्वसभासहितो राजान्वितो वामनो धर्मशालां गतः। तत्र धर्मध्यानस्थिता राजाद्यागमनज्ञानात् सविशेषं संवृताङ्गीरधोदृष्टीः शान्तचित्ता अपवरकमध्यस्थाः स्त्रीरवलोक्य, बहिरागत्य स्थितानां 'कथमयं वामन एता ईदृशीर्जल्पयिष्यति?' इति राजादीनां कौतुकं जातम्।

इतश्च वामनेव मध्ये गत्वा ज्येष्ठा **विमलमती**: सम्भाषिता—हे भद्रे! मया साकं कथं न जल्पसि? किं तदपि तव विस्मृतं यत् यस्मिन्नवसरे मयैकादश द्रव्यकोटयो हारिता-स्तदा त्वया पञ्चदशकोटिप्रमाणः कञ्चुको द्यूतकारेभ्यो दत्तः, अहं तेभ्यस्तमङ्गाणकमर्पयित्वा गृहमागतः' इति श्रुत्वा सा **विमलमती**रुत्फुल्ललोचना मुखमूर्ध्वीकृत्य सम्मुखं विलोकयति स्म 'अहो वामन! त्वं कथमेनं वृत्तान्तं जानासि? स क्वास्ति जिनदत्तः?' इति तयोक्ते 'अधुनाऽहं व्यग्रोऽस्मि, कल्ये कथयिष्यामि' इति भणित्वा निर्गतः सः। राजादयो धूनिताः, परं केनापि न ज्ञातम् यद्—इयं कथं जल्पिता? इति। ततः सर्वेऽपि स्वस्व-स्थानं गताः।

अथ द्वितीयदिने प्राग्वद् राजादिभिः सहाऽऽगत्य वामनेन द्वितीया **श्रीमती** अधोभ्रुवं वीक्षमाणा जल्पिता—हे सुन्दरि! त्वं मया सह कथं नाऽऽलपसि? त्वया सर्वं पूर्वानु-भूतमेकस्मिन् भवेऽपि कथं विस्मारितम्, यदा धवलगृहमध्येऽहमागतः तदा दोलाखट्वाया उत्तीर्य मत्सम्मुखमागत्य प्रीत्याऽऽलापं कृत्वा त्वं निद्रायिता, अथ मया सर्पं निगृह्य तव सौख्यमुत्पादितमिति त्वमपि स्मर। अथ सा समुत्थाय तं विकस्वरनयनाभ्यां निरीक्षते स्म, 'अहो वामन! समुद्रमध्ये क्षिप्तो **जिनदत्तः** क्वास्ति?, कथं तद्वृत्तान्तश्च त्वद्गोचरो जातः?, त्वं च कः? इतीदं सर्वमसम्भाव्यं मां ज्ञापय' इति तयोक्ते 'अद्याहं कार्यातुरोऽस्मि, कल्ये कथयिष्यामि' इत्युक्त्वा धर्मशालाया बहिरागत्य राजादीनामग्रे तेनोक्तम्—भो! द्वितीयाऽद्य जल्पिताऽस्ति। इति श्रुत्वा चित्ते चमत्कृतास्ते सर्वे स्वस्थानं गताः। पुनः

कन्यानां तत्पितॄणां लोकानां च हृदि 'कोऽयं ?, किं वदति ?' इत्यादयो भूयांसो विकल्पा जायमानाः सन्ति ।

अथ तृतीयदिने पूर्वरीत्या समागत्य **विज्जाहरी** यत्र प्रदेशेऽस्ति तत्र गत्वा वामनो बभाषे—"हे भद्रे ! हे सुन्दरि ! हे **विज्जाहरी** ! त्वं मां नोपलक्षयसि ?, चतुरिकामध्ये त्वया मम सङ्केतः कथितः, यत् 'पितृपार्श्वात् षोडशविद्या विमानं च याचनीयम्' तथैव राज्ञोऽग्रे मयोक्ते तत् सर्वं लब्धम्, ततो विद्याबलेनाहमीदृशो जातः" । इत्युक्ते सम्भ्रान्ततया मुखं विलोक्य सा चिन्तयति—सत्यमेवेदम्, विद्यावानेष चिन्तितरूपाणि करोति । ततो **विमलमत्यग्रे** तया कथितम्--हे भगिनि ! **जिनदत्तोऽयं** भवत्येव, विद्याबलेनेदृशो जातः । अथ **श्रीमत्या** भणितं—हे सखि ! सत्यप्रायमिदं सम्भाव्यते **विज्जाहरी**पूर्वप्रोक्तवृत्तान्तेन ।

अथ राजादिषु श्रृण्वत्सु विमलमती रोषं कृत्वा जगौ—रे मुग्धे ! मां न कोऽपि विप्रतारयितुं शक्नोति वचनाडम्बरेण, यतो न ज्ञायते विद्यासिद्धो नरो देवतादिप्राप्तवरो वा धूर्तो वा कोऽप्येष भावी, तदेनं तदैव मानयामि यदा केवली स्वमुखेन वदति, नान्यथा । इत्थं सर्वसमक्षं सखीद्वयं निर्भर्त्स्य पश्चा**द्विमलमत्या** वामनो हक्कितः—रे कितव ! त्वयाऽबला-बाल-गोपालादयः सर्वे वचनप्रपञ्चवैचित्र्यात् विप्रतारिताः, पुनर्नाहं केनाऽपि विप्रतार्ये, एष स कपित्थो न हि यो वातेन पतति, रे वामन ! **हापा**श्रेष्ठिभार्यावद् विषयलौल्येन लोकापवादपापाऽपकीर्तिभाजनं नाहं भविष्यामि । **श्रीमत्या** पृष्टं—हे भगिनि ! कोऽसौ **हापा**श्रेष्ठिवधूसम्बन्धः ? सा भणति यदि कौतुकं तदा श्रूयताम्—

**प्रतिष्ठानपुरे जितशत्रु**र्नाम राजा । तन्नगरमध्ये श्रेष्ठी **हापा**ख्यो वसति, स बहुद्रव्यकोटिपतिरपि कृपणपितामह इव शोभनं न खादति, न पिबति, सत्यपि धने महादरिद्रवद् रुलति, न कस्यापि किञ्चिद्दत्ते च ।

यतः—

निंबफलं[1] किवणधणं सायरसलिलं च दूहवारूवं ।
कायरकरि करवालं विहलं विहिणा विणिम्मवियं ॥११२॥

[2]कां किज्जइ कृपणह तणइ, धोलइ धवलहरेहिं ।
वरि पन्नाडां झूपडां, पहिय अवलंबइ जेहिं ॥११३॥

---

1. निम्बफलं कृपणधनं सागरसलिलं च दुर्भगारूपं कातरकरे करवालं विफलं विधिना विनिर्मितम् ॥
2. किं क्रियते कृपणानां धवलैः धवलगृहैः ? वरं पर्णयुक्ताः कुट्यः पान्था अवलम्बन्ते यत्र ॥

[1]धम्मि न वेचइ रूयडउ, मीठउ ग्रास न खाइ ।
राउलि चोर पलेवणइ, धन पेखंतां जाइ ॥११४॥

दानं दूरेऽस्तु, कृपणस्य धनं भोजने वपुभोगेऽपि नायाति । यतः —

धनेऽपि सति भोजनं प्रकृतिशोभनं नात्ति यो,
न चारुतरमम्बरं परिदधाति भीतो व्ययात् ।
करोति कुसुमादिभिर्न तनुभोगमप्युत्तमं,
परस्य वितरत्यहो ! कथमसौ धनं तृष्णकः ? ॥११५॥

देशे देशे धनार्थं स भ्राम्यति, न गणयति रात्रिं दिनं च ।

तस्य द्वे भार्ये रतिप्रीतितुल्ये महारूपवत्यौ स्तः, परमाजन्मगुप्तिगृहक्षिप्ते इव, बन्दि-पतिते इव, महावस्थाप्राप्ते ते द्वे स्तः । तयोर्द्वयोर्न रम्यं खादनम्, न पानम्, न परि-धानम्, नाच्छादनम्, नान्यदपि किञ्चित् संसारसुखं विद्यते । पुनरपि श्रेष्ठिगृहं किञ्चिद् वर्ण्यते, यथा —

यद्गेहे मुशलीव मूषकवधूर्मूषीव मार्जारिका,
मार्जारीव शुनी, शुनीव गृहिणी, वाच्यः किमन्यो जनः ।
क्षुत्क्षामक्लमघूर्णमाननयनैः स्वोन्निद्रमुर्वीगतैः,
कर्तुं वाग्व्ययमक्षमापि जननी डिम्भैः समालोक्यते ॥११६॥

एकदा श्रेष्ठी **हापाको** वित्तोपार्जनाय बलीवर्दावलीं गृहीत्वा विदेशं गतः ।

अत्रान्तरे कोऽपि धूर्त्तवतंसो भ्रमन् तस्य गृहान्तिके समेतः । स ऊर्ध्वमूखीभूय सर्वं सदनं विलोक्य कमपि पुरुषं पप्रच्छ — कस्येदं सर्वजनकृतस्पृहं धवलगृहम् ? सोऽप्याह — "तस्येदं गृहं यस्य कृपणस्य प्रातर्नामापि न गृह्यते, 'तर्हि किमीदृशं सुन्दरतरं गृहं बहुद्रव्य-व्ययेन कारयितुं श्रेष्ठी शशाक' इति चित्ते त्वया शङ्का न कार्या, यतः पूर्वजकारितं चैतत्, अस्मिन् वंशवज्राकरेऽसावेव कर्करोऽजनि, अत्र सत्कुलेक्षुवाटकेऽयमेव नीरसो नल-तृणविशेषोऽभवत् " ।

1. [ यः ] धर्मे न व्ययति रूप्यकम्, मिष्टं ग्रासं न खादति, [ तस्य ] राजकुले चौरे प्रदीपने = अग्नौ धनं पश्यतो याति ॥

ततो गृहद्वारे गत्वा धूर्त्तेन गृहमध्ये दृष्टिः सञ्चारिता । ततो जीर्णशीर्णवस्त्रावृतं गृहीणीद्वयं दृष्टं परं रतिरूपगर्वसर्वङ्कषम् । तद्गृहद्वारि द्वाःस्थादयो देहदौर्बल्यान्निर्गतस्नायुजाला वेताला इव दृष्टाः ।

ततस्तेनाऽचिन्ति — ही ! गृहसर्वस्वमिदं निरर्थकम्, भोगरहितत्वात् । ततस्तस्य दंष्ट्रा गलिता — यदहं गृहस्य स्वामी भवामि देवतादिसान्निध्यात्, सम्प्रत्यवसरोऽस्ति गृहधनिकाऽभावात्[1] ।

ततस्तेन धूर्तेन पुरबहिर्वर्त्ती सकलसप्रत्ययो यक्षस्त्रिभिर्लङ्घनैः प्रत्यक्षीकृतः स्माह — भोः ! किमिति लङ्घयसि ? धूर्तः स्माह — मम हापाकश्रेष्ठिरूपं देहि । यक्षः स्माह — नैवाहमीदृशमनुचितं करोमि, रे विट ! मम मन्दिरादुत्तिष्ठ । इत्युक्त्वा यक्षो गतः । पुनरपि धूर्तेन चत्वारि लङ्घनानि कृतानि । ततः 'खल्वसौ मदुपेक्षितो मरिष्यति, मम स्थानं च निष्फलं भावी' इति विचिन्त्य यक्षोऽपि भग्नः प्रोचे — भवदुक्तं रूपं भवतु, परं निर्गच्छ मम भवनात् ।

ततो यथेष्टे रूपे जाते कृतपारणो हापाकश्रेष्ठिगृहं गतः षिङ्गः । सर्वैर्द्वाःस्थैः कर्मकरैः प्रियाद्वयादिभिर्यथोचितं सम्मुखोत्थानादिप्रतिपत्तिस्तस्य कृता निर्विघ्नमस्खलितो गत्वा स गृहस्वामी भूत्वा निषण्णः । ततो वाणिपुत्राः कोशाध्यक्षादयस्तेन जल्पिताः — "अहो ! श्रूयतां मया देशान्तरं गतेन मुनिमुखात् श्रुतमिदम्, यथा —

दानं भोगस्तथा नाशः स्याद् द्रव्यस्य गतित्रयम् ।
यो न दत्ते न भुङ्क्ते च, तस्य तृतीया गतिर्भवति ॥११७॥

तथा —

धन[2] राउलि, जीवीय जमह, राधउं पाखेलाहं ।
हुंतउ जेहिं न माणिउं, छारबचक्कउ तेह ॥११८॥

अन्यच्च श्रीमन्तमेकं मृतं च दृष्ट्वा तथा समुद्रमध्ये यानपात्रब्रुडने प्राणान्तसङ्कटं सर्वक्षयं च ज्ञात्वाऽहं परमं निर्वेदं गतो दध्यौ — यद्यस्मिन् वारे कुशलेन गृहं गमिष्यामि तदा स्वस्य परस्यापि वाञ्छितं पूरयिष्यामि" । इति कपोलकल्पितं भाषित्वा तेन सर्वजनाः प्रत्यायिताः ।

---

1. गृहस्वामेरभावादित्यर्थः, धनिक = 'धणी' इति भाषायाम् ॥ 2. धनं राजकुले, जीवितं यमस्य, रन्धितं पार्श्वस्थानां [दत्तं] विद्यमानं यैर्न मानितं = भुक्तं भस्ममुष्टिः तेषाम् ॥

ततः प्रियायोर्द्वयोः सुवर्णभूषणानि दुकूलानि बहूनि दत्तानि स्वयं परिहितानि च। ततो वाणिपुत्राः द्वारपालाद्याः कर्मकराश्च विदेशविक्रेतव्यसूक्ष्मचीवरपुट्टलिकाश्छोटयित्वा परिधापिताः। ततो गोधूम-तन्दुल-घृतादि जनैरानाय्य पक्वान्न-खण्डखाद्यादि संस्कृत्य संस्कृत्य स्वयं भुङ्क्ते, सर्वं कुटुम्बादि भोजयते च।

ततो गृहसमीपे स श्रेष्ठी दानशालां मण्डयित्वा दीनानाथेभ्यो भोजनं यच्छति, साधर्मिकवात्सल्यं विधत्ते, सर्वचैत्यालयेषु धनव्ययं कुर्वाणोऽस्ति, भूरिभट्ट-बन्दिजनादीनां च वाञ्छितं पूरयन्नस्ति। दोलाखट्वारूढः सर्वकालं गीतगानं कारयति, भार्याद्वयेन च सारिपाशकद्यूते रमते। इत्थं तं विलसन्तं दृष्ट्वा जनो वक्ति — अहो! असम्भाव्यं दृश्यताम्, श्रेष्ठिनोऽपि प्रकृतिपरावर्त्तो जात इति। तेन धूर्तेन सत्योऽयमर्थः कृतः, यथा —

धणु[1] संचइं केई कृपण, विलसीजइं छयल्ल।
रंगि तुरंगम जव चरइं, हल वहिय मरइं बइल्ल ॥११९॥

तथा —

कदर्योपार्जिता लक्ष्मीर्भोगो भाग्यवतां भवेत्।
दन्ता दलन्ति कष्टेन, जिह्वा गिलति लीलया ॥१२०॥

इतश्च कियत्यपि गते काले स कृपणश्रेष्ठी विदेशादाययौ, सर्वक्रयाणकं दानमण्डपिकायामुत्तार्य स्वगृहं रात्रौ समागतो भणति — भो भो द्वारपालाः! द्वारमुद्घाटयत। तैरुक्तम् — कस्त्वम्?। सोऽब्रवीत् — अहं हापाकश्रेष्ठिनामा गृहस्वामी। तैरुक्तम् — रे! को हापाकः?, एकोऽस्माकमग्रेऽपि श्रेष्ठि हापाकोऽस्ति, त्वं नवीनः कोऽपि धूर्त्तः। स दध्यौ — सम्प्रति नैते मां लक्षयन्ति, प्रातर्वार्ता। इति ध्यात्वा तत्र श्रेष्ठी स्थितोऽचिन्तयत् — ननु द्वितीयः कोऽसौ हापाक?। इति मनसि खिद्यमानो महार्त्या निशां बहिर्निर्गम्य प्रातर्मध्ये प्रविशन् स द्वाःस्थैर्गलहस्तितः। तदा स कृपणश्रेष्ठी कथञ्चिन्मध्ये निरीक्षमाणो दोलाखट्वारूढं कृत्रिमं हापाकश्रेष्ठिनं दृष्ट्वोदरे दाहे पतितेऽचिन्तयत् — अहो! केनापि धूर्तेन मम गृहसर्वस्वं भक्षितम्, अहं प्रवेशमपि न लभे, धनिकोऽप्यहं चौरो जातः, कस्याग्रे स्वदुःखमिदं वच्मि? परं 'दुर्बलस्य बलं राजा' इति ध्यात्वा पूगीफल-मदनफल-निम्ब-बिल्व-बदरीफलादि ढौकनिकां लात्वा राजसभां गत्वा तां पुरो मुक्त्वा प्रणामं कृत्वा हापाकः स्थितः।

---

1. धनं सञ्चयन्ति केऽपि कृपणाः, विलसन्ति छेकाः। रङ्गेन तुरङ्गमा यवान् चरन्ति, हलं उद्वा म्रियन्ते बलीवर्दाः॥

राजोवाच — भो श्रेष्ठिन् ! आगच्छत निषीदत वदत केषु केषु देशेषु यूयं भ्रान्ता ?, किं किं वस्तुपटलमानीतम् ?, पुनः क्वापि किमप्यपूर्वमाश्चर्यं दृष्टम् ? ततः स्पष्टं सकष्टं श्रेष्ठ्याचष्ट — राजन् ! एकत्र कच्छे मया वृतिश्चिर्भटकानि खादन्ती दृष्टा । राजाऽऽह — अघटमानमिदम्, इत्थं कथं स्यात् ? श्रेष्ठ्याह — कथमिदं न स्यात् ?, यन्मदीयां श्रियं राजाऽन्यस्मै विटाय दद्यात्, 'यतो रक्षा ततो भयम्' इति त्वया प्रजापालेनापि सत्यापितम् । 'अहो ! इदं स्वरूपमस्माकमज्ञातम्' इति वदति राज्ञि स धूर्तस्वरूपमुक्त्वा जगौ — देव ! तवाऽऽश्वासं विना कोऽपि कस्यापि किमपि ग्रहीतुं शक्नोति ? यमं विना किं शिशवो म्रियन्ते ?

ततो न्यायधर्मनिष्ठो राजा धूर्ताह्वानाय तद्गृहे पुरारक्षान् प्राहिणोत् । ततस्ते श्रेष्ठिगृहे गत्वा द्वाःस्थानां राजादेशं जगुः । ते मध्ये गत्वा 'देव ! द्वितीयनवीनागत-हापाकश्रेष्ठिकृतरावीव्यतिकरे त्वां भूपतिराह्वयति' इति भाषन्ते स्म । ततस्तेन पुरारक्षाः क्षणं स्थापयित्वा गौरविताः । ततः सकलकोशसारैः रत्नभारैर्विशालं सुवर्णस्थालं भृत्वा जात्य-तुरंगममारुह्य सर्वभूषणभूषिताङ्गः कृत्रिमश्रेष्ठी सभां गतः । ततोऽपूर्वैरपूर्वैर्वस्तुभिरुपदा राज्ञः कृता, यतस्तस्य पितुः किमपि याति ? यदि याति तदा तस्य कृपणश्रेष्ठिनः सर्वं याति । पुनस्तस्य हापाकस्य क्षेमक्षितिर्न ह्यासीत् । तथा तं कृतकं सत्यं च श्रेष्ठिनमालोक्य सर्वे राजादयो विस्मितमुखाः शिरो धूनयन्तश्चिन्तयन्ति — अहो ! आकृत्या सदृशत्वं नेदृशं भूतं न भावि, तदेतयोर्मध्ये कः कूटः ? ।

ततो राज्ञा पृष्टे श्रेष्ठिभ्यां स्वस्वसम्बन्धे प्रोक्ते राज्ञा कारणिका आहूयाऽऽ-दिष्टाः — निर्णयः क्रियतामिति । किमनेन दुर्दशालयेन ?, अहो ! लोभस्त्रिभुवनं परावर्त्तयति यदीदृशा न्यायकारिणः प्रधानपुरुषा अपि येन लोभेन मुह्यन्ति । अतः कान्तीपुर्यां मकर-ध्वजराजराज्ये सरोमध्यस्थेन मस्तकेन सत्यमुक्तं यद् 'एकेन ब्रुडति' इति ।

लोभो[1] सव्वविणासी, लोभो परिवारचित्तभेयकरो ।
सव्वावइ-कुगईणं लोभो संचाररायपहो ॥१२१॥

ततः सर्वैर्मन्त्रिभिर्विमृश्य प्रोक्तम् — राजन् ! उपदाकारी प्रमाणीक्रियताम्, सम्यग्ज्ञाना-भावात् । ततो राज्ञोचे — नैवम्, किं कार्यमुपदया ?, सत्यं न्यायं कुरुत । तत-स्तैरूचे-यद्येवं तर्हि न वयं परमार्थं वि : । ततः स्वबुद्ध्या राज्ञोचे — भोः प्रधानाः !

1. लोभः सर्वविनाशी, लोभः परिवारचित्तभेदकरः, सर्वापत्-कुगतीनां लोभः सञ्चारराजपथः ॥

अस्य श्रेष्ठिनो गृहात् प्रियाद्वयमाकार्य यूयं कथयत 'एतयोर्द्वयोरेकः सत्यो भर्त्ता युवाभ्यामङ्गीक्रियताम्' इति ।

अथ मन्त्रिप्रहिते राजपुरुषैर्हापाकस्य गृहं गत्वा राजादेशे प्रोक्ते ताभ्यां द्वाभ्यां स्त्रीभ्यां सर्वशृङ्गारं कृत्वा याप्ययानमारुह्य राजसभां गच्छन्तीभ्यां मार्गे मिथः प्रोक्तम्—"राजादेशे सति कः स्वीकरिष्यते? यः सम्प्रति नवीनो विदेशागतोऽस्ति स एव स्वीयपतिः सम्भाव्यते, यतः कदर्यप्रकृतिरयम्, प्रकृतिश्च दुस्त्याज्या यदुक्तम्—'या यस्य प्रकृतिः स्वभावजनिता दुःखेन सा त्यज्यते'। ततोऽयं स्वपतिः कदर्यधुर्यः स्वकीये शिरस्याऽऽजन्मभग्नोऽस्ति, अनेनात्मीयमुदरं सदा ज्वालितम्, असौ च द्वितीयश्रेष्ठी निजोदरं निर्वापयति, तदेतयोर्मध्ये कोऽङ्गीकरणीयः?" इति परस्परेणोक्ते विमृश्य वृद्धया भणितम्—'यो दत्ते स देवता' अमुमेव न्यायमादृत्यायमुदार एव स्वीकार्यः, पुनस्तस्य पापिनः कृपणमुख्यस्य नामापि न ग्राह्यम् । ततो द्वितीययोक्तम्—इदमेव सुन्दरं प्रोक्तम्, ममापि रुचितम् । इत्थं मिथः साम्मत्ये कृते सभायां ते द्वे समेते ।

राजोचे—भोः सुन्दर्यौ ! यो द्वयोर्मध्ये सत्यः श्रेष्ठी स बाह्वौ ध्रियताम्, पुण्यं पापं च युवयोर्मस्तके, अत्रार्थे वयं निष्कलङ्काः किमपि न विद्मः । इति राज्ञोक्ते ताभ्यां एकभविनीभ्यां विषयलोलाभ्यां कृत्रिमश्रेष्ठी स्वीकृतः । ततः सत्यश्रेष्ठी राजादेशाद् गलहस्तितः । ततोऽयं ग्लानिं गतः निराधारो जातः काष्ठवदचेतनोऽभूत् ।

अत्रान्तरे राजजनैरान्दोल्यमानं ताड्यमानं च तं दृष्ट्वा सदयहृदयो धूर्तहापाको दध्यौ—हहा ! अस्य हृदयं स्फुटिष्यति, अहं हत्याऽपवादी भविष्यामि, मया तु स्ववाञ्छितं पूरितम्, कस्या अपि वर्ताया अवसानं न गृह्यते, अस्य सर्वस्वमस्यैवार्प्यते । इति ध्यात्वा कृत्रिमश्रेष्ठी विडम्बनाकरान् जनान् निवार्य राजानमूचे—हे कृपालुभूपाल ! यदि मयि छलं न स्यात् तदा धर्मार्थं युक्तं किञ्चिद् वदामि । ततो राजोचे—हे श्रेष्ठिन् ! भवतो महापराधस्यापि सम्प्रति दण्डं न करोमि, यथेच्छं वदेति । ततो धूर्तोऽवदत्—देव ! अयमेव श्रेष्ठी सत्यः, अहं तु कूटः । इति प्रोक्ते राज्ञा च साश्चर्येण 'कथम्?' इति पृष्टे तेन सर्वो मूलवृत्तान्तः कथितः । ततो धूर्तः सर्वं श्रेष्ठिनोऽर्पयित्वा ब्रूते—

दातव्यं भोक्तव्यं, सति विभवे सञ्चयो न कर्तव्यः ।
यदि सञ्चयं करिष्यसि, हापा ! पुनरागमिष्यामि ॥१२२॥

इति प्रतिबोधदानेन सर्वेषां चमत्कारमुत्पाद्य धूर्तः शीघ्रं स्वस्थानं गतः। ततः श्रेष्ठी लज्जितः प्रियाद्वययुतः स्वगृहं गत इति। तदा सर्वै राजादिभिः भार्याद्वयं निन्दितम् — आः ! एताभ्यां किमकृत्यं कृतम्?, तन्महापापिन्यावेते इति।

**विमलमतिः** सर्वं कथानकं प्रोच्य वदति स्म — अहो ! वामन ! हे श्रीमति ! विषयसुखलौल्येन ताभ्यां लोकद्वयं यथा हारितम्, इहावर्णवादो जातः परत्र दुर्गतिश्चेति तथा नाहं भवामि, न पुनरहं तद्वद् इहलोकसुखगा न केनापि परावर्त्ये।

अत्रान्तरे सर्वपौरलोकैश्चिन्तितम् — अहो ! अस्या वचनचातुर्यम्, अहो ! शीलनिश्चलता च। श्रीमती विज्जाहरी च द्वे अपि किङ्कर्तव्यतामूढे जाते। 'कथमेषा प्रत्याययिष्यते?' इति। वामनस्तु स्वकान्तां शीलैकान्तदृढां ज्ञात्वा मनसि मुदितो जातोऽस्ति।

**[ जिनदत्तकृतं मदोन्मत्तहस्तिवशीकरणम् ]**

इतश्च राजकुञ्जर आलानस्तम्भं मोटयित्वा भारसहस्रशृङ्खलां त्रोटयित्वा, प्रतोलीं पातयित्वा, शुण्डया बहुजनान् पीडयित्वा सर्वनगरं हतप्रायं करोति स्म। स व्यालः साक्षात्काल इव सर्वजनस्य जातः। ततो बुम्बाकरेण नरेण केनापि राज्ञे प्रोचे — देव ! तव पट्टहस्ती मदोन्मत्तो जातः, तद्भयेन सर्वं पुरं दिशि दिशि नष्टम्। तच्छ्रुत्वा सर्वमुत्थितम्। ततोऽरण्यमिव शून्यं रणमुखं पुरं दृष्ट्वा लोकं निजप्राणरक्षार्थं वृक्ष-गिरि-चैत्यादिशिखरारूढं च ज्ञात्वा स्वयमपि राजा बहिर्वने गतो मूढबुद्धिर्दध्यौ — संसारे स एव श्लाघ्यावतारो योऽधुना किङ्कर्तव्यतामूढस्य मम बुद्धिं ददाति, किमपरैर्नरैः। यदुक्तम् —

[1]आसन्ने रणरंगे, मूढे मंते तहेव दुब्भिक्खे।
जस्स मुहं जोइज्जइ, सु च्चिय जाओ किमन्नेणं? ॥१२३॥

ततो नृपो बभाषे — भो भो वीराः ! भवतां मध्ये स कोऽप्यस्ति य एनं पट्टहस्तिनं वशवर्त्तिनं करोति? परं केनापि कृतान्तदुर्दान्तः कोपाक्रान्तः स गजो न नामितः।

ततो राज्ञा पटहवादनपूर्वमित्याघोषयामासे — यः कोऽपि गजमेनं वशमानयति तस्य राजा राज्यार्द्धं **मदनमञ्जरीं** च कन्यां दत्ते। इति पटहोद्घोषणा सर्वत्र कारिता, परं केनापि भयभीतेन जनेन न तत् क मशक्यत। परं 'किमत्र भावि? सम्प्रत्येव किं कल्पान्तो भविष्यति?' इति सर्वैर्व्याकुलीभूतम्।

1. आसन्ने रणरङ्गे मूढे मन्त्रे तथैव दुर्भिक्षे यस्य मुखं दृश्यते स खलु जातः, किमन्येन? ॥

अत्रान्तरे वामनेन पटहः स्पृष्टः। ततो राज्ञोऽग्रे पाटहिकैस्तत्र व्यतिकरे विज्ञप्ते राजादेशात् प्रधानैः स वामनो राज्ञोऽग्रे समानीतः। 'भो वामन! त्वं ह्रस्वरूपोऽपि महासुभटदुराकलनीयं गजं वशं कथं नेष्यसि?, स्वात्मशक्तिं विचारय' इति राज्ञोक्ते वामन आह —

"कां[1] किज्जइ लहुडइं वडइं[2]? पुरिसह फुरण प्रमाण।
लहुड केसरि समरभरि [3]मलइ गइंदह माण ॥१२४॥

अथवा बहुवाग्जालेन किम्? फले व्यक्तिर्भविष्यति, यतो महान्तः कर्तव्यशूराः, न तु वाक्छूराः; ततो महाराज! कदाचिदिदमपि स्यात् तदा किं दत्से"। ततो भूपतिः सर्वजनसमक्षमूचे—यद्येवं स्यात् तदा 'अर्द्धराज्यं कन्यां च ददामि' इति मम प्रतिज्ञा।

ततो वामनो विनोदेन गजवशीकरणीं विद्यां स्मृत्वा चचाल। राजादयस्तु लोकाः पृष्ठस्थिताः कौतुकं विलोकयन्ति। तदा गजान्तिकं गत्वा वामनस्तमाह्वयते — रे पशो! किं वृथा वराकं लोकं नटयसि?, यदि तव काऽपि शक्तिरस्ति तदा मत्सम्मुखमागच्छ। इति श्रुते शुण्डामुत्पाट्य रोषारुणः स गजो धावितः। ततो वामनस्तनुलाघवेन पुरःस्थितो यथा चक्रवद् भ्राम्यति तथा स गजोऽपि पृष्ठलग्नो भ्रमति। इत्थं बहुवेलं भ्रमरकवत् तेन स गजो भ्रामितः। ततः श्रमेण सर्वमदोऽस्य गलितः, निर्वीर्यत्वं च जातम्। ततः करणं दत्वा वामनो गजशिरो वेगादारूढः, कुम्भस्थले मुष्टिप्रहारेण हत्वा गजो वशीकृतश्च। ततो जनो दध्यौ—नायं वामनमात्रः, किन्तु सुरो विद्याधरो विद्यासिद्धो नरो वा कोऽप्यस्ति।

अथ सर्वलोकेषु कौतुकं पश्यत्सु राजानं तत्राऽऽगतमालोक्य स्वयं स वामनो विनीतत्वाद् गजादुत्तीर्णः। अहो! कुलीनानां स्वभाव ईदृश एव स्यात्। यतः —

[4]को चित्तेइ मयूरे?, गइं च को कुणइ रायहंसाणं?।
को कुवलयाण गंधं, विणयं च कुलप्पसूयाणं? ॥१२५॥

ततो वामनो वदति — हे राजराज! त्वमेनं गजराजमारोह, मा भैषीः। इत्युक्तोऽपि नृपो बिभ्यत् तं नाऽऽरुरोह, 'बृहस्पतिरविश्वस्यः' इति नीतिवाक्यप्रामाण्यात्। ततः स्वयं वामनेन विद्याबलेन कर्णे धृत्वा क्षणेन हस्ती हस्तिशालायां बद्धः।

---

1. किं क्रियते लघुना गुरुणा?, पुरुषस्य स्फुरणं प्रमाणम्। लघुः केशरी समरभरे मर्दयति गजेन्द्रस्य मानम्॥ 2. **वडइं? सत्तह फुरइ प्र°** प्रत्यन्तरे॥ 3. **दलइ** प्रत्यन्तरे॥ 4. कः चित्रयति मयूरान्? गतिं च कः करोति राजहंसानाम्? कः कुवलयानां गन्धं विनयं च कुलप्रसूतानां [करोति]?॥

[ वामनरूपधारिणे जिनदत्ताय निजकन्यादाने प्रतिज्ञाबद्धचम्पानगरीनृपस्य चिन्ता ]

ततः सभाऽऽसीनस्य नृपस्य पुरो गत्वा वामनो भाषते–राजन्! निजप्रतिज्ञां पूरय, स्ववाणी प्रमाणीक्रियताम्। इति श्रुत्वा नृपतिरित्थं खिद्यते स्म — "यदयं चार्वाकः कुरूपो वामनः क्व? क्व चासौ मत्पुत्री **मदनमञ्जरी** सुरसुन्दरीसमा?, ततः सम्बन्धोऽयमत्यर्थमनुचितः, यथा काकस्य ग्रीवायां मुक्तावली न शोभते, इत्थं योजितः सम्बन्धो लोकापवादाय स्यात्। यदुक्तम् —

कनकभूषणसङ्ग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चापि न शोभते, भवति योजयितुर्वचनीयता ॥१२६॥

तथा च —

अज्ञातप्रतिभूकर्ता, अज्ञातस्थानदो गृहे।
अज्ञातकुलसम्बन्धः, अज्ञातफलभक्षकः ॥१२७॥

ततः सम्प्रति कथमहं करोमि?, एकतः प्रतिज्ञा, अन्यतः कुयोगः; 'इतो व्याघ्रः, इतस्तटी' इति न्यायो जातः"। इति विचिन्त्य राजोचे — भो वामन! कन्यां विना देशं गजं तुरङ्गमं परमपि प्रकृष्टं वस्तु याचस्व।

अथ वामनो वदति — "राजन्! शृणु —

समुद्राः स्थितिमुज्झन्ति, चलन्ति कुलपर्वताः।
प्रलयेऽपि न मुञ्चन्ति महान्तोऽङ्गीकृतं व्रतम् ॥१२८॥

तथा —

अलसंतेहिं[1] वि हु सज्जणेहिं जे अक्खरा समुल्लविया।
ते पत्थरटंकुक्कीरिय[2] व्व न हु अन्नहा हुंति ॥१२९॥

इति जानन्नपि त्वं यदि प्रतिपन्नं न पालयसि तदा मम देशादिभिरप्यलम्"। ततो भूपतिर्दध्यौ — "अहो सङ्कटं जातम्, किमहं करोमि? अनेनापि युक्तमुक्तम्। यदुक्तम् —

राज्यं यातु, श्रियो [3]यान्तु, शरीरं यातु मे ध्रुवम्।
या मया स्वयमेवोक्ता वाचा मा यातु शाश्वती ॥१३०॥

---

1. अलसायमानैरपि खलु सज्जनैः ये अक्षराः समुल्लपिताः ते प्रस्तरटङ्कोत्कीर्णा इव न खलु अन्यथा भवन्ति॥ 2. '°टंकक्कोरिय व्व' प्रत्यन्तरे॥ 3. 'यान्तु, यान्तु प्राणा विनश्वराः। या' प्रत्यन्तरे॥

परं पुत्री राज्ञी प्रधानाद्या अपीमं सम्बन्धं नेच्छन्ति, किमहमेकः करोमि " । इत्यादि विमृश्य राजा तद्दिने वामनं कार्यान्तरव्यपदेशेन विससर्ज । तथा प्रत्यहं वामनयाच्ञायां भूपतिर्यथातथाकल्पितैरेवोत्तरैर्दिनानि गालयति ।

यदुक्तम् —

अशुभस्य कालहरणं, कालेन क्षीयतेऽशुभम् ।
चिन्तां मा कुरु हे तात ! कालः कालो भविष्यति ॥१३१॥

कालः सृजति भूतानि, कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः ॥१३२॥

क्षणेन लभ्यते यामो, यामेन लभ्यते दिनम् ।
दिनेन लभ्यते कालः, कालः कालो भविष्यति ॥१३३॥

दिवारात्रं तया चिन्तया दुःखातुरो दुर्बलोऽपि राजा जातः । यतः —

चिंता[1] डाइणि जिहां वसइ तीह अंग दृढ किमु थाइ ? ।
जउ धीरउ धीरिम करइ तउ अब्भितरि खाइ ॥१३४॥

[ केवलिकथितं जिनदत्तस्य वामनस्वरूपम् ]

इत्थं कियत्स्वपि दिनेषु गतेषु केवली तत्र पुरे समवासार्षीत् । तदा वनपालो महिपालं वर्द्धापयामास — देव ! तवोद्यानमद्य केवली स्वचरणन्यासैरलङ्करोति । इति श्रुत्वा हृष्टो राजा पारितोषिकं दत्त्वा नगरलोकसहितो वनं गत्वा विधिवद् गुरुं नत्वा यथोचितप्रदेशे निषण्णो देशनां शृणोति, यथा — " भो भव्याः ! भवे जीवानां ज्ञानमेव दुर्लभम्, विज्ञानं पशुष्वपि दृश्यते, यथा —

विज्ञानं किमु नोर्णनाभ-सुगृही-कोकासि-हंसादिषु,
युद्धं किं न लुलाप-लावककुले मेषे तथा कुर्कुटे ।
नृत्तं गीतकला च केकि-पिकयोर्वाक् सारिका-कीरयोः,
श्रीधर्माचरणे चिरं चतुरता यद्यस्ति मानुष्यके ॥१३५॥

तथा —

आहार-निद्रा-भय-मैथुनानि तुल्यानि सार्द्धं पशुभिनराणाम् ।
ज्ञानं नराणामधिको विशेषो, ज्ञानेन हीनाः पशवो मनुष्याः ॥१३६॥

1. चिन्ता डाकिनी यत्र वसति तत्र अङ्गं दृढं कथं स्यात् । यदि धीरो धीरत्वं करोति तर्हि अभ्यन्तरे खादति ॥

[1]तुल्ले वि उयरभरणे मूढ-अमूढाण पिच्छसु विवागं ।
एगाण नरयदुक्खं, अन्नेसिं सासयं सुक्खं ॥१३७॥"

इति श्रुत्वा देशनान्ते राजा पृच्छति — प्रभो ! मत्पुत्र्या को वरो भावी ? ततो ज्ञानी कथयति — वामन एवायमिति । राजोचे — भगवन् ! कथमनुचितोऽयं सम्बन्धो घटते ? केवल्याह — "राजन् ! उचित एवायं योगोऽस्ति । त्वमेनं वामनमात्रत्वेन माऽवज्ञासीः, यतो महासत्पुरुषोऽयम्, **वसन्तपुर**वास्तव्यकोटीध्वजव्यवहारि**जीवदेव**श्रेष्ठिपुत्रो **जिनदत्त**नामाऽयम्, तथा विद्याबलवानयं वामनो यदि चिन्तयति तर्हि त्वां सराज्यं सराष्ट्रमुन्मूलयति, किन्त्वेष विद्याविनोदमात्रं करोति"। इति ज्ञानिमुखान्निशम्य भूपः प्रमोदभरनिर्भरो जातः ।

ततः केवलिनं नत्वा स्वस्थानं गत्वा करौ योजयित्वा भूपतिर्वामनं प्रति जल्पति यथा — भो विद्यासिद्ध ! भो गुणवृद्ध ! भो जगत्प्रसिद्ध ! भो भाग्यसमृद्ध ! त्वं सर्वं कौतुकं मुक्त्वाऽस्मदादिप्रीत्यर्थं स्वरूपं प्रकटीकुरु, मत्पुत्रीं च स्वीकुरु, विमलश्रेष्ठिपुत्रीरपि निजपत्नीत्वेऽङ्गीकुरु, मायारूपं च संहर, तथाऽस्माकमुपरि प्रसादं कुरु । इति श्रुत्वाऽवसरं मत्वा निजं रूपं किञ्चित् कृष्णवर्णाच्छादितं कृत्वा राजादिप्रेरितः प्रथमं भार्यात्रयान्तिकं स वामनो गतः ।

**[ कृतस्वाभाविकस्वरूपस्य जिनदत्तस्य निजभार्यात्रयेण सह मेलापकः ]**

ततो राजा बभाषे — हे सुन्दर्यः ! सर्वे युष्मन्मनोरथाः सिद्धाः यदयं युष्मदीयो **जिनदत्तो** नाम पतिः समागतः, तदयं स्वस्वामी स्वीक्रियताम् । ततस्ता उत्फुल्ललोचनास्तमवलोक्य सप्रमोदा वदन्ति स्म — "स्वामिन् ! त्वं **जिनदत्त** एव, जनपरम्पराश्रुतकेवलिवाक्यप्रामाण्यतः, परं प्रसीद, निजं स्वाभाविकं रूपं प्रकटय, माऽस्मान् सत्त्वात् पातय, सत्त्वमध्ये सर्वमस्ति, यतः — पूर्वं श्रीविक्रमेण प्रहरचतुष्टयक्रमेण सर्वलक्ष्मी-गजाऽश्व-सत्त्वगमने ज्ञाते सत्त्वमेकं स्थापितम् । तद्वाक्यं यथा —

जाउ[2] लच्छि धणकणसहिय, अनइं मयगल मयमत्त ।
तरल तुरंगम जाउ सवि, तुं म म जाइसि सत्त ! ॥१३८॥

ततो वयमपि सत्त्वं प्राणात्ययेऽपि न मोक्ष्यामः, तदद्यापि नाथ ! त्वं कियत् खेदयिष्यसि ?" । इति करौ योजयित्वा ताभिर्विज्ञप्ते वामनेन सुवर्णवर्णे स्मरतुल्ये निजे रूपेऽदभ्राभ्रनिर्गत-

1. तुल्येऽपि उदरभरणे मूढ-अमूढानां पश्य विपाकम् । एकेषां नरकदुःखम्, अन्येषां शाश्वतं सुखम् ॥ 2. यातु लक्ष्मीः धनकणसहिता, अन्यच्च मदगलाः मदमत्ताः, तरलाः तुरंगमा यान्तु सर्वे; त्वं मा मा याहि सत्त्व ! ॥

शशिमण्डले इव प्रकटिते सर्वलोकानां प्रमोदो जातः। राजादयस्तु वदन्ति — "अहो ! किं कुमारस्य जितदेव-भूपं रूपम्, जितेन्द्रसौभाग्यं भाग्यं वा वर्ण्यते? अथ सदृशयोग-धन्यानां कन्यानां वाऽगण्यं पुण्यं वर्ण्यते?, यदुक्तम् —

सुकुलजन्म विभूतिरनेकधा, प्रियसमागमसौख्यपरम्परा ।
नृपकुले गुरुता विमलं यशो, भवति पुण्यतरोः फलमीप्सितम् ॥१३९॥

तथा पुरलोकोऽप्ययं धन्यः, येन सकलपुरुषकुलीनस्त्रीयोगोऽयमद्य दिष्टया दृष्टः, 'बहुजीवित-पार्श्वाद्दर्शनं वरम्' इति जनश्रुतिरप्यस्ति।" तदा सर्वैरपि निजदृष्टिसृष्टिः सफला मेने।

### [ निजपुत्रीमदनमञ्जरी-जिनदत्तपरिणयनपूर्वकं चम्पानगरीनृपस्य जिनदत्ताय निजराज्यसमर्पणं दीक्षाग्रहणं च ]

अथ राजा तदैव पट्टहस्तिनमानाय्य जिनदत्तमारोप्य पञ्चशब्देषु वाद्यमानेषु, गान्धर्विकैर्गीतेषु गायमानेषु, सधवाङ्गनाभिर्धवलमङ्गलेषु दीयमानेषु, बन्दिजनैश्छन्दःसु पठत्सु, महामहेन राजभवनं नीत्वा तदानीमाहूतैः पृष्टैश्च ज्योतिषिकैस्तत्काललग्ने प्रोक्ते मदनमञ्जर्या समं ततः समेतः, सामन्तकृतनवनवातुच्छमहोत्सवपूर्वं तं कुमारं पर्यणाययत्। करमोक्षावसरे तु दानोद्यतो राजा चिन्तयति — "असौ नररत्नं, अहं तु वृद्धो जातः वृद्धत्वे धर्म एवोचितः, यतः —

जउ[1] पूगी पंचास, पालि परत्तह बंधीइ ।
धन नइं भोगविलास, आस न कीजइ आसनी ॥१४०॥

ममायमाश्रमोऽपि धर्मोचितो जातः, यदुक्तम् —

प्रथमे नार्जितं विद्या, द्वितीये नार्जितं धनम् ।
तृतीये नार्जितो धर्मश्चतुर्थे किं करिष्यति? ॥१४१॥

अथ च गतोदके कः खलु सेतुबन्धः?, अथवा जन्तुर्नहि कदापि भोगैस्तृप्यति, यतः —

अम्बर[2] पवणि न पूरीइ, नवि सायर सलिलेण ।
अग्गि न तिप्पइ इंधणिहिं, तिम जीय विसयसुहेण ॥१४२॥

---

1. यतः पूरितानि पञ्चाशद् [वर्षाणि] [ततः] पालिः परलोकस्य बध्नीयात्। धनस्य च भोगविलासानां आशां न क्रियात् आसन्नाम्॥ 2. [यथा] अम्बरं पवनेन न पूर्यते, नापि सागरः सलिलेन; अग्निः न तृप्यते इन्धनैः, तथा जीवः विषयसुखेन॥

अन्यच्च —

धनेषु जीवितव्येषु, स्त्रीषु चाऽऽहारकर्मसु ।
अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ॥१४३॥

तथा —

[1]भुत्ता दिव्वा भोगा सुरेसु असुरेसु तह य मणुएसु ।
न हु जीव ! तुज्झ तित्ती जलणस्स व कट्ठनियरेहिं ॥१४४॥

अपरं च —

प्राप्ताः श्रियः सकलकामदुघास्ततः किं ?, दत्तं पदं शिरसि विद्विषतां ततः किं ? ।
सम्प्रीणिताः प्रणयिनो विभवैस्ततः किं ? कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ? ॥१४५॥

इत्थं न किञ्चिदपि साधनसाध्यजातं स्वप्नेन्द्रजालसदृशं परमार्थशून्यम् ।
अत्यन्तनिर्वृतिकरं यदपेतबाधं तद् ब्रह्म वाञ्छत जना यदि चेतनाऽस्ति ॥१४६॥

तथा मूढा एव विषयैर्मुह्यन्ति, न तु तत्त्वज्ञाः । यतः —

दधत तावदमी विषयाः सुखं स्फुरति यावदियं हृदि मूढता ।
मनसि तत्त्वविदां तु विचारके क्व विषयाः क्व सुखं क्व परिग्रहः ? ॥१४७॥

अन्यच्च मम पुत्रोऽपि राज्यधरो नास्ति, ततोऽमुष्मै पुरुषोत्तमाय मयाऽर्द्धराज्यमग्रेऽपि दत्तमस्ति, तस्मादस्यैव जामातुः सकलं राज्यं ददामि, अहं तु कृतकृत्यस्तपोवनं व्रजामि" । इति विचिन्त्य तस्मै **जिनदत्ताय** तस्मिन्नेव मुहूर्त्ते पट्टाभिषेकपूर्वं सर्वं राज्यं ददौ ।

स राजा सप्तक्षेत्राणि समाराध्य सर्वजनान् मुत्कलाप्य कृतकृत्यीभूय सद्गुरुश्री**गुणाकरसूरि**पार्श्वे प्रवव्राज ।

### [ जिनदत्तराज्यर्द्धिमुद्दिश्य लोकानां वर्णवादः ]

अथ **जिनदत्तो** राजा राजेव सद्वृत्तः सौम्यः कलावान् सदाचारोऽपि चित्रं न दोषाकरो न क्षयभाक् च राज्यं करोति तदा सर्वेऽपि पौरा वर्द्धापनमुद्दिश्य मुक्ताभृतस्थालैस्तं सभासीनं वर्द्धयन्ति । सीमाला महीपाला अपि ढौकनिकां पुरो मुक्त्वा प्रत्यहं सेवमानाः सन्ति । तस्योपरि श्वेतातपत्रं ध्रियते, तस्योभयतश्चामरधारिणीभिश्चन्द्ररुचिचामराणि चाल्यन्ते । षट्त्रिंशद्राजकुलैरहोरात्रं यः सेव्यते । प्रत्यहं पञ्चविधपात्राणि पुरतो नृत्यन्ति । एवं राज्यं कुर्वन्तं

1. भुक्ता दिव्या भोगाः सुरेषु असुरेषु तथा च मनुष्येषु, न खलु जीव! तव तृप्तिः ज्वलनस्य इव काष्ठनिकरैः ॥

तं दृष्ट्वा लोका इति वदन्ति — " अहो दृश्यतां धर्मलीलायितम्, यदि राज्यं क्रियते तदाऽमुना राज्ञेव क्रियते, अन्यथा सर्वसङ्गत्याग एवोचितः । यदुक्तम् —

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः,
पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यप्येवं कुरु भव रसास्वादने लम्पटत्वं,
नो चेच्चेतः ! प्रविश सहसा निर्विकल्पे समाधौ ॥१४८॥

तथा —

दु च्चिय[1] हुंति गईओ साहसवंताण धीरपुरिसाणं ।
विलूहलकमलहत्था रायसिरी अहव पव्वज्जा ॥१४९॥

तथा केचित् तत्त्वज्ञा वदन्ति — अहो धर्म एव क्रियतां यत्प्रभावेण निरुपमं निष्कण्टकं निष्कलङ्कं निरातङ्कं राज्यमेतस्य जातम् । अथवा —

किं[2] जंपिएण बहुणा ? जं जं दीसइ समग्गजियलोए ।
इंदिय-मणाभिरामं, तं तं धम्मप्फलं सव्वं ॥१५०॥

धर्माद् धनं धनत एव समस्तकामाः
कामेभ्य एव सुखमिन्द्रियजं समग्रम् ।
कार्यार्थिना हि खलु कारणमेषणीयं,
धर्मो विधेय इति तत्त्वविदो वदन्ति ॥१५१॥ "

[ निजपत्नीभिः सह विरहदुःखानुभववार्तायां जिनदत्तस्य कर्मोदयफलनिवेदकं वक्तव्यम् ]

एकदा सर्वप्रियाभिः सह रममाणस्य राज्ञः समीपे विमलमती-श्रीमती-विज्जाहरीभिः प्राक्तनो विरहावसरसत्कः सम्बन्धः पप्रच्छे यस्या यावान् यावानज्ञातः सम्बन्धोऽभूत् । तेनापि राज्ञा स्वयमज्ञातो निजप्रियापूर्ववृत्तान्तोऽपृच्छि । ततः परस्परं निजस्वरूपकथनेन किञ्चिच्चित्त-समाधिः कृतः । पुनस्ताभिः प्रियाभिरुक्तम् — " स्वामिन् ! एतावन्ति दिनानि बाढमस्मदीयं हृदयं दुःखभरप्रपूर्णमेवासीत्, यल्लोके तादृशः कोऽपि सज्जनो न दृश्यते यदग्रे तानि दुःखा-न्युक्त्वा स्तोकानि क्रियन्ते । यदुक्तम् —

1. द्वौ खलु भवतः गती साहसवतां धीरपुरुषाणाम् — कोमलकमलहस्ता राज्यश्रीः अथवा प्रव्रज्या ॥
2. किं जल्पितेन बहुना ? यद् यद् दृश्यते समग्रजीवलोके इन्द्रिय-मनोऽभिरामं तत् तद् धर्मफलं सर्वम् ॥

[1]सो को वि नत्थि सुयणो जस्स कहिज्जंति हिययदुक्खाइं ।
हिययाओ इंति कंठे, कंठाओ पुणो विलिज्जंति ॥१५२॥

तत् पुनर्हृदयं दुःखनिर्भरमपि यन्न स्फुटितं तन्निःश्वासस्य प्रमाणम् । यदुक्तम् —

[2]सव्वह दुक्खह उल्लीचणुं, जउ नीसास न हुंतु ।
हीउं रन्नतलाव जिम, फुट्टी दहदिसि जंतु ॥१५३॥

तथा बहु किमुच्यते ? नाथ ! अस्माभिर्युष्मद्विरहे बहुकालं वचनगोचरातीतं दुःखमनुभूतम् " । इति पुनः पुनस्ताभिरुक्ते शोकाश्रुजलार्द्रनयनो राजोवाच — हे प्रियाः ! कर्मणामियं वैचित्री, यदुक्तम् —

[3]राम किं मत्थइ जड वहइ पहिरी वक्कलवत्थ ? ।
विहि लिहावइ विहि लिहइं, को भंजिवा समत्थ ? ॥१५४॥

पुनः श्रूयताम् — "हे बालाः ! युष्माभिरपि क्वापि जन्मनि पशु-पक्षि-मनुष्यादीनां मत्सरेण भोगान्तरायकर्म कृतं भावि, अथवा कोऽपि मुनिसन्तापादिकर्मविशेषः कृतो भविष्यति तेनेदं दुःखं समुपस्थितम् । यतः —

[4]सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं ।
अवराहेसु गुणेसु य निमित्तमित्तं परो होइ ॥१५५॥

पुनर्यूयं पूर्वसतीकर्मविपाकं शृणुत, यथा —

[5]जिणि मुणिवइ संतावीया बार घडी इणि लोगि ।
दवदंती दुक्खइं सहिया वरसहं बार वियोगि ॥१५६॥

तथा —

[6]जोउ जगविख्यात, सीत सती जगि जाणीइ ।
मुक्की वनि विलवंत, कर्म करिउं इम माणीइ ॥१५७॥

---

1. स कोऽपि नास्ति सुजनः यस्य कथ्यन्ते हृदयदुःखानि, हृदयाद् यान्ति कण्ठे, कण्ठात् पुनर्विलीयन्ते ॥ 2. सर्वेषां दुःखानां उद्रेचनं यदि निश्वासाः नाभूवन् [तर्हि] हृदयं रण्यतडाक इव स्फुटित्वा दशदिक्षु अगमिष्यत् ॥ 3. रामः किं मस्तके जटां वहति परिधाय वल्कलवस्त्रम् ? । विधिः लिखापयति, विधिः लिखति, कः भङ्क्तुं समर्थः ? ॥ 4. सर्वः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम्, अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥ 5. यया मुनिपतिः सन्तापितः द्वादश घटयः अस्मिन् लोके [तया] दवदन्त्या दुःखानि सहितानि वर्षाणां द्वादश वियोगेन ॥ 6. पश्यथ, जगद्विख्याता सीता सती जगति = लोके ज्ञायते, मुक्ता वने विलपन्ती कर्म कृतं एवं भुज्यते ॥

तथा —

कर्मप्राधान्येनैव महर्षीणामपि महद्दुःखं जातम्, यथा —

[1]सणंकुमारपामुक्खा, चक्किणो वि सुसाहुणो ।
वेयणाओ कहं पत्ता ? न हुंतं जइ कम्मयं ॥१५८॥

[2]गयसुकुमालस्स सीसम्मि खायरंगारसंचयं ।
पक्खिवंतो कहं भट्टो ? न हुंतं जइ कम्मयं ॥१५९॥

[3]सुसीसा खंदगस्सावि पीलिज्जंता तहा कहं ।
जंतेण पालएणं ? न हुंतं जइ कम्मयं ॥१६०॥

[4]अंधत्तं बंभदत्तस्स सदेवस्सावि दुस्सहं ।
चक्किस्सावि कहं भूतं ? न हुंतं जइ कम्मयं ॥१६१॥

[5]मियापुत्ताइजीवाणं कुलीणाण वि तारिसं ।
महादुक्खं कहं भूतं ? न हुंतं जइ कम्मयं ॥१६२॥

इति ज्ञात्वाऽपि हे भद्राः ! यूयं शास्त्रज्ञाः कथं मुह्यथ ?, यदुक्तं शास्त्रे —

सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम् ।
सुखदुःखं हि जीवानां चक्रवत् परिवर्त्तते ॥१६३॥

दुःखे दुःखाधिकं पश्येत्, सुखे पश्येत् सुखाधिकम् ।
आत्मानं सुख-दुःखाभ्यां शत्रुभ्यामिव नार्पयेत् ॥१६४॥

इति विचिन्त्य युष्माभिः शोक-हर्षयोर्मनो नार्पणीयम्" । इत्युक्त्वा तासां सुखमुत्पाद्य भूपतिस्ताभिः समं सदा हृदानन्देन समयं गमयति । कदापि रूपाभिरामा रामा रमयति, कदापि राजपाट्यां विनोदेन सैन्यं भ्रमयति, कदापि रिपुवर्गं नमयति, कदापि धर्ममाश्रित्य निजं मनः शमयति, कदापि स वशी पञ्चेन्द्रियाश्वान् दमीव दमयति, एवं स राजा निष्कण्टकं राज्यं रचयति ।

---

1. सनत्कुमारप्रमुखाः चक्रिणोऽपि सुसाधवः वेदनाः कथं प्राप्ताः ? नाभवद् यदि कर्म ॥ 2. गजसुकुमालस्य शीर्षे खादिराङ्गारसञ्चयं प्रक्षिपन् कथं भट्टः ? नाभवद् यदि कर्म ॥ 3. सुशिष्याः स्कन्दकस्यापि पील्यमानाः तथा कथं यन्त्रेण पालकेन ? नाभवद् यदि कर्म ॥ 4. अन्धत्वं ब्रह्मदत्तस्य सदेवस्यापि दुःसहं चक्रिणोऽपि कथं भूतम् ? नाभवद् यदि कर्म ॥ 5. मृगापुत्रादिजीवानां कुलीनानामपि तादृशं महादुःखं कथं भूतम् ? नाभवद् यदि कर्म ॥

[जननी-जनकस्मरणाद् जिनदत्तस्य वसन्तपुरं प्रति प्रस्थानम्]

अन्यदा गवाक्षस्थः स्वस्थः पृथ्वीशो निजां राज्यस्थितिं विलोक्य चिन्तयति — यद् मम गजा-ऽश्व-कोश-कोष्ठागार-परिवार-जनपद-दास-कर्मकरादीनां पारो नास्ति, यदन्यदप्यश्ववार-हस्त्यारोहपारो नास्ति, मन्त्रिसामन्तादिपारो नास्ति; रथ-पत्तीनामपि पारो नास्ति, सुखस्यापि पारो नास्ति, यदन्यदपि किमपि संसारे सारं स्यात् तन्मम सर्वमपारं विद्यते, संसारे यन्नास्ति तन्ममापि नास्ति। पुनः राजा विमृशति — ननु किञ्चिदद्यापि ममापि न्यूनमस्ति। इति पुनःपुनरूहापोहं कुर्वतो राज्ञो माता-पितरौ स्मृतिमागतौ। तदा शोकसागरमग्नो राजा चिन्तयति — "हहा! हतदैवेन मुषितोऽस्मि यदनेन मम माता-पित्रोर्वियोगः कृतः, तदहो मम यदि पितरौ न स्तस्तर्हि किमस्ति?, न किञ्चिदपीत्यर्थः, अहो यद्यद्य तौ पितरौ भवतस्तदा तयोः कियत् सुखमुत्पद्यते?, तथा ममेदं प्राज्यं राज्यं धिगस्तु यदिदं माता-पित्रादिस्वजना न पश्यन्ति न भुञ्जन्ति च। यदुक्तम् —

प्रभूतेनापि किं तेनोपार्जितेन धनेन भो!।
येनात्मीयमनुष्याणां संविभागो न विद्यते ॥१६५॥

तथा —

पात्रे त्यागी, गुणे रागी, भोगी परिजनैः सह।
शास्त्रे बोद्धा, रणे योद्धा, पुरुषः पञ्चलक्षणः ॥१६६॥

तथा —

धम्म[1] न संचीय तव न तवीय, सयण न पूरी आस।
ईमइ जणणिकिलेस किय गब्भट्ठिय नवमास ॥१६७॥

तथा पूर्वं या मम मातेति विमृशति स्म 'यदहं मत्पुत्रं संसारसुखेन विलसन्तं कदा विलोकयिष्यामि?' इति सा मद्वियोगे कथं कुर्वन्ती भविष्यति?, तथा मातुरुपकाराणां संसारे न कोऽप्यनृणः स्यात्, या गर्भवासादारभ्य क्लेशसहस्रं सहे। यदुक्तम् —

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा,
नैरुच्येऽपि च लङ्घनं, मलमयी शय्या च संवत्सरम्।
एकस्यापि न गर्भवासदिवसक्लेशस्य यस्याः क्षमो
दातुं निष्क्रयमुद्यतोऽपि तनयस्तस्यै जनन्यै नमः ॥१६८॥

---

1. [येन] धर्मो न सञ्चितः, तपो न तप्तम्, स्वजनानां न पूरिता आशाः, [तेन] निरर्थकं जननीक्लेशः कृतो गर्भस्थितेन नवमासान् ॥

अस्मिन् जगति महत्यपि न किमपि तद्वस्तु वेधसा विहितम् ।
अनिमित्तवत्सलाया भवति यतो मातुरुपकारः ॥१६९॥"

इति विचिन्त्य मातापित्रादिस्वजनवर्गमिलनोत्कण्ठितो नृपो वसन्तपुरगमनेच्छया सेनानीमाकार्य सत्वरमादिशति स्म, यथा — भो दण्डाधिप ! सर्वदेशविजयाय सैन्यं सज्जयेति ।

अथ दलपतिना शस्त्रा-ऽम्बारी-प्रक्षरबन्धुराः सिन्धुराः कृताः, वेगजितकुरङ्गा अपि दृष्टिदत्तरङ्गास्तुरङ्गा हेमपर्याणवल्गादिभूषिताङ्गाः कृताः, रथा ध्वजपताकालङ्कृताः कृताः, मुखमार्गितं ग्रासमर्पयित्वा दण्डायुधजरद्-टोप-रंगाउलि-जीणसालप्रमुखं च दत्त्वा पदातयः संवाहिताः, निस्वाने च घातः चालितः तदा तदाकारिताः समस्तसामन्ता मेलापके मिलिताः ।

अथ कटकबन्धं विधाय दिग्विजयाय पट्टहस्तिनमारुह्य पौरस्त्रीकृतमङ्गलो भूपालश्चचाल । 'अस्मिन् पुरे राज्ञि सति किमिहानेन' इति खे तदा रजसाऽऽच्छादितः सूरः, तथा चतुरङ्गसैन्यस्य किल ब्रह्माण्डं स्फुटतीति शङ्काकारी निर्घोषो जायमानोऽस्ति, तत्सैन्यभराक्रान्ता पृथ्वी चकम्पे, गिरयः खडहडिताः, जलधयश्छलछलिताः, 'कोऽयं साधनसमुद्रो याति ?' इति शेषोऽपि शशङ्के । तथा —

हास्तिका-ऽश्वीय-माहिष्य-कौक्षकौष्टकसङ्कुलम् ।
जनस्तच्चक्रमालोक्य मेने मिलितवज्जगत् ॥१७०॥

युद्धश्राद्धतया योधाः, पारवश्येन सेवकाः ।
रसिकाः प्रेक्षकत्वेन, लुण्टाका लुण्टनेच्छया ॥१७१॥

निर्धनाः कर्मकत्वेन, भट्टा द्रव्यादिलिप्सया ।
वाणिजा व्यवहारेण, भूपसैन्ये समैयरुः ॥१७२॥

अथ राजा मार्गे सर्वलोकानां धीरां[1] ददानोऽस्ति, वदति च — "यूयं निश्चिन्ताः सुखेन तिष्ठत, लघुलोकानां किमप्यहं न कथयामि, यो मदोन्मत्तो ममाज्ञां न मन्यते तदुपरि खड्गं वहामि । यदुक्तम् —

आज्ञाभङ्गो नरेन्द्राणां, गुरूणां मानमर्दनम् ।
वृत्तिच्छेदो मनुष्याणां, अशस्त्रो वध उच्यते ॥१७३॥

यदहं रङ्कप्रायैः पाद्रिकैः सामान्यठक्कुरैश्च किञ्चिन्मदान्धैरपि समं न युध्ये, यतो वैरं स्नेहश्च समशीर्षिकया भवति । यदुक्तम् —

---

1. धैर्यमित्यर्थः ॥

यद्यपि रटति सरोषं मृगपतिपुरतोऽपि मत्तगोमायुः ।
तदपि न कुप्यति सिंहो, विसदृशपुरुषेषु कः कोपः ? ॥१७४॥

तथा —

सिंहः करोति विक्रममलिकुलझङ्कारसूचिते करिणि ।
न पुनर्नखमुखविलिखितभूतलविवरस्थिते नकुले ॥१७५॥ ”

तथा ग्रामग्रामाणामुपदाः समायान्ति, स्थाने स्थाने यमुनापूर इव तस्य सैन्यं वर्धते, देशे देशे राजानो राणका मण्डलिकाश्च सम्मुखमागत्य तस्य मिलन्ति । किं बहुना ? तत्पूर्वपुण्याकृष्टाः सर्वमहीमहीपालास्तच्चरणाम्बुजं पर्युपासमाना निरभिमाना राज्यश्रीराजमानाः शौर्यासमाना अपि तदाज्ञां नित्यं मन्यन्ते स्म । अहो ! पुण्येन सर्वत्र जयो वाञ्छितसिद्धिश्च स्यात् । यदुक्तम् —

सर्वत्राऽऽज्ञा भवति जगति, भ्राजमाना गजाली,
तुङ्गा भोगाः, पवनजयिनो वाजिनः, स्यन्दनाश्च ।
दर्पाध्माताः सुभटनिकराः, कोशलक्ष्मीः समग्रा,
सर्वं चैतद् भवति नियतं देहिनां धर्मयोगात् ॥१७६॥

तथा —

धर्मनरेसर[1] भेटीइ, चिंता नावइ अंगि ।
जं जोइइ तं संपजइ लीलामाहि जि रंगि ॥१७७॥

**[ जिनदत्तसैन्यभीतवसन्तपुरनृपारिमर्दनप्रेषितढौकनादेर्जिनदत्तकृतो निषेधः जिनदत्तकृताया सपत्निकजीवदेवश्रेष्ठिसमर्पणाज्ञाया अरिमर्दननृपस्याननुपालनं च ]**

इत्थं सर्वदेशान् साधयित्वा **वसन्तपुरस्य** सीम्नि राज्ञः कटकं समायातं तदा **अरिमर्दनराजस्य** केनापि प्रोक्तम् — देव ! परराष्ट्रीयराज्ञः सैन्यमसङ्ख्यं सर्वदेशसाधनपरमिहायातम् । ततो राज्ञा विमृष्टम् — “ योधनाद् बोधनं वरम् । यतः —

पुष्पैरपि न योद्धव्यं, किं पुनर्निशितैः शरैः ।
युद्धे विजयसन्देहः, प्रधानपुरुषक्षयः ॥१७८॥

तथा —

[2]विण अवसरि जे मांडिइ झूझ, राजउलुं त्रोडइ ति अबूझ ।
माल पडिया घाऊ टीपणइ, धूंबड नाम सहू कोइ भणइ ॥१७९॥ ”

---

1. धर्मनरेश्वरे मिलिते चिन्ता नाऽऽयाति अङ्गे, यद् अपेक्ष्यते तत् संपत्स्यते लीलया एव रङ्गेन ॥
2. विना अवसरं यः आरभते युद्धं राजकुलं त्रोटयति स अबुधः । (?)

इति विमृश्य राज्ञा प्रधाना आदिष्टाः — "भो महत्तमा ! यूयं गत्वा राज्ञः पुरो ढौकनिकां मुक्त्वा यथाकथञ्चित् सन्धिं कुरुध्वम्, अनेन बलवता राज्ञा सह विरोधो न कार्यः, यतः —

अनुचितकर्मारम्भः, स्वजनविरोधो बलीयसा स्पर्द्धा ।
प्रमदाजनविश्वासो, मृत्योर्द्वाराणि चत्वारि ॥१८०॥

तथा भो प्रधानाः ! एते बहवो वयं तु स्तोकाः, मेलापकाभावात्; बहुभिस्तु वैरं शास्त्रविरुद्धम्, यतः —

बहवो न विरोद्धव्याः, समवायो हि दुर्जयः ।
स्फुरन्तमपि नागेन्द्रं, भक्षयन्ति पिपीलिकाः ॥१८१॥"

ततस्ते प्रधाना दूतत्वे गता मणि-सुवर्णादि ढौकयित्वा राजानं विज्ञपयन्ति — हे महाराज ! त्वं दण्डं गृहाण, ततः पश्चाद् व्रज, अस्माकं राज्ञा तवाऽऽज्ञा शिरसि शेषावद् धृताऽस्ति । इति प्रोक्ते जिनदत्तो भूपतिर्वदति — भो प्रधानाः ! नास्माकं ढौकनिकया सार्कं दण्डेन कार्यम्, किन्तु नगरमुख्यं जीवदेवश्रेष्ठिनं सकलत्रं बद्ध्वाऽर्पयत यदि जीवितुमिच्छाऽस्ति; अन्यथा युद्धाय प्रगुणीभवत, इति स्वरूपं यूयं भवत्स्वामिनं विज्ञपयत । ततस्तैः प्रधानैः पश्चादागत्य ढौकनिकां पुरो मुक्त्वा तथा विज्ञप्ते, राजा ब्रूते — भो प्रधानाः ! श्रेष्ठी कथमर्प्यते ? यतो भूभुजां कोशो द्विधा — स्थावरो जङ्गमश्च, तत्र स्थावरो हेमादि, जङ्गमो महाजनः; ततो व्यवहारिणोऽमी शाश्वतमुख्यकोशसमानाः, यतः —

पित्रा स्वपुत्रा इव पालनीयाः, प्रजा नरेन्द्रेण कृपापरेण ।
किञ्चित्क्षयः स्वर्णमयः सकोशः, प्रजामयस्त्वक्षय एव यस्मात् ॥१८२॥

अतो भो प्रधानाः ! यूयं गत्वा राजान विज्ञपयत — राजन् ! अपरं यथारुचि सर्वं याचस्व, परं श्रेष्ठिनं प्राणान्तेऽपि नास्मन्नाथोऽर्पयति, एवं सति यदुचितं तत् कुरु" । इत्यादि शिक्षयित्वा प्रधानाः पुनः प्रेषिताः । तै राजान्तिके गत्वा निजस्वामिप्रोक्तसर्ववृत्तान्ते विज्ञप्ते किञ्चित्सरोषो भूपतिः प्रधानानवगणय्य पुरः प्रयाणं कृत्वा दुर्गं रुरोध, तदा सर्वा नगरप्रतोल्यो दत्ताः । समुद्रवेष्टितद्वीपोपमपरचक्रव्याप्तं स्वपुरं दृष्ट्वा सर्वो लोको व्याकुलो जातः, विशेषतो जीवदेवश्रेष्ठी ज्ञातवृत्तान्तः स्तोकजलपूतरवत् टलवलायते ।

तस्मिन्नवसरे प्रधाना आहूय राज्ञा पृष्टाः — भो मन्त्रिणः ! नगरं तावद् वेष्टितम्, ततः कथयत सम्प्रति किं कर्तुमुचितम् ? तदा केनापि प्रोक्तम्, यथा —

"त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥१८३॥

इति नीतिशास्त्रप्रामाण्याद् देव! श्रेष्ठी दीयते, यथा सर्वं कुल-ग्राम-जनपदादि सुस्थं स्याद्"। इति श्रुते राजाऽवोचत्—"भो प्रधान! नैतद् वचो मह्यं रोचते, यतः पृथिव्यास्त एवालङ्कारभूता ये शरणागतं रक्षन्ति। यदुक्तम्—

विहलं[1] जो अवलंबइ, आवइपडियं च जो समुद्धरइ ।
सरणागयं च रक्खइ, तिसु तेसु अलंकिया पुहवी ॥१८४॥

तथा भो प्रधान! ते प्रजापाला अपि नृपास्तृणतुल्या भवन्ति, ये निजाश्रितं न पालयन्ति, यतः—

[2]अवलंबिया तिणा न हु तुट्टंति समुद्धरेज्ज ता विहलं ।
विहलुद्धरणे जे न हु य तिणसमा ते उ किं भणिमो ॥१८५॥

पुनर्धर्मशास्त्रोक्तो दृष्टान्तो श्रूयताम्—

यथा षोडशजिनेन्द्रेण दशमे मेघरथभवे पक्षिमात्रकपोतार्थे स्वजीवितं कल्पितं स दक्षमुख्योऽपि स्वात्मनाशेऽपि धर्ममार्गं न लुलोप। अत एवोक्तम्—

श्रीशान्तिनाथादपरो न दानी, दशार्णभद्रादपरो न मानी ।
श्रीस्थूलभद्रादपरो न योगी, श्रीशालिभद्रादपरो न भोगी ॥१८६॥

अतो वणिग्मात्रत्वादेकजीवमात्रत्वादप्ययं श्रेष्ठी मया नोपेक्षितुं शक्यते! भो सकर्ण! पुनराकर्णय—राजचिह्नविचारेणापि सत्तमोऽयं पाल्यो भवति, यदुक्तम्—

सदवनमसदनुशासनमाश्रितभरणं च राजचिह्नानि ।
अभिषेकपट्टबन्धौ वालव्यजनं व्रणस्यापि ॥१८७॥

भो प्राज्ञ! पुनः श्रूयताम् 'हे वत्स! त्वया निजाः प्रजाः प्रजा इव प्रत्यहं पालनीयाः' इति पितुर्वचनं पट्टाभिषेकावसरे श्रुत्वा 'सर्वं युष्मदुक्तं करिष्यामि' इति मया यत् प्रतिज्ञातमासीत् तस्य प्रतिपन्नस्य नाशे सति भोः प्रधान! वद ममकिमप्यवतिष्ठते?, यदुक्तम्—

---

1. व्याकुलं यः अवलम्बते, आपत्पतितं च यः समुद्धरति, शरणागतं च रक्षति, त्रिभिः तैः अलङ्कृता पृथिवी। अत्र तृतीयार्थे सप्तमी ज्ञेया॥ 2. अवलम्बितानि तृणानि न खलु त्रुट्यन्ते, समुद्धरेत् तस्माद् व्याकुलम्। व्याकुलोद्धरणे ये न खलु च तृणसमाः ते तु, किं भणामः॥

एतत् करोमीति कृतप्रतिज्ञो, यः स्वीकृतं नैव करोति सत्त्वः ।
यात्यस्य संस्पर्शजकश्मलानां, प्रक्षालनायेव रविः पयोधिम् ॥१८८॥

तथा —

भस्मनाऽपि तृणेनापि काऽपि सञ्जायते क्रिया ।
प्रतिज्ञातार्थनिर्वाहच्युतेन न तु जन्तुना ॥१८९॥

तथा —

किमिह कपाल-कमण्डलु-वल्कल-सित-रक्तपट-जटापटलैः ? ।
व्रतमिदमुज्ज्वलमुन्नतमनसां प्रतिपन्ननिर्वहणम् ॥१९०॥

अन्यच्च —

कृशानुसेवा फल-कन्दवर्तनं, जटाधरत्वं वनवासिनां व्रतम् ।
महीपतिनामिदमेव तु व्रतं यदात्मसत्यात् प्रलयेऽपि न च्युतिः ॥१९१॥

अथ कश्चिद् वृद्धो मन्त्री ब्रूते — "हे राजन् ! एवमेकान्तत्वविधानेन जडनाम लभ्यते, स्वामिन् ! सर्वत्र सुन्दरभाव एव शोभते, तथा क्वापि स्कन्धे बद्ध्वा नाऽऽकृष्यते, अतिमथिते कालकूटमुत्पद्यते । अत एवोक्तम् —

अतिरूपेण वै सीता, अतिदर्पेण रावणः ।
अतिदानाद् बलिर्बद्धो, अति सर्वत्र वर्जयेत् ॥१९२॥

हे देव! यद्येवं स्वाग्रहं न मोक्ष्यसे तदा तव मरणं राज्यनाशश्च सम्भाव्यते, ततो हे दीर्घबुद्धे! त्वं श्रेष्ठिनमर्पय" ।

अथ राजा प्राह — "यदीत्थं मरणं स्यात् तदा किं विलोक्यते ?, मरणात् किं भयम् ?, परं महाजनपरिभवो दुःसहः, अस्माभिस्तु व्यापृतं जग्धं पीतं दत्तं विलसितम्, अथ यदा तदा यथा तथा मर्तव्यमेव । यदुक्तम् —

धीरेण कातरेणापि मर्तव्यं खलु देहिना ।
तन्म्रियेत तथा धीमान् न म्रियेत यथा पुनः ॥१९३॥

हे मन्त्रिन् ! राज्यतृष्णाऽपि साम्प्रतं नास्माकं विद्यते, चिरमपि राज्यं यतः कृतम्, ततोऽस्माकं कीर्तिरेव सम्प्रति सुस्थिरा विलोक्यते ।

यदुक्तम् —

याता यान्ति महीभुजः क्षितिमिमां यास्यन्ति भुक्त्वाऽखिलां,
नो याता न च याति यास्यति न वा केनापि सार्द्धं धरा ।
यत् किञ्चिद् भुवि तद् विनाशि सकलं कीर्तिः परं स्थायिनी,
मत्वैवं वसुधाधिपैः सुकृतिनो रक्ष्याः क्षितौ कीर्तये ॥१९४॥"

पुनः कोऽपि प्रधानः प्राह — हे असमसाहसनिधान! त्वं विचारय, तव परलोकगमनात् पश्चादपि श्रेष्ठी वैरिणाऽनेन गृहीष्यते, तदुभयथाऽपि श्रेष्ठिनो मरणं समायतं तदाऽस्यार्थे त्वं वृथैव कथं म्रियसे?। ततो राजा प्राह — "भो हितबुद्धे मन्त्रिन्! दृष्टया कथमेवं द्रष्टुं शक्यते? लोकोक्तिरप्येवमस्ति यद् मृतस्योपरि यान्तु शकटानि परं जीवन्तो धीरपुरुषाः प्राणान्ते न्यायमार्गान्न चलन्ति । यदुक्तम् —

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥१९५॥

भो मन्त्रिन्! अतः सर्वथा श्रेष्ठिनं नार्पयामि, यद् भाव्यं तद् भवतु, सर्वोऽपि धर्मध्यानं करोतु, केनापि मम चिन्ता न कार्या । यतः —

काकाः कृष्णाः शुका नीला हंसाश्च धवलीकृताः ।
मयूराश्चित्रिता येन, स मे चिन्तां करिष्यति ॥१९६॥

तथा —

[1]मा वहउ को वि चिंतं, चिंतयरो को वि अत्थि अन्नयरो ।
चिंतारहिएणं पत्थरेण देवत्तणं पत्तं ॥१९७॥"

इत्याद्युक्त्वा सर्वं प्रधानाद्यं विबोध्य निवार्य च स्वयं कर्मप्रामाण्यं कृत्वा राजा धर्मैकशरणस्तस्थौ । एवं सप्त दिनानि सञ्जितानि ।

[ निजनृप-नगरादिसंरक्षणार्थं सपत्नीकस्य जीवदेवश्रेष्ठिनो जिनदत्तसमक्षमात्मसमर्पणम् ]

ततः कैश्चिन्महार्तैः पुररोधभग्नैर्लोकैः श्रेष्ठी भणितः — "भो श्रेष्ठिन्! तवैकस्य कृते सम्प्रति सर्वं नगरं भज्यते, पश्चाद्देशभङ्गोऽपि सम्भाव्यते, राजा तु पुण्यात्मा त्वां नार्पयति,

1. मा वहतु कोऽपि चिन्ताम्, चिन्ताकरः कोऽपि अस्ति अन्यतरः । चिन्तारहितेन प्रस्तरेण देवत्वं प्राप्तम् ॥

त्वं स्वयमेव निःसृत्य गच्छ, अन्यथा बहुजीवक्षये तव किं जीवितं शाश्वतं भावि ?, यदुक्तम् —

[1]एक्कस्स कए नियजीवियस्स बहुयाओ जीवकोडीओ ।
दुक्खे ठवंति जे के, तेसिं किं सासयं जीयं ? ॥१९८॥"

इत्यादि श्रुत्वा श्रेष्ठिनाऽचिन्ति — "यदि मम शरीरेण बहूनां जीवितरक्षा स्यात् तदा किं न लब्धम् ? यदुक्तम् —

अस्मिन्नसारे संसारे विनाशेऽवश्यभाविनि ।
पुण्यभाजां भवत्येव परार्थे जीवितव्ययः ।

तथा —

परोपकाराय कृतघ्नमेतच्चलं शरीरं यदि याति यातु ।
काचे न चेद् वज्रमणिं लभेत, मूर्खोऽपि किं नेति पुनर्ब्रवीति ? ॥२००॥

तथा लोकाक्रोशा अपि कर्णाभ्यां श्रोतुं न शक्यन्ते, मदर्थे यदि पुरभङ्गापयशो जने जातं तदहं जीवन्नपि मृतोऽस्मि । यदुक्तम् —

जीवितव्यं यशः पुंसां, जीवितव्यं न जीवितम् ।
तदेव हि गतं यस्य, जीवन्नपि न जीवति ॥२०१॥"

इति विचिन्त्य श्रेष्ठिन्या सहितः श्रेष्ठी सर्वजनान् क्षमयित्वा पाश्चात्यरात्रौ दुर्गमुलङ्घ्य बहिर्निर्गतः । स श्रेष्ठी कटकमुखं गच्छन्नपि धीरत्वोचितमिति चिन्तयति, यथा —

"माता यदि विषं दद्यात्, पिता विक्रयते सुतम् ।
राजा हरति सर्वस्वं, का तत्र प्रतिवेदना ? ॥२०२॥

तावद् भयस्य भेतव्यं यावद् भयमनागतम् ।
आगते तु भयं दृष्ट्वा, प्रसोढव्यमशङ्कितैः ॥२०३॥"

ततः कटकमध्ये यत्र गुरूदरे जिनदत्तराजोऽस्ति तस्य द्वारे गत्वा 'राज्ञो ममाऽऽगमं विज्ञपय' इति श्रेष्ठी दौवारिकमभिहितवान् । तदा द्वाःस्थो दध्यौ — "किमस्य जिनदत्तराजस्य सर्वे राजानो राणका निष्ठिताः यदनेन दुर्देशालयेन श्रेष्ठिना सहास्य राज्ञः कार्यमस्ति, किमस्य पार्श्वाद् राजा गृहीष्यति ? मयैवं ज्ञातमभूत् — यदर्थेन नरपतिर्दीयमानं दण्डमपि न जग्राह

1. एकस्य कृते निजजीवितस्य बह्व्यः जीवकोट्यः दुःखे स्थापयन्ति ये केचित् तेषां किं शाश्वतं जीवितव्यम् ? ॥

स श्रेष्ठी बहुसुवर्णरत्नकोटिपतिर्भावी, असौ तु यूकाकोटीश्वर एव, परमेकेन लक्षणेन षट्खण्डाधिपचक्रवर्तितोऽप्यधिकोऽयं दृश्यते — यदयं जीर्णवस्त्रमाश्रित्य शतखण्डाधिपतिरस्ति; अहो! विचक्षणेनापि राज्ञा किमर्थमसौ प्रार्थितः ?, भूपतिः किमस्य पार्श्वे पश्यन्नस्ति ?, यदि वालुकामध्ये तैलम्, यदि जलमध्ये घृतम्, यदि शुष्ककाष्ठमध्ये सरसत्वं स्यात्, तदाऽस्य पार्श्वे द्रव्यमस्ति; यस्माद्धनवान् पुमान् पृथगेव विलोक्यते। यदुक्तम् —

[1]अगुणमवि गुणड्ढं रूवहीणं पि रम्मं,
जडमवि मइमंतं मंदसत्तं पि सूरं।
अकुलमवि कुलीणं तं पयंपंति लोया,
वरकमलदलच्छी जं पलोएइ लच्छी ॥२०४॥

तथापि स्वदोषापनोदाय राजानं विज्ञपयामि।" इति विचिन्त्य राजान्तिके गत्वा द्वाःस्थः श्रेष्ठ्यागममुवाच। ततो राजा किञ्चिद् विमृश्य बभाषे — भो द्वाःस्थ! त्वं गत्वा पृच्छेति 'अहो श्रेष्ठिन्! त्वं सपत्नीकः स्वयमागतः ? राज्ञा वा प्रहितः ?'। इति श्रुत्वा द्वाःस्थोऽपि द्वारे गत्वा श्रेष्ठिनं सम्यक् पृष्ट्वा तत्स्वरूपं च ज्ञात्वा पुनः पश्चादागत्याऽभिदधे — राजन्! श्रेष्ठी स्वयमेवागतः, न तु राज्ञा प्रहितः। इति श्रुत्वा हृष्टो राजाऽचिन्तयत् — "अहो सज्जना ईदृशा भवन्ति। यदुक्तम् —

अजातशत्रुर्जगदेकमित्रं, कुटुम्बवृद्धिर्नगरे समग्रे।
स्वभावतोऽत्युज्ज्वलचित्तवृत्तिः, परं च धर्मे विहितप्रवृत्तिः ॥२०५॥

सहसिद्धमिदं महतां धनेष्वनास्था गुणेषु बहुमानः।
परदुःखे कातरता, महच्च धैर्यं स्वदुःखेषु ॥२०६॥

तथा —

भाराय दिग्भूधरसिन्धुरास्ते, धाता क्व वाताशन एष शेषः।
विश्वम्भरां भूरिभरां बिभर्ति, परोपकारी पुनरेक एव ॥२०७॥"

इति विचिन्त्य राज्ञा दूता भाषिताः — यूयं गत्वा श्रेष्ठिनमानयत। इति राजादेशेनाऽऽगत्य तैरुक्तम् — रे श्रेष्ठिन्! भवन्तं भूपतिराकारयतीति। रेकारशब्दं श्रुत्वा श्रेष्ठी चित्ते चकम्पे चिन्तितवांश्च — "अरे! किमत्र भावि ?, राजा तु रौद्र एव स्यात्, न ज्ञायते किमपि करिष्यति, रुष्टो हि राजा किमपि न त्यजति, यदुक्तम् —

1. अगुणमपि गुणाढ्यम्, रूपहीनमपि रम्यम्, जडमपि मतिमन्तम्, मन्दसत्त्वमपि शूरम्, अकुलमपि कुलीनम्, तं प्रजल्पन्ति लोकाः वरकमलदलाक्षी यं प्रलोकयति लक्ष्मीः ॥

न दशति मन्त्रज्ञमहिर्हीनकलं त्यजति राहुरपि चन्द्रम् ।
सरसं न दहति दहनो, नृपस्तु कुपितोऽखिलं हन्ति ॥२०८॥ ”

ततः कम्पमानाङ्गो दीनास्यः शून्यचित्तस्तत्कालगतसर्ववित्त इव गतजीविताशः सपत्नीकः श्रेष्ठी दूतैर्जलमयीभूतकर-चरणोऽग्रे गृह्यमानोऽपि पश्चाद्रुच्छन्निव शनैःशनैर्गतिर्बलादाकृष्य पार्थिवाग्रे दूरस्थित एवोर्ध्वीकृतः । ततः श्रेष्ठी चक्राधिपसमां तत्सभां निरीक्ष्य चिन्तयति — “किमियमामरी सभा ?, योऽयं राजा दृश्यते स किं देवः ?, किं वा धर्मराजोऽयम् ? यदसौ राजा तुष्टस्तदा राज्यं दत्ते, यदि रुष्टस्तदा सर्वस्वं जीवितं च नियमेन गृह्णाति, यदेते राणका दृश्यन्ते ते दिक्पाला लोकपाला वा घटन्ते, यावदमी पश्चात्स्थितस्य ममान्तरे वर्तन्ते तावन्मयाऽपि किञ्चिज्जीविताशा कार्या, यतो ये मध्यस्थास्ते पालयन्त्येव, अथवा किमनया चिन्तया ?, यद् भाव्यं तद् भविष्यति ” । इति चिन्तयन्नयं स्थितोऽस्ति ।

[ जिनदत्त-तज्जननी-जनकमेलापकस्य विस्तरतो वर्णनम् ]

तदा पुरन्दरसभातुल्यां निजसभामध्यासीनश्छत्र-चामरादिविभूतिमान् भूपतिर्दुःस्थावस्था-पतितौ जराजीर्णौ जीर्णशीर्णवस्त्रौ गलिताङ्गौ गलन्नयनौ निर्नाथाविव गतशरणौ निजमाता-पितरौ दृष्ट्वा खेदं गतश्चिन्तयति — “ ही ! धिग् धिग् मम राज्यम्, मामपि धिगस्तु, किं तेन पुत्रेण ? यत्पितरावेवं रुलतः । यतः —

किं तेन जातु जातेन, पृथिवीभारकारिणा ? ।
आस्तामन्यस्य पित्रोरप्याशा पूरयते न यः ॥२०९॥
स पुत्रो यः पितुर्मातुर्भूरिभक्तिसुधारसैः ।
निर्वापयति सन्तापं, शेषस्तु कृमिकीटकः ॥२१०॥
वरं वृक्षोऽपि सिक्तोऽसौ, यस्य विश्रम्यते तले ।
सचेतनोऽपि नो पुत्रो यः पित्रोः क्लेशकारकः ॥२११॥ ”

तयोर्दुर्दशां दृष्ट्वाऽन्तर्महाशोकातुरो भूत्वा पुनर्बहिरात्मानं सन्धीर्य पृथ्वीपतिरग्रतः पितरौ पुनराकार्य पृच्छति — भो श्रेष्ठिन् ! यूयं महान्तो व्यवहारिणः पूर्वं श्रुताः, सम्प्रति भवतां महावस्था दृश्यते, तत् किं राज्ञा यूयं दण्डिताः ?, तस्करैर्मुषिता वा ?, वह्निना दग्धसर्व-स्वा वा ?, सम्प्रति यूयं किमीदृशाः ? कारणं वदत ।

अथ श्रेष्ठी वेपमानः सगद्गदमिदं वदति — हे देव ! मम पार्थिवादिभिः किञ्चिन्न कृतम्, किन्तु प्रतिकूलदैवेन दण्डितोऽहम् । राज्ञोक्तम् — दैवेन केन द्वारेण प्रातिकूल्यं

कृतम् ? श्रेष्ठ्याह — "श्रृणु स्वामिन् ! मम पुत्र एकः सविवेकः सद्भाग्यातिरेकः सत्कृत्यच्छेकोऽभूत्, स दुर्दैवेन हृतः, यस्मात् स पुत्रः केनाऽपि कारणेन निर्गत्य विदेशं गतः, सर्वत्र विलोकितोऽपि न लब्धः, ततो न जाने सम्प्रति जीवति मृतोऽस्ति वा, तस्मिन् गते सर्वा लक्ष्मीर्गता, दारिद्र्यं समुपस्थितम्, तस्यैकस्य भाग्येन सर्वं सुखभागभूत्, परं रङ्कस्य गृहे रत्नं न तिष्ठति। ततो देव ! तद्दुःखेनाहमतीवदुःखी जातोऽस्मि"। ततो राज्ञोक्तम् — भो सत्तम ! यद्येवमस्ति पुत्रः क्वापि गतस्तर्हि मम सैन्यं विदेशायातं महत्तरं च विद्यते ततो भ्रान्त्वा त्वं सर्वं सैन्यं विलोकय, कदाचिदिहैव काकतालीय-न्यायेन पुत्रः स्यात्। ततो हृष्टेन श्रेष्ठिना 'स्वाम्यादेशः प्रमाणम्' इत्युक्ते राज्ञा सार्थे निजजनाः समर्पिताः। ततो बहिर्निर्गतस्य श्रेष्ठिनो जीविताशा किञ्चित् सञ्जाता। यदुक्तम् —

क्षणेन लभ्यते यामो, यामेन लभ्यते दिनम्।
दिनेन लभ्यते कालः, कालः कालो भविष्यति ॥२१२॥

तथैवमस्ति, "घांचटलितं योजनशतं याति"। इति तेन स्वस्थीभूय सप्तभिर्दिनैर्महाप्रमाणं सर्वं कटकं विलोक्य पुनर्भूपतेरग्रे समेत्य सपत्नीकः श्रेष्ठी स्थितः। ततः 'भो श्रेष्ठिन् ! अग्रतः समागच्छ, अग्रतः समागच्छ' इति राज्ञो बहुभिरादेशैः पुरः पुरो द्वित्राणि द्वित्राणि पदानि व्रजन्नात्मभयेन पश्चाद्गन्तुकामोऽपि श्रेष्ठी भूपतेरदूरासन्नां भूमिमाययौ। बहवः सभास्था राजराणका अग्रगमनेन तेनोल्लङ्घिताः। तथापि पुनः पुरस्समागमार्थं राजादेशे सति श्रेष्ठिमनः शङ्कते — "यद्राज्ञो बहुतरं बहुमानं तदपमानतुल्यम्। यदुक्तम् —

हसन्नपि नृपो हन्ति, जिघ्रन्नपि भुजङ्गमः।
दुर्बलस्य गृहं हस्ती, घर्षयन्नपि पातयेत् ॥२१६॥"

तथापि किञ्चिदग्रे गतस्य श्रेष्ठिनः पुरो राजा वक्ति — भो श्रेष्ठिन् ! भवता कटकमध्ये बम्भ्रमता सता सुतः क्वापि प्रापि, न वा ? इति पृष्टे श्रेष्ठिना 'न' इति प्रोक्ते पुनर्नरपतिर्गदति — भो सुन्दरमते ! निजं पुत्रं दृष्टं लक्षयसि, न वा ? इति साभिप्रायं भाषमाणे नृपे किञ्चिदक्षोभतया श्रेष्ठी स्पष्टमाचष्ट — "महाराज ! त्वया किमुच्यते ?, संसारे कोऽपि मूढोऽपि स्वकीयमङ्गजं नोपलक्षयति ?, परं वृद्धत्वान्मां किं दृष्टिबलहीनं सम्भावयसि ? न तथा त्वया सम्भाव्यम्, यस्मादहं पुत्रवदननिरीक्षणे सहस्राक्षोऽस्मि, तं दृष्टमात्रं लक्षयाम्येव, परं तस्य कदापि कापि पदप्रतिष्ठा स्याद् अथवा रूपपरावर्त्तो वेषपरावर्त्तो वा जातः स्यात् तदा स तनयो न लक्ष्यते।"

अत्रान्तरे श्रेष्ठिन्या हृदयमुल्लसितम्, कपोलद्वयं विकसितम्, नयनयुगलं विमलं जातम्, स्तनयोः प्रस्रवो जातः। तथा सा श्रेष्ठिनी महानन्दमग्ना विकल्पानेवं विधत्ते यथा — "किमहं सुधाकुण्डे स्नामि ?, सुधां वा पिबामि ?, कल्याणकोटिं रत्नकोटिं वा प्राप्ताऽस्मि ? स्वर्गं वा गताऽस्मि ?, राज्यं वा भुञ्जानाऽस्मि ?, नात्मानं जानामि, परमेवं जाने 'अद्य अहो ! किमपि मम महाभाग्यं जागर्ति, अद्य मम कोऽपि महोत्सवः पर्वदिवसो वा वर्त्तते' सम्प्रति यादृशं मम सुखं वर्त्तते तादृशं नात्रभवे मयाऽनुभूतम्, अतोऽयं राजाऽस्य परस्य वा भवस्य बन्धुरो बन्धुर्वा सुन्दरः सोदरो वा सदाशानिवासदिग्गजो ममाङ्गजो वा भवत्येव, किमन्यथा नयनादिविकाशः स्यात् ?। यदुक्तम् —

[1]आयह लोयह लोयणइं जाईसरइं, न भंति।
अप्पिय दिट्ठे मउलीइं, पिय दिट्ठे विहसंति ॥२१४॥"

एवं सुचिरं विचिन्त्य श्रेष्ठिन्या कराङ्गुलीसङ्केतं कृत्वा श्रेष्ठी बभणे — हे कान्त ! एष किल स्वकीयः पुत्रोऽस्ति। इति कथिते मन्दं मन्दं श्रेष्ठ्याचष्ट — "हा वैरिणि ! न्यग्मुखा तिष्ठ, मा ब्रूहि, रे अचेतने ! किं भाषमाणाऽसि ? त्वं मानुषमसि किं वा पशुरसि ? वचनं विचार्य वक्तव्यम्। यतः —

[2]काज परीछी जे करइ, बोलइ वयण विमासि।
तेह नर ऋद्धि घरअंगणइं, संकट नावइ पासि ॥२१५॥

तथा क्वचिज्जल्पितादजल्पितं वरम्। यदुक्तम् —

जिह्वादोषेण बध्यन्ते, शुक-तित्तिरि-शारिकाः।
बकास्ते न हि बध्यन्ते, मौनं सर्वार्थसाधकम् ॥२१६॥

तथा —

जिह्वाग्रे वर्त्तते लक्ष्मीर्जिह्वाग्रे च सरस्वती।
जिह्वाग्रे बन्धनं मृत्युर्जिह्वाग्रे परमं पदम् ॥२१७॥

तथा —

असम्भाव्यं न वक्तव्यं, दशहस्ता हरीतकी।

---

1. आत्मनः लोकानां लोचनानि जातिस्मरणानि, [अत्र विषये] न भ्रान्तिः, अप्रिये दृष्टे मुकुलयन्ति, प्रिये दृष्टे विकसन्ति ॥ 2. कार्यं परीक्ष्य ये कुर्वन्ति, वदन्ति वचनं विमृश्य तेषां नराणां ऋद्धिः गृहाङ्गने, सङ्कटं नायाति पार्श्वे ॥

तथा न्यायेनेति लोकोक्तिः यत् 'स्त्रीणां पार्ष्णिबुद्धिः'। अत एव सत्यं शास्त्रेऽप्युक्तम्—

[1]धित्तेसि गाम-नयराणं जेसिं इत्थी पणायगा।
ते यावि धिक्कया पुरिसा जे इत्थीण वसंगया ॥२१८॥

रे मुग्धे! मम किञ्चिज्जातां जीविताशां मा स्फेटय, यत् त्वयाऽनुचितमुक्तं तदुक्तम्, पुनरतः परं मा स्म भाषिष्ठाः, माऽस्मान् शिरसि करं दत्वा मज्जय, यतस्त्वं स्त्री भूत्वा गमिष्यसि, सर्वं विरूपमस्माकं मस्तके पतिष्यति"। इति श्रुत्वा श्रेष्ठिनी प्राह—हे आर्यपुत्राः! यूयं यथारुचि भाषध्वम्, परं स्वपुत्रोऽयं भवति—इति मम मतिरित्थं सम्भावयति, प्राणनाथ! यदा यदा भूमिनाथमेनं पश्यामि तदा तदा निजेङ्गिताकारलक्षणैर्मच्चित्ते पुत्रोऽयमिति कल्पना जायते, स्वामिन्! कथय किमहं करोमि?। इति श्रुत्वा श्रेष्ठी निरुत्तरस्तूष्णीं स्थितः।

अस्मिन्नन्तरे माता-पित्रोर्मिथो वाक्यं किञ्चित् कर्णाभ्यां सन्निहितो भूत्वा श्रुत्वा भूनाथश्चिन्तयति—"यन्मम माता मां पुत्रं स्थापयति, भयातुरः पिता तु न मन्यते, अहो! मातुर्मन ईदृशमेव स्नेहार्द्रं स्यात्, यदुक्तम्—

सुधा-मधु-विधुज्योत्स्ना-मृद्वीका-शर्करादितः।
वेधसा सारमुद्धृत्य जनितं जननीमनः ॥२१९॥

तथा धिगस्तु मां यद्यापि स्नेहलां मातरमेवं खेदयन्नस्मि, परं सर्वत्र क्रम एवौचितीमञ्चति, न तु सहसाकारः, यदुक्तम्—

क्रमेण भूमिः सलिलेन भिद्यते, क्रमेण कार्यं विनयेन सिध्यति।
क्रमेण शत्रुः कपटेन हन्यते, क्रमेण मोक्षः सुकृतेन लभ्यते ॥२२०॥

ततः क्रमेणैव स्वं प्रकटं करिष्यामि"। इति विचिन्त्य जनकं पृच्छति—हे श्रेष्ठिन्! सम्यक् कथय, कथं चिरसङ्गतं स्वसुतं त्वं ज्ञास्यसि? श्रेष्ठी साभिप्रायमिति श्रुत्वा ब्रूते—यदि सुतो यथावस्थितो भवति तदा दृष्टमात्रं तं वेद्मि, अन्यथा सङ्केतवचोभिर्लक्षयामि। इत्युक्ते राजा ब्रूते—भो श्रेष्ठिन्! स तव पुत्रो न भवति यः पूर्वं परिणीतोऽपि साधु-सेवां न मुमोच, यः सर्वकुटुम्बादिशिक्षया संसारसुखप्रवृत्तिं न चकार, तथा येनैकदा द्यूतक्रीडायां रमित्वैकादश कोट्यो हारिताः स तव पुत्रो न भवति? इति श्रुत्वा श्रेष्ठी चिन्तयति—"कथमयं राजराजेश्वरो मम पुत्रसत्कानि सङ्केतवचनानि वेत्ति?, तस्य तु गृहान्निर्गतस्य दिनान्यपि विस्मृतानि, तथाऽमीभिः वचोभिरयं पुत्रो भवति, श्रेष्ठिन्यपि स्वेङ्गितैरेव पुत्रमेनं

1. धिक् तेभ्यो ग्राम-नगरेभ्यो येषां स्त्री प्रणायिका, ते चापि धिक्कृताः पुरुषाः ये स्त्रीणां वशङ्गताः॥

मन्यते, मयापि स्वचित्तं 'सदृशमानुषाणि बहून्यपि भवन्ति' इति विचिन्त्य पुत्राशङ्कां कुर्वाणां सन्निनिवारितम्, तदयं पुत्रो भवति इति ममापि मतिर्वर्तते, परमासमुद्रान्तपृथ्वीपतिं प्रति सम्प्रति 'त्वं मम पुत्रः' इति केन सहसा वक्तुं शक्यते?, अविमृश्यकारित्वे दुःखमेव स्यात्। यतः—

[1]सहस च्चिय सम्ममचिंतिऊण कीरंति जाइं कज्जाइं।
अप्पत्थभोयणं पिव ताइं विरामे दुहावंति ॥२२१॥

तथा—

[2]अपरिक्खिऊण कज्जं सिद्धं पि न सज्जणा पसंसंति।
सुपरिक्खियं पुणो विहडियं पि न जणेइ वयणिज्जं ॥२२२॥

ततोऽहमपि सहसा वदन् पश्चात्तापभाजनं भविष्यामि"। इति विचिन्त्य श्रेष्ठी मुनिरिव मौनावलम्बी तिष्ठति। ततः 'नन्वहो श्रेष्ठिन्! अस्या मत्सभाया मध्ये कोऽपि तव पुत्राकृतिरस्ति?' इति भूपतिपृष्टः श्रेष्ठी कष्टनिर्गच्छज्जिह्वाक्षरं त्रुटिताक्षरं सगद्गदं जगाद— राजेन्द्र! वक्तुं न शक्यते, परं स मत्पुत्रस्त्वदाकृतिरेवाऽऽसीत्, त्वं न दृष्टः, किल स एव दृष्टः, यत्तव तस्य चाऽऽकृत्या प्रकृत्या च नान्तरं दृश्यते। इति श्रेष्ठिनि वदति—हे तात! हे मातः! युष्मत्पुत्रोऽहम्, युष्माभिः सत्यमेव ज्ञातम्—इति श्रुते तयोर्यत्सुखमभूत् तत् तौ पितरौ जानीतः, केवली वा, नान्यः कोऽपि।

[जननी-जनक-जिनदत्तानां परस्परवृत्तान्तनिवेदको वार्तालापः]

अथ भूपः सानन्दं सभक्तिकं पितरौ विज्ञपयति—"हे पूज्याः! शास्त्रे सुपुत्राः कुलदीपकाः कथ्यन्ते, मया तु पित्रोर्दुःखान्धकारमेव कृतम्; तथा स्ववंशे मुक्तासमा एके पुत्राः स्युः, अहं पुनर्घुण इवाऽभवम्; किं बहुना? अद्य यावदहं पित्रोः क्लेशकार्येव जातः तत्सर्वं पूज्यैः क्षम्यताम्; इदं चम्पाराज्यमियं लक्ष्मीरयं परिच्छदादिपदार्थश्च सर्वमपि पूज्यसत्कमेव, न मे किञ्चन, युष्मत्पदप्रसादप्राप्तत्वात्; तथैताश्चतस्रोऽपि कुलवध्व इतः पक्षे पूज्यपादान् नमस्यन्ति, अथाऽऽसां यथोचितमादेशो दीयताम्"। इति वदन्तं पुत्रं सम्यगुपलक्ष्य पितृभ्यां गाढमालिङ्ग्योचे—"हे वत्स! यत् त्वमस्मान् स्वदोषग्रहणपूर्वकं क्षमयसि तत्तव विनीतस्य

1. सहसा खलु सम्यग् अचिन्त्य = अविचार्य क्रियन्ते यानि कार्याणि अपथ्यभोजनमिव तानि विरामे दुःखायन्ते ॥ 2. अपरीक्ष्य [कृतं] कार्यं सिद्धं अपि न सज्जनाः प्रशंसन्ति, सुपरीक्षितं पुनर्विघटितं अपि न जनयति वचनीयताम् ॥

युक्तम्, परं त्वयि न कोऽपि दोषोऽस्ति, यथा सुवर्णे श्यामता न स्यात्; परमस्माकमेव दोषोऽयम्, यत् त्वं पुण्यं कुर्वन् निवारितः, हे वत्स! यदस्माकं वृद्धभावेन मतिविपर्यासो जातो द्यूतकारैः सह तव सङ्गतिविधापनात्, तर्हि सहसैकदोषेण किमस्मान् त्वं मुञ्चसि स्म? परं द्यूतकारबुद्ध्या तवाऽऽयतिसुखं वाञ्छद्भिरस्माभिस्तत् कृतं लोके यदुच्यते यथा —

पितृभिस्ताडितः पुत्रः, शिष्यस्तु गुरुशिक्षितः ।
घनाहतं सुवर्णं च, जायते जनमण्डनम् ॥२२३॥

तथा हे वत्स! महते राज्यलाभाय तव देशान्तरोऽप्यभूत्, त्वद्वियोगेनास्माकमेवमवस्था जाता।

अथवाऽलमुपालम्भैः, शुभायाखिलमप्यभूत् ।
ईदृक् स्वपुत्रमाहात्म्यं, पश्यामः कथमन्यथा? ॥२२४॥

हे जिनदत्तराज! तदद्यापि मम भाग्यानि जाग्रति यदद्यानभ्रवृष्टिवदकुसुमफलवत् त्वं दृष्टोऽसि। अथ वत्स! त्वं विधिना चिरं राज्यं पालय, त्वं राजलक्ष्म्या युतो वर्षकोटिमस्मदाशीर्भिर्जीव, चिरं नन्द, अजातशत्रुर्भव, सुखी भव"।

ततो भूपतिः सर्वेषां शुद्धिं पृच्छति — "हे तात! पुरेऽत्र स्वजनैः सह सर्वोऽपि श्रीसङ्घः कुशली वर्तते?, तथा सर्वाणि चैत्यानि पूज्यमानानि सन्ति? अज्ञानतिमिरान्धस्य मम ज्ञानाञ्जनशलाकया यैर्नेत्रमुन्मीलितं ते श्रीगुरवोऽत्र विजयिनः सन्ति?, तथा मम धर्मसुहृदः सर्वेऽपि सुखिनः सन्ति?, तथा यानि पुस्तकानि नित्यमहं वाचयामास तानि सर्वाणि निरुपद्रवाणि सन्ति?" इति पृष्टे श्रेष्ठिना 'सर्वं निराबाधमस्ति' इत्युक्ते हृष्टो राजा दध्यौ — मम महद् भाग्यं यदहं जिनेन्द्रानर्चित्वा, बन्धु-मित्राणां सङ्गमं कृत्वा, स्वगुरून् वन्दित्वा, पुस्तकान् गृहीत्वा पश्चाच्चम्पां गमिष्यामि।

पुना राजोचे — हे पितरौ! युवाभ्यां मम विरहे कथं कालः क्षपितः? ताभ्यां भणितम् — "शृणु वत्स! त्वयि श्वशुरालयात् परिच्छदमुखेन गते ज्ञाते सति पूर्वं गणकाः सर्वेऽलीकवादिनः कृताः, नैमित्तिका अपि मुग्धलोकवञ्चनबुद्धयः कृताः, निर्णीतदिने तवानागमनाद् गौडदेशीया अपि स्वोदरपूरणवृत्तयो विहिताः, देवतादीनामुपयाचितपूजादिमाननरूपेण वाङ्मात्रेण चिन्तामणितुल्यं सम्यक्त्वमपि मलिनीकृतम्, ततः सर्वत्र प्रतिपुरं प्रतिग्रामं प्रतिवनं प्रतिपर्वतं त्वच्छोधनाय जनाः प्रेषिताः, चम्पापुरीपुरमिदं च सर्वमामूलं शोधितम्, परं क्वापि कदापि तव शुद्धिरपि नाऽऽप्ता, ततो बाढशोकातुराभ्यामावाभ्यां मुक्तकण्ठं तथा रुदितं

यथाऽऽक्रोशोद्गततरुशिखरवर्त्तिनः पक्षिप्रकरा अपि रुरुदुः, किं पुनर्मानवाः ?, वत्स ! त्वद्विरहे यदि दिनं गतं तदा रात्रिर्न याता, क्षणेन दिनायितम्, दिनेन वर्षायितम्, वर्षेण युगान्तायितम्, वत्स ! तव वियोगे यदावयोर्दुःखमभूत्, तद् वैरिणोऽपि मा भूत्, बहु किमुच्यते अथ ? यावद् यद् दुःखं जातं तन्नैकया जिह्वया वक्तुं शक्यते"। इति श्रुत्वा नरपतिराह —
"हे तात ! हे मातः ! नहि भवितव्यता केनापि लङ्घयितुं शक्यते, यतः —

सा सा सम्पद्यते बुद्धिः सा मतिः सा च भावना ।
सहायास्तादृशा ज्ञेया यादृशी भवितव्यता ॥२२५॥

[1]मिसि विण माथामांहि अक्षरडा जे विहि लिखिया ।
तेहह भांजणहार कोइ न देखउं साचिला ॥२२६॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे,
वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं,
नाभाव्यं भवतीह कर्मवशतो, भाव्यस्य नाशः कुतः ? ॥२२७॥

न स प्रकारः कोऽप्यस्ति येन सा भवितव्यता ।
छायेव निजदेहस्य लङ्घ्यते जातु जन्तुभिः ॥२२८॥

अवश्यम्भाविभावानां, प्रतीकारो भवेद् यदि ।
न ते दुःखेन बाध्यन्ते नल-राम-युधिष्ठिराः ॥२२९॥

दाता बलिर्याचयिता च विष्णुर्दानं मही वाजिमखस्य कालः ।
दातुः फलं बन्धनमेव जातं, नमोऽस्तु तस्यै भवितव्यतायै ॥२३०॥

गगनं विपुलं तुरङ्गमाः सततं गन्धवहातिशायिनः ।
रविरेति तथाप्यरेर्मुखं, नहि नाशोऽस्ति कृतस्य कर्मणः ॥२३१॥

इति ज्ञात्वा हे पितरौ युवाभ्यां पूर्वानुभूतस्य दुःखस्य जलाञ्जलिर्देया"।

ततो मातापितृभ्यां पुनः प्रोक्तम् — "हे वत्स ! अस्माकं दुःखं तदैव गतं यदा तव दर्शनं जातम्, परं 'सकृदिष्टसङ्गमः पूर्वदुःखतालकोद्घाटनकुञ्चिका' इति तानि दुःखानि सम्प्रति स्मृतिमायान्ति, तथा हे वत्स ! त्वमेतावन्तं कालं क्व स्थितः ?, केषु केषु देशेषु भ्रान्तः ?, कथं च त्वया राज्यं लब्धम् ?, इत्यादि सर्वं वृत्तान्तं कथय"।

---

1. मषीं विना मस्तके अक्षरा ये विधिना लिखिताः तेषां भञ्जयितारं कमपि न पश्यामि सत्यकम् ॥

ततो यथा द्यूतरूपकुकर्माचरणेन त्रपा जाता, यथा श्वसुरकुलं गतः, यथा तत्र प्रियां हित्वा **दशपुरं** गतः, तत्र यथाऽशीतिकोट्यधिपो भूतः, यथा **सिंहलद्वीपं** गतः, तत्र यथा सर्पं निगृह्य **श्रीमती** परिणीता, यथा **ओदत्त**व्यवहारिणा समुद्रमध्ये क्षिप्तः, यथा **रत्नपुर्यां विज्जाहरी** परिणीता, यथा षोडशविद्यादिलाभो जातः, यथा **चम्पा**यामागत्य वामनत्वं कृतम्, यथा शिला हासिता, यथा तिस्रः प्रिया आलापिताः, यथा हस्ती वशीकृतः, यथा **मदनमञ्जरी** लब्धा, यथा चम्पाराज्यं प्राप्तम्, यथा मातृ-पितृमिलनोत्कण्ठया **वसन्तपुरा**गमनं जातम्, तथा **जिनदत्त**राजः सर्वं पित्रोः पुरोऽचीकथत् ।

पुनः पितरावुचतुः — "अहो! लोकोक्तिरेषा न मृषा कदाचित् यत् पुरुषस्य भाग्यानामन्तो नास्ति, तथा केनाऽप्येवं सत्यमुक्तम् यथा —

गन्तव्यं नगरशतं, विज्ञानशतानि शिक्षितव्यानि ।
भूपतिशतं च सेव्यं, स्थानान्तरितानि भाग्यानि ॥२३२॥"

अथ श्रेष्ठी श्रेष्ठिनीं प्रति जल्पति — "हे भद्रे! त्वं पूर्वमकथयेः यदावयोरेकः पुत्रो विद्यमानोऽप्यविद्यमान एव, यथैकं लोचनमिति तदयुक्तम्, यत् तवैकस्यापि पुत्रस्य जगज्जन-चित्तहरं सर्वलोकचित्रकरं भाग्यं विलोकय, भाग्यवानेकोऽपि भवतु, पुण्यहीनैर्बहुभिः किम्?, यतः —

एकोऽपि यः सकलकार्यविधौ समर्थः
पुण्याधिको भवति किं बहुभिः प्रहीणैः? ।
चन्द्रः प्रकाशयति दिङ्मुखमण्डलानि,
तारागणः समुदितोऽप्यसमर्थ एव ॥२३३॥

एकेनाऽपि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥२३४॥"

तदा लोकाः सर्वे विस्मिता एवं वदन्ति — "अहो! अपूर्वमिदमाश्चर्यम्, यदेतौ दुःस्थावप्यस्य राजराजस्य पितरौ जातौ, अहो! विधिविलसितेन यन्न चिन्त्यते तद् भवति, अहो! धन्योऽयं श्रेष्ठी यस्य पुत्रोऽयं नभसीव रविर्महीतले तपति, अहो! पुत्र एव सकलं कुलं दीपयति, यदुक्तम् —

शर्वरीदीपकश्चन्द्रः, प्रभाते रविदीपकः ।
त्रैलोक्ये दीपको धर्मः, सुपुत्रः कुलदीपकः ॥२३५॥

तथाऽहो! अद्यास्य श्रेष्ठिनो वंशो गर्जतीव, कुलं कलां कलयतीव, पुण्यश्रीर्नृत्यतीव, पूर्वजाः सर्वेऽपि जीवन्तीव अमुना सुपुत्रेण "। तथा चैके स्त्रीजना स्वजात्यभिमानात् श्रेष्ठिनीं वर्णयन्ति, यथा — "अहो! अस्याः स्त्रियाः कुक्षिर्धन्या यया निर्मलमीदृशं पुत्ररत्नं जनितम्, यदुक्तम् —

येन केनचन धर्मकर्मणा, भूतलेऽत्र सुलभा विभूतयः ।
दुर्लभानि सुकृतानि तानि यैः प्राप्यते पुरुषरत्नमीदृशम् ॥२३६॥

तथा जगत्येषैव स्त्री धन्या मान्या, न चान्या, यदुक्तम् —

धन्यैव सा जगति सज्जननी प्रकृष्टा दृष्टा यया सविनयं तनयस्य भक्तिः ।
श्लाध्यः स सूनुरपि मातृपदे प्रणम्य यः सर्वतीर्थफलमेकपदे प्रपेदे ॥२३७॥

अस्या अपि तीर्थस्येव सेवा स्वपुत्रेण क्रियते, अन्या मातरः पुत्रस्य दुर्वचनाक्रोशं सहमाना दृश्यन्ते, ततः स्वजातावुत्कृष्टा श्रेष्ठिनी वर्ण्यते "।

अथापादमस्तकं नर-नारीयोग्यानि यान्याभरणानि स्युः तानि सर्वाण्यपि जनान् प्रेष्य कोशाधिकारिपार्श्वात् समानाय्य तैरलङ्कारै राज्ञा माता-पितरावलङ्कृतौ, दुकूलानि परिधापितौ च। ततो नृप उवाच — "हे पूज्याः! राज्यमिदमङ्गीक्रियतां यदिदं युष्माकं ढौकनीये करोमि, यत् पुत्रार्जिता लक्ष्मीः पित्रोर्युज्यते, विपरीतमिदं तु न घटते, यद् वृद्धत्वे धनमुपार्ज्य पितरौ पुत्र एव पालयति नान्यः, अत एवोक्तम् —

[1]बालस्स मायमरणं, भज्जामरणं च जुव्वणत्थस्स ।
वुड्ढस्स पुत्तमरणं, तिन्नि वि गुरुयाइं दुक्खाइं ॥२३८॥

सुपुत्राः सर्वमुपार्जितं तातस्यैव करेऽर्पयन्ति, अतो युक्तमिदम्, राज्यं तातपादा गृह्णन्तु "। ततः पितरावूचतुः — वत्स! आवां वृद्धौ जातौ, वृद्धत्वे धर्म एवोचितः धर्मश्च सर्वसङ्गपरित्यागादेवोत्कृष्टः, ततो वयं संयमं ग्रहीष्यामः, नास्माकं राज्यमुचितम्, यतो 'गौरी मरिष्यति किं वा दुग्धं करिष्यति?' ततोऽस्माकं सम्प्रति संयमावसरोऽस्ति, हे वत्स! त्वं विधिसृष्टानुसारेण निजाः प्रजाः पालय।

ततः श्रीजिनदत्तराजोऽपि पित्रोर्विरहसूचकं वचः श्रुत्वा सदैन्यं जगाद — "हे तात! मया गतभवे किं दुष्कृतम् कृतम्,

1. बालस्य मातृमरणम्, भार्यामरणं च यौवनस्थस्य, वृद्धस्य पुत्रमरणम्, त्रीण्यपि गुरुकाणि दुःखानि ॥

यदेतावन्ति मे तावद् दिनानि विफलान्ययुः ।
दूरेण गुरुपादानां तदद्य यदि कर्मणा ॥२३९॥

दत्तेऽन्तरे मया तातो दृष्टस्तत् तेन किं पुनः ।
वर्षारविखिवाऽभ्रेण ममादृष्टीकरिष्यति ? ॥२४०॥

पुनर्नैव समादेश्यमश्रोतव्यमिदं वचः ।
कस्यापि दिवसो मा गात् सतः पूज्यानपश्यतः ॥२४१॥

तात ! किं तेन राज्येन ? जीवितेन दिनोदये ।
प्रसन्नं नेक्ष्यते यत्र पितुः पादाम्बुजद्वयम् ॥२४२॥

पितुः पुरो निषण्णस्य या शोभा जायते भुवि ।
उच्चैः सिंहासनस्थस्य, तच्छतांशोऽपि सा कुतः ? ॥२४३॥

यः कोऽपि परमास्वादो गुरुभक्त्युत्थिते भवेत् ।
दिव्यपाकेऽपि मिष्टान्नरसवत्या न तं लभे ॥२४४॥

या प्रीतिर्लभमानस्य गुरोरादेशमुज्ज्वलम् ।
भुवनत्रयलाभेऽपि न सा भवति निश्चितम् ॥२४५॥

ताताऽऽदेशय यत् कृत्यं सेवाहेवाकिनो मम ।
चिरान्नेत्रपथायातः सम्पूरय मनोरथान् ॥२४६॥

इति पुत्रवचोनीरसिक्तमोहतरुः क्षणम् ।
श्रेष्ठी सश्रेष्ठिनीकोऽप्यमानयत् तद्वचस्तदा ॥२४७॥

[ ज्ञातवृत्तान्तस्यारिमर्दननृपस्य जिनदत्तेन सह मिलनं परस्परं वार्तालापश्च ]

अत्रान्तरे वर्द्धापका अरिमर्दनभूपतिं प्रति चलिताः सन्ति, तदा स राजा मनसीति शोचन्नस्ति, यथा — हहा ! सपत्नीकः श्रेष्ठी स्वयं निर्गत्य वैरिकटके कथं प्रयातः ?, महदपयशोऽस्माकं कुलेऽद्य नवीनमुत्पन्नम्, लाञ्छनरूपा अवश्यमनेन कृष्णकम्बली मम शिरसि समारूढा, न ज्ञायते तत्र कटके किं जायते ?, अद्य तत्रगतस्य श्रेष्ठिनोऽष्टौ दिवसाः सञ्जाताः, इतः कोऽपि तत्र न याति, ततः कोऽपि न प्रत्यायाति, मिथो वैरित्वात् किञ्चिदपि श्रेष्ठिसमाचारो न ज्ञायते, किं करोमि ?, कस्येदं दुःखं कथयामि ?, मृतस्योपरि यान्तु शकटानि, परं परमेश्वर ! त्वं कस्यापि जीवतः पुंसः स्वकीयमनुष्यान्तं मा स्म दर्शय, हा पापिष्ठ !

निकृष्ट! निर्लज्ज! निर्लक्षण! रे दुष्टात्मन्! त्वं शतशः खण्डानि द्रुतं भव, यदेवं निजाश्रितजनान्तं पश्यन्नपि त्वं राज्यादिवाञ्छां विधत्से?। इत्यादिध्यायन्तं नृपं प्रति वर्द्धापनिकाग्राहका नरास्त्वरितमागत्य जगदुः — हे देव! महत्कल्याणमद्य वर्तते, मा विषीद, सर्वेषां कुशलं जातम्। राजाप्यूचे — कथम्? इति। तेऽप्यूचुः — यः श्रेष्ठी परकटके गतः स पिता, श्रेष्ठिनी माता सञ्जाता, यो राजा जिनदत्तः स पुत्रः, इत्थं कुटुम्बं मिलितम्। राजा वक्ति — असम्भाव्यम्, नैव घटते, युष्माकं कश्चिदिह विपर्यासो जातो भावी। तेऽप्याहुः — "देव! विपर्यासस्तेषां भवति, येऽत्र नेत्र-श्रोत्रविकलाः स्युः सर्वथा हृदयशून्या वा भवन्ति। अथ परमुखश्रुतग्राहिणो भवन्ति, ते विपर्यस्यन्ति। हे देव! न तु वयं तादृशाः स्म यदस्माभिः प्रत्यक्षमेव दृष्टम्, दृष्टेः कोऽपि साक्षी न भवति, एतावदलीकं सामान्यजनाग्रतोऽपि वक्तुं न शक्यते, किं पुनर्देवस्य पुरतः? तथा राजन्! अस्माभिर्वृद्धवचनं श्रुतमस्ति, यथा —

[1]मा होह सुयग्गाही, मा जंपह जं न दिट्ठ पच्चक्खं।
पच्चक्खे वि य दिट्ठे जुत्ताजुत्तं वियाणाह ॥२४८॥"

पुनः पुनः कटकायातैर्वर्द्धापकैस्तथैव स्वरूपं जगदे। ततो हृष्टेन राज्ञा तत् सत्यं मानितम्। ततो राजा दध्यौ — "अहो! ते पातकिनो मूर्खा एव ये न्यायमार्गं त्यजन्ति, ये च न्यायं पुरस्कृत्य व्यवहरन्ति ते धन्या एव, यदुक्तम् —

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥२४९॥

श्रियो नाशं यान्तु व्रजतु निधनं गोत्रमखिलं,
शिरश्छेदो वाऽस्तु प्रभवतु समन्ताद् विपदपि।
विवेकार्कज्योतिर्विघटितमहामोहतमसः,
प्रतिज्ञातादर्थात् तदपि न चलन्त्येव सुधियः ॥२५०॥

यदि च नाहं धर्माचारं लुलोप तदा ममापयशोऽपि नाऽभूत्, श्रेष्ठ्यपि जिजीव"।

अथ राजा सर्वाः प्रतोलीरुद्घाटयामास। पुरे उत्सवा उत्सवोपरि जायन्ते। ततो भूपतिर्जिनदत्तमिलनोत्कण्ठाप्रेरितश्चचाल सैन्यविशालः। अथाऽऽबालगोपालं सर्वे लोका

---

1. मा भवथ श्रुतग्राहिणः = आकर्णितग्राहिणः, मा जल्पथ यद् न दृष्टं प्रत्यक्षम्, प्रत्यक्षेऽपि च दृष्टे युक्तायुक्तं विजानीत ॥

अप्यनुजग्मुः । ततो जिनदत्तोऽपि समागच्छन्तं भूपतिं पूर्वं श्रुत्वा पश्चात् सन्निहितं दृष्ट्वा स्वयमपि सम्मुखो गतः । हर्षोत्कर्षेण द्वावपि मिलितौ, परस्परं चरणाम्भोजौ यावद् विनयनम्रौ च तौ द्वावपि भूपौ दृष्ट्वा केचिज्जना एवं वदन्ति, यथा —

नमन्ति फलिता वृक्षा, नमन्ति विबुधा जनाः ।
शुष्ककाष्ठानि मूर्खाश्च, भज्यन्ते न नमन्ति च ॥२५१॥

केनाञ्जितानि नयनानि मृगाङ्गनानां ?,
को वा करोति रुचिराङ्गरुहान् मयूरान् ? ।
कश्चोत्पलेषु दलसन्निचयं करोति ?,
को वा करोति विनयं कुलजेषु पुंसु ? ॥२५२॥

तदा केनापि कर्मकरेण सिंहासनं समानीतम्, ततो द्वावपि नृपौ तत्रैवैकासनमासीनौ । ततोऽरिमर्दनो जिनदत्तराजसमीपे प्राक्तनं विदेशगमनादिराज्यप्राप्त्यन्तं सर्वं स्वरूपं पृष्ट्वा सम्यक् श्रुत्वा च वदति — "अहो ! जिनदत्तराज ! तव भाग्यवतो विदेशेऽपि गतस्य राज्यादिप्राप्तिर्जाता, श्रेष्ठिनः पुनरिह दौस्थ्यं समजनि, तदिदं सत्यम् —

[1]हंसा जिहिं गय तिहिं गया महिमंडणा हवंति ।
छेहउ ताहं सरोवरहं जे हंसे मुच्चंति ॥२५३॥

किं बहुना ?, हे धन्यमूर्द्धन्य ! तव भाग्य-सौभाग्यप्रमुखा गुणाः सहस्रजिह्वेनाऽपि वक्तुं न शक्यन्ते"। इत्थं निजगुणसहस्रवर्णनां निशम्योत्तमत्वात् क्षणं नीचैर्विलोक्य जिनदत्तो जल्पति — "हे परगुणग्रहणतत्पर ! मम मध्ये गुणवत्त्वं क्वास्ति ? यदर्थं मया सर्वधर्मकर्म मुक्तं तद् राज्यादि सर्वमिहैव स्थास्यति, सार्थे किमपि नाऽऽयास्यति । तदान्तरङ्गवैराग्यरङ्गसङ्गतो नरपतिरात्मनिन्दा काव्यानि पठति, यथा —

उदपद्यन्त हृद्येव, हृद्येव च विलिल्यिरे ।
अहो ! मे मन्दभाग्यस्य रोरस्येव मनोरथाः ॥२५४॥

अस्माभिः किं न जघ्रे ? किमिह न बुभुजे ? पस्पृशे नैव किं वा ?,
संसारे बम्भ्रमद्भिः किमिह न ददृशे ? शुश्रुवे नैव किं वा ? ।
किं नोचे ? किं न चक्रे ? किमु न परिदधे ? किं न चेषे न चापे ?,
हा हा ! तादृग् न लेभे किमपि हि सुकृतं प्राप्यते येन मोक्षः ॥२५५॥

1. हंसा यत्र गताः तत्र गता महीमण्डना भवन्ति, हानिः तेषां सरोवराणां यानि हंसैः मुच्यन्ते ॥

ततोऽरिमर्दनो दध्यौ — "अहोऽस्य स्वदोषदर्शित्वम्, यत् सर्वोऽपि प्राणी प्रायः पर्वतोपरि प्रज्वलत् पश्यति, न पुनः स्वपदोरधः, यतः —

[1]राई-सरिसवमित्ताणि परच्छिद्दाणि पासए ।
अप्पणो बिल्लमित्ताणि पासंतो वि न पासए ॥२५७॥

[2]इक्कं पि नत्थि लोयस्स लोयणं जेण नियइ नियदोसे ।
परदोसपिच्छणे पुण लोयणलक्खाइं जायंति ॥२५८॥

तदयं लोकोत्तरस्वभावो महाभाग्यवान्, किमप्यस्मै संसारसारभूतं ददामि, परं मम तन्नास्ति यदस्मै दीयते" । इति नरपतिश्चिन्तयन्नस्ति ।

अत्रान्तरे कमपि पूर्वसम्बन्धं स्मृत्वा अरिमर्दननृपः पुनरुवाच — "हे सौम्यमूर्ते ! ममैकः सन्देहो दवदहन इव देहं दहति, तं च शमयितुं त्वमेव समर्थः, यतस्ते मुखे सरस्वतीप्रवाहोऽस्ति, तव दक्षिणभुजः समुद्रः, तव हृदये घनागमः, तवाधरः शोणः, तव पार्श्वतो वाहिन्यस्तिष्ठन्ति, तव मानसं स्वच्छत्वे मानसमेवास्ति, त्वं ननु सर्वरसमय इव वेधसा विहितोऽसि, ततस्त्वत्तः शीतीभवितुमिच्छामि" ।

अथ 'यथोत्पन्नं संशयं शीघ्रं पृच्छ' इति जिनदत्तेनोक्तेऽरिमर्दनराजो ब्रूते — भो चित्रचरित्र ! मया दीयमानं ग्रामदेशादिदण्डं मुक्त्वा त्वया निजौ माता-पितरौ यन्महाकोपाटोपेन याचितौ तत् किं कारणम्? ततो जिनदत्त उवाच — "हे राजेन्द्र ! यदा तवोपदामहत्तरा मत्सम्मुखाः समायाताः तदा तव प्रजापालनपरीक्षाकरणे मम कौतुकं जातम् — 'यदयं शरणागतां निजां प्रजां कथं रक्षति?, कीदृशं चास्य मध्ये सत्त्वमस्ति?' अन्यच्च तदा सर्वथाऽप्यचिन्त्यो ममेदृशः कुविकल्पोऽप्यजनि — 'यद्येष राजा मदीयौ माता-पितरौ बद्ध्वा समर्पयिष्यति तदाऽहमेनं सबलं सकोशं सदेशं राज्यादुन्मूलयिष्यामि' इति, पुनस्त्वया श्रेष्ठिनं मत्तातमजानता किन्तु लोकमात्रं जानताऽपि स्वसाहसं न मुक्तं तत् त्वं निश्चितं सात्त्विकशिरोमणिः, यदुक्तम् —

चलति कुलाचलचक्रं, मर्यादामतिपतन्ति जलनिधयः ।
उचितादुदारसत्त्वात् सन्तः प्रलयेऽपि न चलन्ति ॥२५९॥

---

1. राजिका-सर्षपमात्राणि परछिद्राणि पश्यति, आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ 2. एकमपि नास्ति लोकस्य लोचनं येन पश्यति निजदोषान्, परदोषप्रेक्षणे पुनर्लोचनलक्षाणि जायन्ते ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारब्धमुत्तमजना न परित्यजन्ति ॥२६०॥

तथा हे नरनाथ ! मदारब्धेऽत्र सङ्कटे तव सम्यक् सत्त्वपरीक्षा जाता, यदुक्तम् —

उपाया बहवः प्राज्ञैः, कृताः स्वर्णपरीक्षणे ।
सत्त्वतत्त्वपरीक्षायां विपदेव कषोपलः ॥२६१॥

तथा हे धीरधुरन्धर ! त्वया प्राणसन्देहेऽपि मत्पितरावददानेन सत्यं सुभटत्वं दर्शितम्, यदुक्तम् —

शरणागता भटानां, सिंहानां केसरा उरः सत्याः ।
चूडामणयः फणिनां, गृह्यन्ते जीवतां नैव ॥२६२॥"

इत्थं बहुधा प्रशस्य **जिनदत्तो** विरराम ।

अथ गतसन्देहशल्योऽ**रिमर्दनो** दध्यौ — अहो ! अस्य गुणलुब्धता यदयं बहुगुणनिलयोऽपि ममैव सतोऽप्यसतोऽपि गुणान् गृह्णाति । अत्रापि राज्ञो वैराग्यवृद्धिर्जाता । तदा कोऽप्याह — पित्रोर्निबिडभक्तिविषये संसारे **जिनदत्त** एव वर्ण्यताम् । परः प्राह — किमसौ वर्ण्यते ?, किन्त्व**रिमर्दन** एव प्रजावात्सल्ये वर्ण्यताम् । कश्चिदाह — नैषोऽपि वर्ण्यः, किन्तु **जिनदत्त**पितरावेव चिरागतसुपुत्रसङ्गमात् पुण्यवन्तौ भणित्वा वर्ण्येताम् । केऽपि वदन्ति — वयमेव धन्याः यदीदृशो मेलापको दृष्टः स्वदृष्ट्येति ।

[ **जिनदत्तकृतद्यूतकाररक्षादिवर्णनम्** ]

अथ बहुपरिचितधर्ममित्रादिदर्शनोत्कण्ठया सर्वतो **जिनदत्ते**न सभां निभालयता ते द्यूतकारा दृष्टा उपलक्षिताः, वण्ठैराकारिता जल्पिताश्च — भो भो सत्पुरुषाः ! मामुपलक्षयथ ? ततो बहुमानहृष्टास्तेऽप्यूचुः — देव ! त्वां को नोपलक्षयति ?, त्वं राजराजेश्वरः पञ्चमलोकपालः । राजा प्राह — एवं सर्वः कोऽपि मां जानाति, पुनर्युष्माभिर्विशेषतः काऽपि व्यक्तिर्ज्ञायते ? ततस्ते चकिताः स्वयङ्कृतराजापमानं स्मरन्तो गतरङ्गाः कम्पमानाङ्गा मौनव्रतमिवाऽऽलम्ब्य स्थिताः । ततो राज्ञा ते दीना दृष्ट्वाचिरे — भो भो भद्राः ! मा भैष्ट, भवतां न्यायनिष्ठोऽहं किमपि न कथयामि, पुनरेकां वार्त्तां यथातथा वदत — स कञ्चुकः क्वास्ते यो मया द्यूते हारितः ? ततस्तैः किञ्चिन्निर्भयैरुक्तम् — हे देव ! स कञ्चुकस्तत्रैव हट्टेऽस्ति यत्र तदाऽस्माभिरड्डाणको मुक्तः । ततो राज्ञा तावन्मात्रं द्रव्यं प्रेष्य तदापणादानाय्य स कञ्चुकः प्रियायै **विमलमत्यै** दत्तः ।

ततो जिनदत्ततो ज्ञातवृत्तान्तेन राज्ञा ते द्यूतकारा बाढं हक्किताः — रे रे धूर्ताः ! युष्माभिरित्थमेव सर्वं नगरं मुष्यते, यद्येषोऽपि पुण्यात्मा वञ्चितः तर्हि युष्मदग्रे न कोऽपि छुटिष्यति, ततो यूयं दण्डयोग्याः स्थ । ततो नृपो यावता तेषां गुप्त्यादिविडम्बनामादिशति तावता श्रेष्ठिना 'ह हा ! खरक्षये रजको म्रियते' इति विमृश्योचे — हे राजन् ! ध्रुवमेते निरपराधा एव, किन्त्वमी 'मत्पुत्रो द्यूतव्यसनी कार्यः' इति मयैव प्रेरिताः, तदस्मिन् व्यतिकरे यावदमी पीडयिष्यन्ते तावन्ममैव पापं भावीति ममोपरि प्रसादं विधायाऽमून् मुञ्च । इत्युक्तोऽपि नृपो जिनदत्तरोषज्ञानार्थं किञ्चिद् विलम्बते । अत्रान्तरे सम्मुखनिरीक्षणाद्याकारेण भूपभावं विज्ञाय जिनदत्तोऽपि तद्गुणानेव जग्राह — राजन् ! यद्यमी द्रव्यं नाहारयिष्यन् तर्हि ममैतावन्मात्रं राज्यपदं कथं स्यात् ?, तदमी महोपकारिणः परिधाप्याः । इति जिनदत्त-वचनात् सम्मान्य ते मुक्ताश्चिन्तयन्ति स्म — "अहो ! सन्तो द्रोहकारिष्वपि सुन्दरविधायिन एव । यदुक्तम् —

दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं,
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम् ।
छिन्नं छिन्नं पुनरपि पुनः स्वादुदं चेक्षुदण्डं,
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥२६३॥"

ततो राज्ञोचे — हे श्रेष्ठिन् ! त्वया स्वपुत्रस्यापि कथमित्थं तिरस्कारः कारितः ? श्रेष्ठी प्रोचे — "राजन् ! आयतौ त्विहलोकसुखमिच्छता मया सत्यमपमानानुकारः सत्कारः कृतः, पुनरनेन भाग्यवता तदपि न संसोढम्, देशान्तरगमनादस्य राजहंसवदुज्ज्वलोभयपक्ष-स्येदमपि युक्तम्, यदुक्तम् —

[1]बग ऊडाडया बापडा के पालि के तीरि ।
हंस पराभव किम सहइ ? अमरस जाहं सरीरि ॥२६४॥"

[ निजपुत्रीसौभाग्यलता-जिनदत्तयोः पाणिग्रहणानन्तरमरिमर्दननृपस्य जिनदत्ताय निजराज्यदानम् ]

तदा कश्चिदवसरज्ञो विज्ञो ब्रूते — "हे श्रेष्ठिवतंस ! बहुदेशेषु जडनिवेशेषु भ्रान्त्वा त्वां निर्मलमानसं स्मृत्वा यदसौ समागतस्तदसौ सत्यं राजहंस एव । यदुक्तम् —

1. बकाः उड्डायिताः वराकाः कदाचित् पालौ कदाचित् तीरे [ तिष्ठन्ति ] । हंसाः पराभवं कथं सहन्ते अमर्षः = असहिष्णुता येषां शरीरे ॥

नद्यो नीचतरा दुरापपयसः कूपाः पयोराशयः
क्षारा दुष्टबकोटसङ्कटतटोद्देशास्तटाकादयः ।
भ्रान्त्वा भूतलमाकलय्य सकलानम्भोनिवेशानिति,
त्वां भो मानस ! संस्मरन् पुनरसौ हंसः समभ्यागतः ॥२६५॥॥ ”

तदा सर्वेऽपि लोकास्तं स्वस्वबुद्ध्या ‘ चिरं जय, जीव नन्द ’ इत्याशासमानाः सन्ति । तदा तद्दानप्रीतः कश्चिद् भटो रसालोपमया **जिनदत्त**माशीर्वादयति स्म, यथा —

‘ कन्दे सुन्दरता दले सरलता वर्णेऽपि सम्पूर्णता,
गन्धे बन्धुरता फले सरसता कस्याऽपरस्येदृशी ? ।
एकस्त्वं सहकार ! विश्वजनताधारः समानः सतां,
दीर्घायुर्भव साधु साधु विधिना मेधाविना निर्मितः ॥२६६॥ ’

इत्यादि सर्वलोकप्रशंसायां सत्यां लज्जया नीचैर्विलोकमानं महाभाग्याधीशसीमानं विश्वविख्यात-महिमानं श्री**जिनदत्त**नामानं राजानं दृष्ट्वा श्री**अरिमर्दनो** दध्यौ — अहो ! परे निजश्लाघयाऽखर्वगर्वपर्वता इव जायन्ते, अस्य निरभिमानचूडामणेस्तु महाराज्येऽपि निर्मलचित्तमलग्नमेव दृश्यते, असौ लघुरपि निःस्पृहो निःसङ्ग इव दृश्यते, अहं तु वयोवृद्धोऽपि राज्यातृप्तोऽस्मि सारम्भचक्रवर्त्तीव वर्त्ते । इति भावयन् कर्मविवरेण तदा पुनः परमवैराग्यं प्राप्तः श्री**अरिमर्दनो** विमृशति, यथा —

“ तपो न तप्तं वयमेव तप्ता भोगा न भुक्ता वयमेव भुक्ताः ।
कालो न यातो वयमेव याताः, तृष्णा न जीर्णा वयमेव जीर्णाः ॥२६७॥

अहो ! मादृशाश्चिक्कणकर्माणो जीवाः कियताऽपि कालेन संसारभोगैर्न तृप्यन्ति, यदुक्तम् —

[1]पत्ता य कामभोगा कालमणंतं इहं सउवभोगा ।
अप्पुव्वं पिव मन्नइ तहवि य जीवो मणे सुक्खं ॥२६८॥

अतस्तस्य मूढजीवस्य बहुभिरपि मानवभोगैः कीदृशी तृप्तिर्भविष्यति, यदुक्तम् —

असुर-सुरपतीनां यो न भोगेषु तृप्तः,
कथमिह मनुजानां तस्य भोगेषु तृप्तिः ? ।
जलनिधिजलपानाद् यो न जातो वितृष्ण-
स्तृणशिखरकणाम्भःपानतः किं स तृप्येत् ? ॥२६९॥

1. प्राप्ताश्च कामभोगाः कालमनन्तं इह सोपभोगाः अपूर्वं इव मन्यते तथापि च जीवो मनसि सुखम् ॥

तथा स्वयं मुक्तं राज्यमिदं मुक्तिराज्यं दत्ते, पुनरत्यक्तं गच्छच्च दुर्गतिमेव ददाति। यतो राज्यं नरकान्तं भण्यते, ततो मया राज्यं सर्वथा परित्याज्यम्। तथा बहुभिः कारणै-**र्जिनदत्त** एव मम राज्योचितोऽस्ति, यथा — एकं तावदेतस्मादुत्कृष्टो भाग्यवान् पुमान् संसारे नास्ति, द्वितीयं चाहं जराजीर्णाङ्गोऽप्यनपत्योऽस्मि, तृतीयमिदमपि राज्यप्रदानकारणम् यथा — यद्यहं तदा बद्ध्वा श्रेष्ठिनमार्पयिष्यं तदाऽपीदं राज्यं यशसा सहानेन गृहीतम-भविष्यत्, चतुर्थं पुनरपरिणीतायाः स्वसुतायाः **सौभाग्यलतायाः** पृथिव्यां **जिनदत्तात्** परो वरो नास्ति तथापि पुत्राभावे जामातैव राज्यमर्हति, इत्यादि **जिनदत्तस्य** राज्यदानकारणानि सन्ति, परं मुनिरिव निर्ममोऽसौ दृश्यते ततः कदाचिदयं राज्यं पुत्रीं च न स्वीकरिष्यति तदा मम मनसो मनोरथा मनस्येव विलयं यास्यन्ति, तस्मात् कमपि बुद्धिप्रपञ्चं कृत्वाऽनेन सर्वमङ्गी-कारयामि"।

इति विचिन्त्य श्री**अरिमर्दन** उवाच — "हे पुण्यश्लोक! हे मानितसर्वलोक! यदि मदीयमद्वितीयमेकं सविवेकं वाक्यं मानयसि, 'नहि' इति न जल्पसि, तदा हृदयमुदा तद् वदामि; यदि मद्वचोऽपि भूमौ पतति तर्हि किं वृथा प्रयासेन? लोकेऽपि राजवचनमेक-वारोक्तं राजते। यदुक्तम् —

सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति पण्डिताः।
सकृत् कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत् ॥२७०॥

एकतो याच्ञाऽपि क्रियते, पुनरन्यतो मार्गितं न लभ्यते तदा याचकोऽतीवलघुर्भवति। यदुक्तम् —

तृणं लघु तृणात् तूलं, तूलादपि हि याचकः।
वायुना किं न नीतोऽसौ? मामपि प्रार्थयिष्यति ॥२७१॥

ततो **जिनदत्तो** दध्यौ — अहमेवं सम्भावयामि 'एष नरपतिरेवं वक्ष्यति, यत् — त्वं स्वकुटुम्बमादाय स्वपुरीं गच्छ, मद्देशाय कुशलं यच्छ, अथ ममोपरि प्रसादं विधेहि, देशं ग्रामं च देहि' इत्यादि यत् किञ्चिदसौ वृद्धो राजा वक्ष्यति तन्मया निश्चयेन कर्त्तव्यम्। इति विचिन्त्यायमुवाच — "हे साधर्मिकशिरोरत्न! किमेतदयुक्तं त्वयोक्तम्?, त्वमेवं मा स्म जानीयाः 'यदसौ महाराजो मदुक्तं न करिष्यति,' सत्यमहमन्यत्र महानेवाऽस्मि न पुनस्तवाग्रे, यदहं तव पुरे प्रजारूपो वसामि स्म, तथा यद्यहं पित्रोरदानेन परीक्षित-सत्त्वस्य ज्ञाततत्त्वस्य तवाऽपि वचनं न करोमि तदा किं कृतघ्नोऽस्मि?, ततो निर्विकल्प-मनल्पं निजसङ्कल्पं जल्प, न पुनः स्तोकम्। इत्युक्तेऽपि तस्मिन् मौनमुद्रामभिन्दाने

सति तदप्रतीतिं ज्ञात्वा पुनः **श्रीजिनदत्तो** वदति — "हे अविश्वासनीतिज्ञ ! यद्यपि तव चित्ते प्रत्ययो नास्ति तदाऽहं सर्वथाऽप्यकृत्यान् शपथानपि कुर्वे, यथा — राजन् ! यद्यहं तव वचनं न मानयामि तर्हि निशिभोजनकारिणां मद्य-मांसाद्यभक्ष्याहारिणां वा पापेन गृह्ये, तथा श्रीसंघाद्यवर्णवादिनां कन्यालीकादिपञ्चमहाकूटवादिनां वा पापेन गृह्ये, तथाऽपूतजलपायिनां सुबुद्धिप्रच्छकेषु कुबुद्धिदायिनां वा पापेन गृह्ये, तथा शिष्यता-सेवकता-मिषेण गुरु-स्वामिद्रोहकारिणां पञ्चेन्द्रियजन्तुमारिणां वा पापपङ्केन लिप्ये, तथा देवद्रव्य-ज्ञान-द्रव्यभक्षिणां साध्वीशीलभङ्गकारिणां वा पापेन लिप्ये, गुणपश्चाद्दोषपोषिणां दीर्घरोषिणां वा पापेन लिप्ये"। इत्येवंविधान् विविधान् शपथान् कुर्वन्तं निवार्य प्रीतः **श्रीअरिमर्दन** उवाच — "हे धराधरणधौरेय ! यद्येवं तर्हि कन्याकरग्रहणपूर्वकं मम स्कन्धतो राज्यव्यापार-भारमुत्तारय, यदहं जरद्गव इव चिरोद्धृतं भूभारं वोढुं साम्प्रतमसमर्थोऽस्मि, ततस्तत्र त्वां धवल-गुणं मोक्तुमिच्छामि, एतावता त्वं जामाता लोकत्राता च भव, यथाऽहं तव सान्निध्येन गगनादुच्चतरे त्रैलोक्यसुन्दरे तत्त्वश्रद्धानपीठबन्धवरे बाल्य-यौवन-वृद्धत्वभूमित्रयाधारे प्रतिभूमि-सञ्जातद्वादशव्रतसोपाननिकरे दान-शील-तपो-भावचतुःशालरुचिरे मनुष्यजन्ममन्दिरे संयम-सुवर्णकलशमारोपयामि, एतावता तव साहय्यान्मम भागवती भवभयभञ्जदक्षा दीक्षा भवतु"। इति श्रुतिभ्यां श्रुत्वा हृदयोदयाचलसमुदितविवेकादित्यज्योतिर्विघटितमहामोहान्धकारः प्रास्त-समस्तचित्तविकारः पुनर्दीप्तमहावैराग्येण विस्मृतशपथोच्चारः **श्रीजिनदत्तो** व्याजहार — हे विचारचतुर ! त्वया किमिदमनुचितमूचे ?, खलु अहं तप्तायोगोलककल्पं सञ्जाताशुभबहुसङ्कल्प-विकल्पं कृतदुर्गतिदुःखजल्पं स्वल्पमनल्पं वा तव राज्यं न गृह्णाम्येव, यदहं निजभुजार्जितं स्वराज्यमपि त्यक्तुकामोऽस्मि तत् त्वदीयं कथमाददे ? । ततो हसित्वा **अरिमर्दन** उवाच — "हे स्मृतिज्ञाननिधान ! हे सत्यवादिप्रधान ! त्वं निजां वाचं संस्मर, कथं विपर्यस्यसि ?, यदि मनुष्यस्य वाचा गता तदा किं स्थितम्, अलीकं तु निःशेषदोषमूलं श्रूयते, यदुक्तम् —

असत्यमप्रत्ययमूलकारणं कुवासनासद्म समृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं कृतापराधं कृतिभिर्विवर्जितम् ॥२७२॥"

ततो जिनदत्तोऽधोभुवं विलोकमानो दध्यौ — "हहा ! यद्यहं वचनछलसङ्कटे स्वयमेव पतितः तर्हि कस्य कथयामि ?, स्ववाचैव बद्धोऽस्मि, यथा कोलिको निजलालयैव वेष्ट्यते, यथा कश्चिन्निज-तैलेन खरण्ट्यते, यथा कश्चिन्निजशस्त्रेण छिद्यते, अथ अनेन बुद्धिमता राज्ञा पूर्वमेवाहं वचन-स्थैर्ये तथा जटितः यथाऽधुना त्यजन्नपि न छुटामि, अथ विमृश्य निषेध-स्वीकारयोरेकः कश्चिन्निर्विलम्बं कथितो विलोक्यते तावन्निषेधे कृते मम धर्ममूलं वाग् याति, स्वीकारे तु मूर्च्छापरिग्रहो भवति, स तु शास्त्रे महारम्भादिदोषैस्त्याज्य एवोक्तोऽस्ति, यदुक्तम् —

संसारमूलमारम्भास्तेषां हेतुः परिग्रहः ।
तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहम् ॥२७३॥

त्रसरेणुसमोऽप्यत्र न गुणः कोऽपि विद्यते ।
दोषास्तु पर्वतस्थूलाः, प्रादुष्षन्ति परिग्रहे ॥२७४॥

परिग्रहमहत्त्वाद्धि मज्जत्येव भवाम्बुधौ ।
महापोत इव प्राणी, त्यजेत् तस्मात् परिग्रहम् ॥२७५॥

असन्तोषवतः सौख्यं न शक्रस्य न चक्रिणः ।
जन्तोः सन्तोषभाजो यदभयस्येव जायते ॥२७६॥

स्वाधीनं राज्यमुत्सृज्य, सन्तोषामृततृष्णया ।
निःसङ्गत्वं प्रपद्यन्ते, तत्क्षणाच्चक्रवर्तिनः ॥२७७॥

जीवन्तोऽपि विमुक्तास्ते ये मुक्तिसुखशालिनः ।
किं वा विमुक्तेः शिरसि, शृङ्गं किमपि वर्तते ? ॥२७८॥

असन्तोषे हि लोभपिशाचो हृदये सङ्क्रम्य विविधां व्यथां विदधाति, यदुक्तम् —

सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य ।
लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात् ? ॥२७९॥

महताऽप्यर्थलाभेन, न लोभः परिभूयते ।
मात्राधिको हि किं क्वापि, मात्राहीनेन जीयते ॥२८०॥

[1]सुवन्नरुपस्स य पव्वया भवे, सिया हु केलाससमा असंखया ।
नरस्स लुद्धस्स न तेहिं किंचि, इच्छा हु आगाससमा अणंतया ॥२८१॥

(उत्तराध्ययनसूत्र, अध्ययन ९, गाथा ४८)

एवम् 'असंतोषमुख्यदोषलक्षपोषकरोऽयं परिग्रहः' इति जानन् पुनस्तमहं कथं करोमि ?" । इति ध्यायन् श्री **जिनदत्त**श्चटिकागृहीतबदरन्यायगतस्तदा नीचैरेव विलोक्य स्थितः ।

ततो निरीहतया सत्यसीमतया चाङ्गीकार-नकारवाक्ययोरेकतरमपि वक्तुमक्षमं क्षमापतिं वीक्ष्य **श्रीअरिमर्दनेन** भ्रूसंज्ञया प्रेरितो **जीवदेव**श्रेष्ठी हृष्टः स्पष्टमेवाचष्ट — "हे शिष्ट-मते ! सामान्यस्यापि वचो मान्यम्, किं पुनरस्य मुक्तिकामनृपस्य ? तथा हे वत्स ! सत्पुरुषाः

1. सुवर्ण-रूप्यस्य च पर्वताः भवेयुः, स्यात् – कदाचित्, हु – अवधारणे, कैलाससमाः असंख्यकाः, नरस्य लुब्धस्य न तैः किञ्चित्, इच्छा हु – यस्माद् आकाशसमा अनन्तिका ।

पराशाभङ्गपराङ्मुखा भवन्ति, असौ नृपस्तु निष्कामः प्रव्रजितुकामोऽस्ति, स च प्रवज्यामनोरथो यदि तव सान्निध्येन सिध्यति, तदा तवापि पुण्यं भवति, यदुक्तम् —

कर्तुः स्वयं कारयितुः परेण, शुद्धेन चित्तेन तथाऽनुमन्तुः ।
साहाय्यकर्तुश्च शुभाशुभेषु, तुल्यं फलं तत्त्वविदो वदन्ति ॥२८२॥

तथा तत्त्वज्ञ ! तव पुरापि राज्यं प्रौढमस्ति तन्मध्ये स्तोकमिदमपि मिलतु, यथा 'मणशतं तथा शुण्ठीग्रन्थिकोऽपि' इति न्यायोऽप्यस्ति, हे वत्स ! यथा त्वं निजमहाराज्यस्य चिन्तां करोषि तथाऽस्यापि चिन्ता कार्या, स्तोककृते त्वं मा भज्यस्व; 'यदि शकटे भृते भारो न भावी तत् किं पिञ्जिन्या भविष्यति ?' इति विमृश्य सर्वमिदं गृहाण, उच्चनीचघनं मा पश्य, राजादेशोऽन्यथा न भवति" ।

ततो जिनदत्तोऽपि स्वस्य भोगफलं कर्म मत्वा भवितव्यतामिव पितुर्वाचं च दुरतिक्रमां ज्ञात्वा संयमसाहाय्यस्य सारं सुकृतं चित्ते चिन्तयित्वा निजजिह्वोक्तां शपथवाणीं प्रमाणीकर्तुं राज्यादिस्वीकारं मेने ।

ततः सुपात्रप्रदत्तराज्यत्वात् प्रमुदितः श्री**अरिमर्दन**स्तदैव प्रेषितप्रधानपुरुषपार्श्वादाकार्य ज्योतिषिकानवादीत् — भो विशारदाः ! भवतां शारदा प्रसन्नाऽस्ति तदुच्यतां किमप्यासन्नं लग्नं विद्यते । ततस्ते सर्वे सम्भूय चैकमतीभूय प्रोचुः — हे राजन् ! अद्यतने दिने यादृशं भृशं सुन्दरं लग्नद्वयं विद्यते तादृशं वर्षमध्येऽपि नास्ति, तच्च सर्वग्रहबलोपेतं सर्वदोषविवर्जितं विवाहलग्नं पट्टाभिषेकलग्नं चेति द्वयं ज्ञेयम् । तदा राज्ञा चिन्तितम् — अहो ! दिष्ट्याऽद्य सद्यः सर्वभाग्यैर्जागरितम्, यदेकतोऽमुना पुरुषोत्तमेन वाक्यं मानितम्, अन्यतोऽद्यैव वाञ्छितं लग्नद्वयं स्वयं समायातम् ।

ततः श्री**अरिमर्दन**स्तान् ज्योतिर्विदः पारितोषिकदानपूर्वं विसृज्य सर्वसैन्यभाजं श्री**जिनदत्त**राजं नगरमध्ये स्वसौधे समानीय निजैश्वर्यानुमानेन महोत्सवविधानपूर्वं स्वपुत्र्या समं पर्यणाययत् । ततश्चतुरिकाया एवाऽऽनीय सदसि सिंहासने निवेशितस्य तस्य भृशमनिच्छतोऽपि द्वितीयलग्ने पट्टाभिषेकोऽकारि । तदा सर्वैं राजप्रमुखैः पञ्चाङ्गस्पृष्टभूपीठं स नमोऽकारि, तदा तदाज्ञा सेवकैर्विश्वे व्यस्तारि, वैरिभिर्दूरं व्यचारि, मुक्ताफलभृतस्थालैः सोऽवर्धि, तद्भाग्येन समं केनापि नास्पर्द्धि, तदा निःस्वानप्रभृतिवादित्राणि गम्भीरस्वरेण वादितानि, गिरिकन्दराणि तन्नादेन प्रतिनादितानि । एवमुत्सवं विदधतोऽ**रिमर्दन**स्य दिवसो गतः । ततः किञ्चिद्योगनिद्रया राज्ञा रात्रिर्नीता, ब्राह्मे मुहूर्त्ते चोत्थाय तेन चिन्तितम्, यथा —

" [1]निसाविरामे परिभावयामि — गेहे पलित्ते किमहं सुयामि ? ।
डज्झंतमप्पाणमुविक्खयामि जं धम्मरहिओ दियहे गमामि ॥२८३॥

माणुस्सजम्मे तडिलद्धएणं० ॥२८४॥

[2]कह आयं ? कह चलियं ?, तुमं पि कह आगओ ? कहं गमिहि ।
अन्नन्नं पि न याणह, जीव ! कुडुंब कओ तुज्झ ? ॥२८५॥

श्वः कार्यमद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम् ।
मृत्युर्नहि प्रतीक्षेत, कृतं चास्य कृताकृतम् ॥२८६॥

आयुर्यौवन-वित्तेषु स्मृतिशेषेषु या मतिः ।
सैव चेज्जायते पूर्वं न दूरे परमं पदम् ॥२८७॥

विलम्बो नैव कर्तव्यः आयुर्याति दिने दिने ।
न करोति यमः क्षान्तिं, धर्मस्य त्वरिता गतिः ॥२८८॥ "

इति चिन्तयतो राज्ञो द्विधाऽपि प्रभातं जातम् । यथा —

निद्रा मोहमयी जगाम विलयं सच्चक्षुरुन्मीलितं,
नष्टा दुष्टकषायकौशिकगणा माया ययौ यामिनी ।
पूर्वाद्रिप्रतिमे नरेन्द्रहृदये सज्ज्ञानसूर्योदयात्,
कल्याणाम्बुजकोटयो विकसिता जातं प्रभातं ततः ॥२८९॥

[ धर्मघोषमुनिदेशनाश्रवणानन्तरमरिमर्दननृप-जीवदेवश्रेष्ठि-
जिनश्रीश्रेष्ठिनीनां दीक्षाग्रहणम् ]

ततः प्रातर्मङ्गलतूर्याणि नदन्ति । अथ 'गुरवो यदि मम भाग्येनात्र समायान्ति तदाऽहं परलोकं साधयामि' इति चिन्ता यावता राज्ञः सञ्जाता तावदारामिकेणाऽऽगत्य निजारामे गुर्वागमेन राजा वर्द्धितः । घनगर्जितमिव केकी गुर्वागमनं श्रुत्वा हर्षनृत्यं तन्वानो राजा दध्यौ —

"अहो ! भाग्यमहो भाग्यं, अहो ! मेऽद्य महोत्सवः ।
अरि रे धर्मसामग्री, कटरे कर्मलाघवम् ॥२९०॥

1. निशाविरामे परिभावयामि — गृहे प्रदीप्ते किमहं स्वपीमि ? दह्यमानमात्मानं उपेक्ष्ये यद् धर्मरहितो दिवसान् गमयामि ॥ 2. कथमायातम् ? कथं चलितम् ? त्वमपि कथं आगतः ? कथं गमिष्यसि ? अन्यान्यमपि न जानीषे जीव ! कुटुम्बं कुतस्तव ? ॥

अहो! भाग्यवतां स्पृहा-प्राप्ती युग्मजाते इव स्याताम्, यथा —

भवन्ति भूरिभिर्भाग्यैर्धर्मकर्ममनोरथाः ।
फलन्ति यत् पुनस्तेऽपि, तत् सुवर्णस्य सौरभम् ॥२९१॥"

ततः श्री **अरिमर्दन**स्तस्मै वनपालायाऽऽजन्मनिर्वाहयोग्यं प्रीतिदानं दत्त्वा प्रचुर-पौरपरिवृतो नवीननृपतिसहितो गुरुपादपद्मपवित्रितं पुरपरिसरं प्राप । तत्र छत्रचामरादि मुक्त्वा पञ्चाभिगमपूर्वं प्रदक्षिणां दत्त्वा गुरुस्तुतिमकरोत्, यथा —

"[1]अज्जं चिय सुपभायं, अज्जं चिय सव्वमिच्छियं जायं ।
मुक्खपुरसत्थवाहो जं सुगुरु! तुमं मए दिट्ठो ॥२९२॥

[2]धन्न ते गामाऽऽगर-नगर जहिं सहगुरु विहरंति ।
देसणकिरणिहिं भवियणह मिच्छातिमिर हरंति ॥२९३॥

[3]अज्ज कयत्थो जम्मो, अज्ज कयत्थं च जीवियं मज्झ ।
जेण तुह दंसणामयरसेण सित्ताइं गत्ताइं ॥२९४॥"

इत्यादि भणित्वा राजा प्रजायुक्तो मति-श्रुतज्ञानभूरीणां श्री**धर्मघोषसूरी**णां चरणारविन्दं वन्दित्वा यथोचितप्रदेशे निषीदति स्म ।

अथ श्रीगुरवस्तत्कृपया धर्मदेशनां ददते स्म, यथा — अहो! प्रबलप्रमादपूरपतितः प्रायः प्राणी सर्वोऽप्येवं कल्पनां करोति यद् अहं केनाप्यसाध्यं साधयिष्ये, केनाप्यकृतं करिष्ये, वर्षान्तरे प्रौढं गृहं भव्यहट्टं वा मण्डयिष्ये, दीपालीप्रभाते सुतस्य सुताया वा विवाहं विधास्ये, अमुकामुककार्याण्यद्य कल्ये पक्षाद्यन्तरे वा निष्पादयिष्ये इत्याद्यनेकसङ्कल्पविकल्पान् विवेकविकलः कल्पयति, देह-गेह-कुटुम्बादि सुख-दुःखतप्ति च रचयति । पुनरेवं वराको जीवः कदापि भावनां न भावयति, यथा —

"[4] संज्झऽब्भरागसुरचावविब्भमे घडण-विहडणसरूवे ।
विहवाइवत्थुनिवहे किं मुज्झसि जीव! जाणंतो ॥२९५॥

1. अद्य खलु सुप्रभातम्, अद्य खलु सर्वमिष्टं जातम्, मोक्षपुरसार्थवाहो यद् सुगुरो! त्वं मया दृष्टः ॥
2. धन्यानि तानि ग्रामाऽऽकर-नगराणि यत्र सद्गुरवः विहरन्ति, देशनाकिरणैः भव्यजनानां मिथ्यातिमिरं हरन्ति ॥
3. अद्य कृतार्थं जन्म, अद्य कृतार्थं च जीवितं मम, येन तव दर्शनामृतरसेन सिक्तानि गात्राणि ॥
4. सन्ध्याभ्रराग-सुरचापविभ्रमे घटन-विघटनस्वरूपे विभवादिवस्तुनिवहे किं मुह्यसि जीव! जानन् ॥

[1]धण-सयण-बलुम्मत्तो निरत्थयं अप्पगव्विओ भमसि ।
जं पंचदिणाणुवरिं न तुमं न धणं न ते सयणा ॥२९६॥

[2]कालेण अणंतेणं अणंत बल-चक्कि-वासुदेवा वि ।
पुहईए अइक्कंता, को सि तुमं ? को य तुह विहवो ? ॥२९७॥

॥ अनित्यता १ ॥

[3]रोग-जरा-मच्चुमुहाऽऽगयाण बल-चक्कि-केसवाणं पि ।
भुवणे वि नत्थि सरणं इक्कं जिणसासणं मुत्तुं ॥२९८॥

[4]सयलतियलोयपहुणो उवायविहिजाणगा अणंतबला ।
तित्थयरा वि हु कीरंति कित्तिसेसा कयंतेण ॥२९९॥

[5]बहुसत्तिजुओ सुरकोडिपरिवुडो पविपयंडभुयदंडो ।
हरिणो व्व हीरइ हरी कयंतहरिणा हरियसत्तो ॥३००॥

[6]छक्खंडवसुहसामी नीसेसनरिंदपणयपयकमलो ।
चक्कहरो वि गसिज्जइ ससि व्व जमराइणा विवसो ॥३०१॥

[7]जे कोडिसिलं वामिक्ककरयलेणुक्खिवंति तूलं व ।
विज्झवइ जमसमीरो, ते वि पइवु व्वऽसुररिउणो ॥३०२॥

[8]जइ मच्चुमुहगयाणं एआण वि होइ किं पि न हु सरणं ।
ता कीडयमित्तेसुं का गणणा इयरलोएसु ? ॥३०३॥

॥ अशरम् २॥

[9]इक्को कम्माइं समज्जिणेइ, भुंजइ फलं पि तस्सिक्को ।
इक्कस्स जम्म-मरणे, परभवगमणं च इक्कस्स ॥३०४॥

---

1. धन-स्वजन–बलोन्मत्तो निरर्थकं आत्मगर्वितो भ्रमसि यत् पञ्चदिनानामुपरि न त्वम्, न धनम्, न ते स्वजनाः ॥ 2. काले अनन्ते अनन्ताः बल चक्रि-वासुदेवा अपि पृथिव्यां अतिक्रान्ताः, कोऽसि त्वम्? कश्च तव विभवः? ॥ 3. रोग-जरा-मृत्युमुखाऽऽगतानां बल-चक्रि-केशवानामपि भुवनेऽपि नास्ति शरणं एकं जिनशासनं मुक्त्वा ॥ 4. सकलत्रिलोकप्रभवः उपायविधिज्ञायका अनन्तबलाः तीर्थकरा अपि क्रियन्ते कीर्तिशेषाः कृतान्तेन ॥
5. बहुशक्तियुतः सुरकोटिपरिवृतः पविप्रचण्डभुजादण्डः हरिण इव ह्रियते हरिः कृतान्तहरिणा हृतसत्त्वः ॥
6. षट्खण्डवसुधास्वामी निःशेषनरेन्द्रप्रणतपदकमलः चक्रधरोऽपि ग्रस्यते शशी इव यमराहुणा विवशः ॥
7. ये कोटिशिलां वामैककरतलेन उत्क्षिपन्ति तूलमिव विध्मापयति यमसमीरः तानपि प्रदीप इव असुररिपून् ॥
8. यदि मृत्युमुखगतानां एतेषामपि भवति किमपि न खलु शरणं तर्हि कीटकमात्रेषु का गणना इतरलोकेषु ॥
9. एकः कर्माणि समर्जयति, भुनक्ति फलमपि तस्य एकः, एकस्य जन्म-मरणे, परभवगमनं च एकस्य ॥

[1]सयणाईविच्छड्डो मह इयमित्तो त्ति हरिसियमणेण ।
तस्स निमित्तं पावाइं जेण विहियाइं विविहाइं ॥३०५॥

[2]नरय-तिरियाइएसु तस्स य दुक्खाइं अणुहवंतस्स ।
दीसइ न कोइ बीओ जो अंस गिण्हइ दुहस्स ॥३०६॥

[3]भुत्तूण चक्किरिद्धिं, वसिउं छक्खंडवसुहमज्झम्मि ।
इक्को वच्चइ जीवो मुत्तुं विहवं च देहं च ॥३०७॥

॥ एकत्वम् ३॥

[4]अन्नं कुडुंबमेयं, अन्ना लच्छी, सरीरमवि अन्नं ।
मुत्तुं जिणिंदधम्मं न भवंतरगामिओ अन्नो ॥३०८॥

वैदेशकुटयां पुरुषा द्रुमे छदा गावो वने शाखिनि पक्षिणो यथा ।
तथैव संयोगवियोगभाजिनः स्वकर्मभाजः स्वजना जना इह ॥३०९॥

[5]इय कम्मपासबद्धा विविहट्ठाणेसु आगया जीवा ।
वसिउं एगकुडुंबे अन्नन्नगईसु वच्चंति ॥३१०॥

॥ अन्यत्वम् ४॥

श्वभ्रे शूल-कुठार-यन्त्र-दहन-क्षार-क्षुरव्याहतै-
स्तिर्यक्षु श्रमदुःख-पावकशिखासम्भारभस्मीकृतैः ।
मानुष्येऽप्यतुलप्रयासवशगैर्देवेषु रागोद्धतैः,
संसारेऽत्र दुरन्तदुर्गतिमये बम्भ्रम्यते प्राणिभिः ॥३११॥

[6]नरएसु जाइं अइकक्खडाइं दुक्खाइं परमतिक्खाइं ।
को वन्नेही ताइं जीवंतो वासकोडी वि ? ॥३१२॥

[7]जइ अमरगिरिसमाणं हिमपिंडं कोइ उसिणनरएसु ।
खिवइ सुरो तो खिप्पं वच्चइ विलयं, अपत्तो वि ॥३१३॥

1. स्वजनादिविच्छर्दः मम इयन्मात्र इति हृष्टमनसा तस्य निमित्तं पापानि येन विहितानि विविधानि ॥ 2. नरक-तिर्यञ्चादिकेषु तस्य च दुःखानि अनुभवतः दृश्यते न कोऽपि द्वितीयो यः अंशं गृह्णाति दुःखस्य ॥ 3. भुक्त्वा चक्रिऋद्धिम्, उषित्वा षट्खण्डवसुधामध्ये एकः गच्छति जीवः मुक्त्वा विभवं च देहं च ॥ 4. अन्यत् कुटुम्बमेतत्, अन्या लक्ष्मीः, शरीरमपि अन्यत्, मुक्त्वा जिनेन्द्रधर्मं न भवान्तरगामी अन्यः ॥ 5. एवं कर्मपाशबद्धाः विविधस्थानेभ्यः आगताः जीवाः उषित्वा एककुटुम्बे अन्यान्यगतिषु गच्छन्ति ॥ 6. नरकेषु यानि अतिकर्कशानि दुःखानि परमतीक्ष्णानि कः वर्णयिष्यति तानि जीवन् वर्षकोटिमपि ॥ 7. यदि अमरगिरिसमानं हिमपिण्डं कश्चिद् उष्णनरकेषु क्षिपति सुरः तर्हि क्षिप्रं गच्छति विलयम्, अप्राप्तोऽपि ॥

[1]धमियकयअग्गिवन्नो मेरुसमो जइ पडिज्ज अयगोलो ।
परिणामिज्जइ सीएसु सो वि हिमपिंडरूवेण ॥३१४॥

[2]तह फालिया वि ऊक्कत्तिया वि तलिया वि छन्निभिन्ना वि ।
दड्ढा भुज्जा मुडिया य तोडिया तह विलीणा य ॥३१५॥

[3]पावोदएण पुणरवि मिलंति तह चेव पारयरसु व्व ।
इच्छंता वि हु न मरंति कहवि ते नारया वरया ॥३१६॥

[4]पभणंति तओ दीणा 'मा मा मारेह सामि! पहु! नाह! ।
अइदुसहं दुक्खमिणं, पसियह, मा कुवह इत्ताहे' ॥३१७॥

[5]एवं परमाहम्मियपाएसु पुणो पुणो विलग्गंति ।
दंतेहिं अंगुलीओ गिण्हंति, भणंति दीणाइं ॥३१८॥

ततः परमाधार्मिका मद्यमांसकन्दमूलादिभक्षण-मृगयादिहिंसा-कूट-क्रयादिवञ्चन-पैशुन्य-विश्वासघात-खात्रपात-देशग्रामभञ्जन-लुण्टनप्रमुखं पूर्वकृतं दुष्कृतं स्मारयन्ति, वदन्ति च —

[6]भरिउं पिवीलियाईहि सीवियं जइ मुहं तुहऽम्हेहिं ।
तो होसि पराहुत्तो, भुंजिसि रयणीइ पुण मिट्ठं ॥३१९॥

'[7]आरंभ-परिग्गहवज्जियाण निव्वहइ अम्ह न कुडुंबं' ।
इय भणियं जस्स कए तं आणसु दुहविभागत्थं ॥३२०॥

किं बहुना?

[8]अच्छिनिमीलणमित्तं नत्थि सुहं, दुक्खमेव अणुबद्धं ।
नरए नेरइयाणं अहोनिसं पच्चमाणाणं ॥३२१॥

॥ नरकगतिः ४ ॥

---

1. ध्मातकृताग्निवर्णो मेरुसमो यदि पतेत् अयोगोलः परिणम्यते शीतेषु [ नरकेषु ] सोऽपि हिमपिण्डरूपेण ॥ 2. तथा स्फाटिताः अपि उत्कर्तिताः अपि तलिताः अपि छिन्नभिन्नाः अपि दग्धाः भर्जिताः मोटिताश्च त्रोटिताः तथा विलीनाश्च ॥ 3. पापोदयेन पुनरपि मिलन्ति तथैव पारदरस इव, इच्छन्तः अपि खलु न म्रियन्ते कथमपि ते नारकाः वराकाः ॥ 4. प्रभणन्ति ततः दीनाः 'मा मा मारयत स्वामिन्! प्रभो! नाथ!, अतिदुःसहं दुःखमेतत्, प्रसीदध्वम्, मा कुप्यथ इदानीम् ॥ 5. एवं परमाधार्मिकपादेषु पुनः पुनः विलगन्ति, दन्तैः अङ्गुल्यः गृह्णन्ति, भणन्ति दीनानि ॥ 6. भृत्वा पिपीलिकादिभिः सीवितं यदि मुखं तव अस्माभिः ततः भवसि पराभूतः, भुञ्जिष्यसि रजन्यां पुनः मिष्टम् ॥ 7. 'आरम्भ-परिग्रहवर्जितानां निर्वहति अस्माकं न कुटुम्बम्' एवं भणितं यस्य कृते तं आनय दुःखविभागार्थम् ॥ 8. अक्षिनिमीलनमात्रं नास्ति सुखम्, दुःखमेव अनुबद्धं नरके नारकाणां अहर्निशं पच्यमानानाम् ॥

अथ शेषं गतित्रयं दुःखमयं वाच्यम् ।

॥ भवभावना ५॥

अशौचा-ऽऽश्रव-संवर-कर्मनिर्जरा-धर्मस्वाख्यातता एता पञ्चापि भावनाः कदापि भव्य-जन्तुर्भावयति १०॥

कटिस्थकरवैशाखस्थानकस्थनराकृतिम् ।
द्रव्यैः पूर्णं स्मरेल्लोकं स्थित्युत्पत्ति-व्ययात्मकैः ॥३२२॥

[1]अहवा लोगसहावं भाविज्ज " भवंतरम्मि मरिऊणं ।
जणणी वि हवइ धूया, धूया वि हु गेहिणी होइ ॥३२३॥

पुत्तो जणओ, जणओ वि नियसुओ, बंधुणो वि हुंति रिऊ
अरिणो वि बंधुभावं पावंति अणंतसो लोए ॥३२४॥

पियपुत्तस्स वि जणणी खायइ मंसाइं परभवावत्ते ।
जह तस्स सुकोसलमुणिवरस्स लोयम्मि कट्ठमहो ! " ॥३२५॥

॥ लोकः ११॥

अकामनिर्जरारूपात्पुण्याज्जन्तोः प्रजायते ।
स्थावरत्वात् त्रसत्वं वा तिर्यक्त्वं वा कथञ्चन ॥३२६॥

मानुष्यमार्यदेशश्च जातिः सर्वाक्षपाटवम् ।
आयुश्च प्राप्यते तत्र कथञ्चित् कर्मलाघवम् ॥३२७॥

प्राप्तेषु पुण्यतः श्रद्धा कथकश्रवणेष्वपि ।
तत्त्वनिश्चयरूपं तद् बोधिरत्नं सुदुर्लभम् ॥३२८॥

[2]अन्नन्नसुहसमागमचिंतासयदुत्थिओ सयं कीस ? ।
कुण धम्मं जेण सुहं, सो च्चिय चिंतेइ तुह सव्वं ॥३२९॥

[3]जह कागिणीए हेउं सहस्सं हारए नरो ।
अपत्थं अंबगं राया रज्जं तु हारए ॥३३०॥

---

1. अथवा लोकस्वभावं भावयेत् — " भवान्तरे मृत्वा जनन्यपि भवति पुत्री, पुत्र्यपि गेहिनी भवति, पुत्रो जनकः, जनकोऽपि निजसुतः, बान्धवा अपि भवन्ति रिपवः, अरिणोऽपि बन्धुभावं प्राप्नुवन्ति अनन्तशो लोके, प्रियपुत्रस्यापि जननी खादति मांसानि परभवावर्ते, यथा तस्य सुकोशलमुनिवरस्य, लोके कष्टमहो ! ॥ 2. अन्यान्यसुखसमागमचिन्ताशतदुःस्थितः स्वयं कस्मात् ? कुरु धर्मं येन सुखम् , स खलु चिन्तयति तव सर्वम् ॥ 3. यथा काकिन्याः हेतु सहस्र हारयते नरः, अपथ्यं आम्रकं प्राश्य राजा राज्यं तु हारयेत् ॥

[3]गहियं जेहिं चरित्तं जलं व तिसिएहिं गिम्हपहिएहिं ।
कयसुगईपत्थयणा ते मरणंते न सोयंति ॥३३१॥

[4]को जाणइ ' पुणरुत्तं होही कइया वि धम्मसामग्गी ? ' ।
रंकधवं कुणसु महव्वयाण इण्हिं पि पत्ताणं ॥३३२॥

[5]एगदिवसं पि जीवो पव्वज्जमुवागओ अणन्नमणो ।
जइ वि न पावइ मुक्खं, अवस्स वेमाणिओ होइ ॥३३३॥

॥ बोधिः १२॥

इति देशनां श्रुत्वा सञ्जातपरमवैराग्यः श्री**अरिमर्दनः** करौ योजयित्वा भणति — भगवन् ! भवसमुद्रात् संयमयानपात्रेण मां तारयेति ।

अत्रान्तरे सप्रियो **जिवदेवश्रेष्ठी जिनदत्त**मुवाच — " हे वत्स ! संयमार्थमस्मानुमन्यस्व, सुपुत्रो भूत्वाऽस्मांस्तारय, पुनरेवंविधा सामग्री क्व भवे मिलिष्यति ?, यदुक्तम् —

लद्धिल्लियं च बोहिं० ॥३३४॥

ततो वत्स ! वृथा धर्मान्तरायं मा कृथाः, त्वादृशे पुत्रे सति वयं यदि दुर्गतिं पतिष्यामः तत् कस्य पितरः स्वर्गं गन्तारः ?, तन्मोहं विमुच्यानुमतिं देहि " । ततो **जिनदत्तो** दध्यौ — " एकमग्रेऽपि पितरौ संयमार्थिनावभूताम् , द्वितीयं गृहोत्थितोऽयं सार्थो जातः, यद्यवादिते नृत्यति तर्हि वादिते किमुच्यते ?, अथ वारितावपि पितरौ न स्थास्यतः, केवलं खेदं धरिष्यतः, यद्यहमेवं वक्ष्यामि ' तातपादा राज्यं कुर्वन्तु, अहं तु प्रव्रजिष्यामि ' तदप्यनुचितं प्रतिभासते, यतः पितुश्चतुर्थाश्रमो वर्त्तते, ततः शैशवे यथा पित्रोः प्रसादान्निश्चितेन मया धर्मध्यानमेव कृतं तथा सम्प्रति मत्सान्निध्येन परलोकमाराधयताम् " । इति विचिन्त्य दीक्षानुमतिं दत्त्वा सर्वेषां प्रव्रज्यामहोत्सवं **जिनदत्त**श्चक्रे । तदा वैराग्यसञ्जातास्तदनुगताः पञ्चशताः व्यवहारि युता राजराजसुताः प्रव्रजिताः । अथ गुरुरनुशास्ति ददाति, यथा —

अहो ! पवित्रीकृतमद्य गात्रं, कुलं च चक्रे सकलं समुज्ज्वलम् ।
नाम स्वकीयं लिखितं च चन्द्रे, प्रव्रज्यया स्वीकृतया त्वया च ॥३३५॥

1. गृहीतं यैः चारित्रं जलं इव तृषितैः ग्रीष्मपान्थैः कृतसुगतिपाथेयाः ते मरणान्ते न शोचन्ते ॥
2. को जानाति ' वारं वारं भविष्यति कदापि धर्मसामग्री ? ' रङ्कतृप्तिं कुरु महाव्रतानां इदानीमपि प्राप्तानाम् ॥
3. एकदिवसमपि जीवः प्रव्रज्यामुपागतः अनन्यमनाः यद्यपि न प्राप्नोति मोक्षम् , अवश्यं वैमानिको भवति ॥

[1]धन्नाण निवेसिज्जइ, धन्ना गच्छंति पारमेईए ।
पारं इमीइ गंतुं पारं दुक्खाण वच्चंति ।।३३६।।

ततो **जिनदत्तो** राजा सम्यक्त्वमूलं गृहिधर्मं प्रतिपद्य धन्यम्मन्यो नगरं गतः । गुरवोऽन्यत्र सपरिच्छदा विजहुः ।

**[ जिनमन्दिरनिर्मापणानन्तरं जिनदत्तस्य धर्मप्रवृत्तिवर्णनम् ]**

अन्यदा राजा जिनराजभक्तिप्रेरितो वसन्तपुरे उत्तुङ्गतोरणं हिमगिरिशिखराणुकारिणं जननयनमनोहारिणं परितो द्वासप्ततिदेवकुलिकाविराजमानं स्वर्गविमानसमानं महीमहिलालङ्कारहारं महान्तमेकं राजविहारं कारयामास, प्रासादफलं महदस्ति । यदुक्तम् —

जैनं मन्दिरमादरेण कुरुते द्रव्यानुसारेण य-
स्तार्णं दारवमिष्टकादिरचितं हर्षोल्लसन्मानसः ।
चञ्चत्काञ्चनभित्तिसन्मणिमयस्तम्भाभिरामं मह-
द्दिव्यश्रीकुलसङ्कुलं स लभते कल्पे विमानोत्तमम् ।।३३७।।

तत्र चैत्ये त्रिसन्ध्यवाद्यमानपटुपटहध्वनिधोङ्कारो झल्लरीझात्कारो बहुतरप्रौढतरघण्टारणत्कारोऽपि नित्य जायते, तथा प्रत्यहं राजादेशान्नटीनाट्यविधानं गान्धर्वगीतगान च प्रवर्त्तते,

[2]सयं पमज्जणे पुण्णं, सहस्सं च विलेवणे ।
सयसाहस्सिआ माला, अणंतं गीअवाइए ।।३३८।।

तथा सुवर्णादिमयानि विशालस्थाल-सारभृङ्गारकलश-मङ्गलप्रदीपा-ऽऽरात्रिक-चन्दनकच्चोलिका-वासकुम्पिका-स्नात्रजलकुण्डिका-धूपधाना-ऽवधर्षादीनि पूजोपकरणानि नरनारीयोग्यधौतिकाशतं च दुकूलचन्द्रोद्योतशतं चाक्षतपट्टमष्टमङ्गलपट्टमन्यदपि चैत्योपकरणं कोशापवरिकां भूषणमञ्जूषां च वसुधापतिर्विधिज्ञो विधापयति स्म । तथा रत्नजटितसुवर्णजटितमुकुट-कुण्डल-धिक्कृतार्कमण्डलभा-मण्डल-हार-पर्यस्तिका-बाहुरक्षक-तिलक-चक्षुः-श्रीवत्सप्रमुखानार्हतानलङ्करान् कारितवानात्मालङ्कार-कृते कृती क्षितीश्वरः । तथा भूपतिस्त्रिभुवनपतिजिनपतिचैत्ये चतुर्द्वारे विचित्ररचनायुतं मण्डपाना-मष्टोत्तरशतं सूर्यकान्त-स्फटिकादिमणिप्रभाकृतदिनारम्भान् सहस्रस्तम्भान्, मणिसुवर्णमयानि सोपानानि, सुवर्णमयं भूपीठ, सुवर्णमयान् कलशाऽऽमलसारकान्, लहलहायमानपञ्चवर्ण-मयीध्वजपताकाश्च निर्मापयामास, निर्मायमनाः । तथा मणि-रत्न-स्वर्ण-रूप्य-पित्तल-प्रवाला-

1. धन्येषु [ प्रव्रज्या ] निवेश्यते, धन्याः गच्छन्ति पारमेतस्याः, पारमेतस्या गत्वा पारं दुःखानां गच्छन्ति
2 शतं प्रमार्जने पुण्यम्, सहस्रं च विलेपने, शतसाहस्रिका माला, अनन्तं गीतवाद्ये ।।

ऽऽरासपाषाण-ज्योतीरस-चन्दनलेप-प्रभृतिसारपदार्थमयी-ज्योतिर्मयीद्वर्यादिधातुमिश्राः पराः सहस्रा अप्रतिमाश्चतुर्विंशतिजिनप्रतिमा निर्माप्य सोत्सवं प्रतिष्ठाप्य च स्वचैत्यमध्ये सर्वत्र मण्डयति स्म महीमण्डलाखण्डलः । एवमप्रतिबिम्बजिनबिम्बकदम्बं कारयतां महत्फलं भवति, यदुक्तम् —

प्रत्यासीदति तस्य निर्वृतिपदं स्वर्गस्य किं ब्रूमहे,
साम्राज्यं स्वकरस्थमेव विषयाभिख्यं तु सौख्यं ध्रुवम् ।
येनानन्यसमानपुण्यविभुना निर्मापिता धीमता,
रम्याङ्गी त्रिजगत्पतेः प्रतिकृतिः सर्वार्थसंसाधिनी ॥३३९॥

अथ राजा तल्लीनचित्तश्चैत्यालये नियमपूर्वं त्रिसन्ध्यमवन्ध्यसमग्रसामग्र्या जिनपतिपूजां निर्माति, यदुक्तम् —

चित्रं जगत्त्रयीनाथे संलग्ना कुसुमावली ।
स्वर्गापवर्गसम्प्राप्तिफलं भव्येषु सम्भवि ॥३४०॥

चान्दनी चर्चना येन तनौ तेने जिनेशितुः ।
चित्रं तस्य भवग्रीष्मभीष्मतापः क्षयं ययौ ॥३४१॥

तथा राजा स्वयं सेवकीभूय भूयसीभक्तिर्भगवदङ्गे विविधामङ्गिकां रचयति, यदुक्तम् —

पञ्चभिर्वर्णकैर्योऽर्हदङ्गके कुरुतेऽङ्गिकां ।
स पञ्चविषयान् भुक्त्वा पञ्चमीं गतिमश्नुते ॥३४२॥

तथा शेषामिव जिनाज्ञां शिरसि रसानाथो वहन्नस्ति, यदुक्तम् —

[1]जो न कुणइ तुह आणं सो आणं कुणइ तिहुयणस्सावि ।
जो पुण कुणइ जिणाणं, तस्साऽऽणा तिहुयणे देव ! ॥३४३॥

तथा ज्ञानभक्तिभाग् भूपतिः सर्वं सरस्वतीकोशं लेखयामास, यदुक्तम् —

ये तीर्थनाथागमपुस्तकानि, न्यायार्जितार्थैरिह लेखयन्ते ।
ते तत्त्वतो मुक्तिपुरीनिवासस्वीकारपत्रं किल लेखयन्ति ॥३४४॥

शास्त्रं हि तृतीयं लोचनम्, यदुक्तम् —

ये बाह्ये लोचने ताभ्यां बाह्यं वस्तु निरीक्ष्यते ।
अन्तस्तत्त्वेक्षणे किन्तु शास्त्रमान्तरनेत्रति ॥३४५॥

1. यो न करोति तवाज्ञां स आज्ञां करोति–वहति त्रिभुवनस्यापि, यः पुनः करोति जिनाज्ञां तस्याज्ञा त्रिभुवने देव ! ॥

उड्ढमहो तिरिएसुं० ॥ ३४५ ॥

ततश्चतुर्विधश्रीसङ्घस्य चतुर्विधाहार-वन्दनादिप्रकारतो भक्ति चकार सविचारः पृथ्वीपतिः, यदुक्तम् —

यद्भक्तेः फलमर्हदादिपदवी मुख्यं कृषेः सस्यवत्,
चक्रित्व-त्रिदशेन्द्रतादिपदवी प्रासङ्गिकं गीयते ।
शक्तिं यन्महिमस्तुतौ न दधते वाचोऽपि वाचस्पतेः,
सङ्घः सोऽघहरः पुनाति चरणन्यासैः सतां मन्दिरम् ॥३४६॥

य एवं सप्तक्षेत्र्यां धनं व्ययति स धन्यो महाश्रावको भण्यते, यदुक्तम् —

आढ्याः सन्ति भुवस्तले प्रतिपुरग्रामं कियन्तोऽपि ते,
येषां चित्तमलङ्करोति धरणी वृद्ध्या च नाशेन च ।
बिम्बे बिम्बनिकेतने जिनपतेः सङ्घे च भट्टारके,
ज्ञाने त्यागमुपैति यस्य सततं, धन्यस्ततो नापरः ॥३४७॥

एवं व्रतस्थितो भक्त्या सप्तक्षेत्र्यां धनं वपन् ।
दयया चातिदीनेषु महाश्रावक उच्यते ॥३४८॥

यः सद् बाह्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ? ॥३४९॥

पुनरयं भूपतिरवश्यमावश्यकमुभयकालं कर्मक्षयकृते करोति स्म, यदुक्तम् —

प्रणिहन्ति क्षणार्द्धेन साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥३५०॥

[1]आरंभस्स निवारणं सुहमणोवित्तीइ जं कारणं,
अक्खारीण निरोहणं दिण-निसापच्छित्तसंसोहणं ।
कम्माणं मुसुमूरणं तवसिरीभंडारसंपूरणं,
तं धन्ना भवनासणं अणुदिणं सेवंति आवस्सयं ॥३५१॥

तथैतत् प्रतिक्रमणं वैद्यस्य तृतीयौषधवत् सकलदोषव्याधिमपनीय पुण्याङ्गपुष्टिं करोति, यदुक्तम् —

1. आरम्भस्य निवारणम्, शुभमनोवृत्तेः यत् कारणम्, अक्षारीणां निरोधनम्, दिन-निशाप्रायश्चित्त-संशोधनम्, कर्मणां भञ्जनम्, तपःश्रीभाण्डागारसम्पूरणम्, तद् धन्याः भवनाशनं अनुदिनं सेवन्ते आवश्यकम् ॥

[1]वाहिमवणेइ भावे कुणइ अभावे तयं तु पढमम्मि ।
बीयमवणेइ न कुणइ तइयं तु रसायणं होइ ॥३५२॥

भाग्येन विदधे तस्य लक्ष्मीरक्षीणकोशताम् ।
अतोऽसौ सर्वलोकानां मुमुचे सकलान् करान् ॥३५३॥

प्रजास्तस्मिन् नृपेऽभूवन् निरातङ्का निरामयाः ।
चिरायुषो महासौख्याः शुद्धसन्ततिशालिनः ॥३५४॥

लक्ष्मीः सरस्वती चापि विरोधं स्वस्वभावजम् ।
विमुच्य भूपं भेजाते रेजाते ते ततोऽधिकम् ॥३५५॥

ये भूपा भरतार्द्धेऽस्मिन्, विक्रमाक्रान्तशत्रवः ।
तैरप्यसेवि तत्पादद्वयी पुण्यानुभावतः ॥३५६॥

तस्य विद्याबलेनाथ नाथा विद्याभृतामपि ।
वशीभूताः पदाम्भोजसेवाहेवाकिनोऽभवन् ॥३५७॥

**विमलमती-श्रीमती**मुख्यप्रणयिनीभवाः ।
कुमारा भूरयोऽभूवंस्तस्य शस्यगुणालयाः ॥३५८॥

प्रतिदेशं प्रतिद्रङ्गं प्रतिग्रामं प्रतिव्रजम् ।
भूपतिः कारयामास जिनचैत्यधरां धराम् ॥३५९॥

विमानं नित्यमारुह्य, मनश्चिन्तितसंज्ञकम् ।
शत्रुञ्जयादितीर्थेषु यो देवान् सप्रियोऽनमत् ॥३६०॥

अक्षुद्ररूप-सौम्यादिगुणा ये एकविंशतिः ।
श्रावकत्वोचिताः सन्ति भूपतिस्तानशिश्रियत् ॥३६१॥

सम्यक्त्वमूलद्वादशव्रतानि च निरन्तरम् ।
सप्रियः ससुतो भूपः स्वप्रजावदपालयत् ॥३६२॥

**[ अरिमर्दनमुन्यादीनां वसन्तपुरागमनं ततो विहरणं च ]**

एकदा विहरन्तोऽत्र श्रीअरिमर्दनादयः ।
महर्षयो महापूज्या **वसन्तपुर**मागमन् ॥३६३॥

---

1. व्याधिं अपनयति, भावान् करोति अभावान् तकत् तु प्रथमे । द्वितीयं अपनयति, न करोति तृतीयं तु रसायनं भवति ॥

ततो राजविहारादिचैत्यदेवान् नमस्यतः ।
तान् ज्ञात्वा **जिनदत्तो**ऽपि तत्र सत्वरमागतः ॥३६४॥

राजर्षि-जनकर्ष्यादीन् यतीन् सर्वानवन्दत ।
धर्मं श्रुत्वा च तद्वक्त्रात् स्वं कृतार्थममन्यत ॥३६५॥ युग्मम् ॥

ततो मुनिवतंसास्ते व्यहरन्नवनीतले ।
नैकत्र स्थायिनो येन श्रमणाः स्युः समीरवत् ॥३६६॥

कदाचित् तीर्थयात्रायां तानचिन्तितसङ्गतान् ।
श्रीसङ्घसहितो राजा हृष्टचित्तो ननाम च ॥३६७॥

कदाचिद् वायुवेगेन विमानेन नभस्तले ।
गच्छता नरनाथेन ते नीरीक्ष्य नमस्कृताः ॥३६८॥

**तथा सर्वत्र** कारिताभिः पौषधशालाभिरवारितदानशालाभिश्च जीर्णोद्धारैश्च प्रतिवर्षं **सम्मेतादि-तीर्थेषु सङ्घपतीभूय** यात्रया रथयात्रया च परैरप्यायैर्धर्मकार्यैः प्रत्यहं प्राज्ञः पार्थिवोऽगण्यपुण्य-लाभाय बहुधनव्ययं व्यधात् । यदुक्तम् —

कोटिं काणवराटकेन दृषदः खण्डेन चिन्तामणिं,
स्नुह्या कल्पमहीरुहं विषभृता मुक्ताफलानां स्रजम् ।
स क्रीणात्यमृतं विषेण जरता मेषेण चैरावणं,
धर्मं कर्मनिबन्धनैरपि धनैर्गृह्णाति यो बुद्धिमान् ॥३६९॥

**[ अरिमर्दन-जीवदेवादिमुनिदेहावसानश्रवणानन्तरं विस्तरेण जिनदत्तस्य दीक्षाग्रहणनिरूपणम् ]**

अन्यदा देहकार्याणि कृत्वा सर्वालङ्कारभूषितो भूपतिर्भद्रासनं भेजे । इतश्च राज-युवराज-मन्त्रि-महामन्त्रि-श्रेष्ठि-सार्थवाह-सेनापतिप्रभृति-सेवकशतसहस्रसम्पूर्णायां सभायां जायमाने चाभङ्गे नाटयादिरङ्गे, प्रवृत्तासु पौराणिकानां पूर्वपुरुषसङ्कथासु, निष्पद्यमाने विदुषां शास्त्र-संवादे, विधीयमानेषु कारणिकैः राज्यसारेषु व्यवहारे , सत्याप्यमानासु नियोगिभिर्लेख्यकादि-चिन्तासु, केनाऽपि वैदेशिकपुरुषेण सहसा राज्ञोऽग्रे प्रोक्तम् — हे देव ! श्री**अरिमर्दन**राजर्षि-**जीवदेवर्षि**प्रभृतयो यतयो महातीर्थेऽनशनेन दिवं गता इति । ततोऽश्रुविमिश्रलोचनो राजैवं शोचति स्म — “ हहा ! पापिना दैवेन भगवन्तो महर्षयोऽप्यमी संहृताः, अहो ! विधेर्विपरीत-चेष्टां पश्यत, यदुक्तम् —

सृजति तावदशेषगुणालयं पुरुषरत्नमलङ्करणं भुवः ।
तदनु तत् क्षणभङ्गि करोति चेदहह ! कष्टमपण्डितता विधेः ॥३७०॥"

ततो गीतार्थः कश्चिन्मन्त्री जगाद —

"शोचनीयः स एवायं यः स्यात् सत्कृत्यवर्जितः ।
धर्मपाथेयहीनत्वात् संसाराध्वनि दुःस्थितः ॥३७१॥

[1]तव-नियमसुट्ठियाणं कल्लाणं जीवियं पि मरणं पि ।
जीवंतऽज्जंति गुणे, मुआ वि पुण सुग्गइं जंति ॥३७२॥

त्यक्त्वा जीर्णमिदं देहं लभते च पुनर्नवम् ।
कृतपुण्यस्य जीवस्य मृत्युरेव रसायनम् ॥३७३॥

अत एव श्रीवीरस्य **दर्दुराङ्कदेवेन** भक्त्या 'म्रियस्व' इत्युक्तम्" ।

ततो राजा सवैराग्यमिति दध्यौ —

"धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायतां,
आनन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीयते ॥३७४॥

त्यक्त्वा सङ्गमपारपर्वतगुहागर्भे रहः स्थीयतां,
रे रे चित्त ! कुटुम्बपालनविधौ कोऽवाधिकारस्तव ? ।
यस्यैते पुरतः प्रसारितदृशः प्राणप्रियाः पश्यतो,
नीयन्ते यमकिङ्करैः करतलादाकृष्य पुत्रादयः ॥३७५॥

यैस्त्यक्ता किल शाकिनीवदसमप्रमाञ्चिता प्रेयसी,
लक्ष्मीः प्राणसमाऽपि पन्नगवधूवत् प्रोज्झिता दूरतः ।
मुक्तं चित्रगवाक्षराजिरुचिरं वल्मीकवन्मन्दिरं,
निःसङ्गत्वविराजिताः क्षितितले नन्दन्तु ते साधवः ॥३७६॥

तथा प्रियस्वजनमरणं श्रुत्वा स्वस्यापि तद्वदवश्यम्भावि तद् ज्ञात्वाऽपि वराको मूढजीवः स्वहितं न करोति, यदुक्तम् —

---

1. तपो-नियमसुस्थितानां कल्याणं जीवितमपि मरणमपि, जीवन्तः अर्जयन्ति गुणान्, मृता अपि पुनः सुगतिं यान्ति ॥

न य निज्जइ सो दियहो० ॥३७७॥
मरियव्वं चिय० ॥ ३७८ ॥
जाणिज्जइ चिंतिज्जइ ॥ ३७९ ॥ "

एवमुत्तरोत्तरविशुद्धपरिणामेन राज्ञः संयमेच्छाऽजनि । ततः सकलमन्त्रिमुख्यं **विमलबोधाख्यं** महामात्यमिति भूपतिर्बभाषे — हे मन्त्रिराज ! ते मुनिराजहंसा धन्याः ये तपश्चूर्णि चूर्णयित्वा शम-संवेगपक्षौ कृत्वा समुड्डीय सुगतिं गताः, अहं पुनरधन्योऽस्मि पापपङ्कलिप्तोऽस्मि च, यन्ममाऽऽत्मा महीममतासम्बन्धेन कर्ममलमलीमसोभ वन्नस्ति, 'राज्ञि राष्ट्रकृतं पापम्' इति वचनात् । ततः पक्वबुद्धिर्मन्त्री राजाशयं ज्ञात्वा तन्निषेधार्थं जगाद — "हे नाथ ! पृथ्वीसम्बन्धेन तव सदाचारस्य पुण्यं घटते, न तु पापम्, यदुक्तम् —

यथैव पापस्य कुकर्मभाजां षष्ठांशभागी नृपतिः कुवृत्तः ।
तथैव पुण्यस्य सुकर्मभाजां षष्ठांशभागी नृपतिः सुवृत्तः ॥३८०॥

एतत् कथम् ?, यतः —

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्त्तन्ते यथा राजा तथा प्रजाः ॥३८१॥ "

ततो राजा प्राह — "मादृशां सदाचारत्वं क्वाऽस्ति, यज्जिनवचनादित्ये समुदितेऽप्यहं मोहनिद्राघूर्णितोऽस्मि, यतः —

[1]धिद्धी ! अलद्धपुव्वं जिणवयणरसायणं पि घुंटेउं ।
विसयमहाहालाहलल्होहलिएहिं उग्गलियं ॥३८२॥

एतन्निद्रालक्षणं यदमृतोपरि विषं पीतम्" ।

ततो मन्त्र्याह — "तव विवेकशिरोमणेर्मोहनिद्राऽपि न घटते, यदुक्तम् — को जागरो ? विवेकी ० ॥ ३८३ ॥

तथा —

[2]धम्मीणं जागरिया, आहम्मीणं तु सुत्तया होइ ।
वच्छाहिवभइणीए अकहंसु जिणो **जयंतीए** ॥३८४॥ "

---

1. धिग धिक् ! अलब्धपूर्वं जिनवचनरसायनं अपि पिबित्वा विषयमहाहालाहलाऽऽकुलैः उद्गीरितम् ॥
2. 'धर्मिणां जागर्या, अधर्मिणां तु सुप्तता भवति' [इति] वच्छाधिपभगिन्याः [प्रश्नोत्तरे] अकथयद् जिनः [वीरः] जयन्त्याः ॥

ततो राजाऽऽह — मादृशां विवेको धर्मश्च क्वास्ति ?, यदहं महारम्भ-परिग्रह-जम्बाले गर्त्ताशूकर इव मग्नोऽस्मि, संसारव्यापारलग्नोऽस्मि, तथा यदि देश-राज्यादि-कार्याणि स्वयं कुर्वन्नस्मि परैरपि कारयन्नस्मि तदित्थं कर्मबन्धे मम मोक्षः क्वाऽपि नास्ति ।

अथ मन्त्र्यवोचत् — "हे भूप ! तव चित्तं तावदतीव शुद्धमस्ति, निर्मलचित्तस्य तु वाक्कायाभ्यां कर्म कुर्वतोऽपि पद्मिनीपत्रस्येव लेपो न स्यात्, अथ स्तोक एव कर्मबन्धो भवति, यदुक्तम् —

[1]उल्लो सुक्को य दो छूढा गोलया मट्टियामया ।
दो वि आवडिया कुड्डे, जो उल्लो सोऽत्थ लग्गई ॥३८५॥
[2]एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा से सुक्कगोलए ॥३८६॥

तथा —

[3]वावाराणं गुरुओ मणवावारो जिणेहिं पन्नत्तो ।
जो णेइ सत्तमीए, अहवा मुक्खं पि जो णेइ ॥३८७॥

अत्र प्रसन्नचन्द्रराजर्षिदृष्टान्तो यथावसरं वाच्यः । तथा 'मम नगरे सर्वलोको धार्मिकः' इति वदतः श्रेणिकस्याऽग्रेऽभयकुमारेण नवीनकारितश्वेत-कृष्णप्रासादबुद्ध्या पञ्चशतहल-शकटाद्यारम्भं कुर्वतामप्यानन्द-कामदेवादीनामेव पुण्यवत्त्वं स्थापितम्, अतो मनःशुद्धिरेव सर्वत्र विलोक्यते, यतः

मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते तितीर्षन्ति महार्णवम् ॥३८८॥

किं बहुना ?, 'मन एव मनुष्याणां, कारणं बन्धमोक्षयोः' ।

अथ राजा ब्रूते — "अस्मादृशां कषाय-विषयाक्रान्तानां मनःशुद्धिः क्वाऽस्ति ? साऽपि केवलां क्रियां विना मोक्षफलदा न भवति, यदुक्तम् —

क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
यथा स्त्री-भक्ष्यभोगज्ञो न ज्ञानात् सुखितो भवेत् ॥३८९॥

---

1. आर्द्रः शुष्कश्च द्वौ क्षिप्तौ गोलकौ मृत्तिकामयौ द्वावपि आपतितौ कुड्ये, यः आर्द्रः सोऽत्र लगति ॥ 2. एवं लगन्ति दुर्मेधसः ये नराः कामलालसाः, विरक्तास्तु न लगन्ति, यथा स शुष्कगोलकः ॥ 3. व्यापाराणां गुरुकः मनोव्यापारः जिनैः प्रज्ञप्तः; यः नयति सप्तम्याम्, अथवा मोक्षमपि यो नयति ॥

[1]आउज्ज-नट्टकुसला वि नट्टिया तं जणं न तोसेइ ।
जोगं अजुंजमाणी निंदं खिसं च पावेइ ॥३९०॥

[2]जाणंतो वि य तरिउं काइयजोगं न जुंजइ नईए ।
सो वुज्झइ सोएणं, एवं नाणी चरणहीणो ॥३९१॥

तथा क्षायिकसम्यक्त्वमपि मनःशुद्धेरेव, तेनापि चारित्रं विना मोक्षो न भवति, यदुक्तम् —

[3]**दसारसीहस्स** य **सेणियस्स**, **पेढालपुत्तस्स** य **सच्चइस्स** ।
अणुत्तरा दंसणसंपया तया, विणा चरित्तेण अहोगइं गया ॥३९२॥

इत्यहं जानन्नपि संसारं दुःखभाण्डागारं पश्यन्नपि पुत्र-कलत्रादिपरिहारं कृत्वा संयमाङ्गीकारमद्यापि भुक्तभोगोऽपि जातजरायोगोऽपि यन्न करोमि तेनाऽऽत्मानं शोचामि" ।

ततो मन्त्र्यूचे — "प्रभो! गार्हस्थ्येऽपि संयमफलं लभ्यते, यदुक्तम् —

वनेऽपि दोषाः प्रभवन्ति रागिणां, गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्त्तते, निवृत्तरागस्य गृहं तपोवनं ॥३९३॥

तथा —

इत्याहोरात्रिकीं चर्यामप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति ॥३९४॥

सामायिकव्रतस्थस्य गृहिणोऽपि स्थिरात्मनः ।
**चन्द्रावतंसकस्येव** क्षीयते कर्मसञ्चितम् ॥३९५॥

पुनरन्तःपुरस्थस्यापि **भरत**चक्रधरस्य केवलज्ञानं जज्ञे, तथा वंशाग्रे नृत्यन्**निलापुत्रः** केवली जातः, तथा पाणिग्रहणं कुर्वतोऽष्टभिः प्रियाभिः सह **गुणसागर**नाम्नो व्यवहारिसुतस्य चतुरिकामध्ये केवलज्ञानमुदपद्यत, तथा —

श्रावको बहुकर्मापि, पूजाद्यः शुभभावतः ।
दलयित्वाऽखिलं कर्म, शिवमाप्नोति सत्वरम् ॥३९६॥

किं बहुना ?,

[4]गिहासमसमो धम्मो को अण्णो एत्थ विज्जइ ? ।
दिज्जंति जत्थ दाणाइं दीणाऽणाहाइपाणिणं ॥३९७॥

---

1. आतोद्य-नाट्यकुशलाऽपि नर्तिका तद् जनं न तोषयति योगं अयुञ्जाना, निंदां खिंसां च प्राप्नोति ॥ 2. जनन्नपि तरितुं काययोगं न योजयति नद्यां स उह्यते श्रोतसा, एवं ज्ञानी चरणहीनः ॥ 3. दशारसिंहस्य च श्रेणिकस्य पेढालपुत्रस्य च सत्यकिनः अनुत्तरा दर्शनसम्पदा तदा, विना चरित्रेण अधोगतिं गताः ॥ 4. गृहाश्रमसमः धर्मः कः अन्यः अत्र विद्यते ?, दीयन्ते यत्र दानानि दीनाऽनाथादिप्राणिभ्यः ॥

ततो देव ! त्वमपि गृहस्थ एव धर्मध्यानं मोक्षहेतवे कुरु " ।

ततो राजा प्राह — " भो मन्त्रिन् ! एतान् भरतादीन् गृहिकेवलिनः प्रत्येकं पश्य, यदेषां सर्वेषां भावचारित्रेणैव केवलज्ञानमजनि, एषां भवितव्यताऽपि तादृशी बभूव, पुनरीदृशा गृहिकेवलिनो गणिता एव जाताः, तत् तदालम्बनं न ग्राह्यम् , यदुक्तम् —

[1]जाणिज्ज मिच्छदिट्ठी जे पडणालंबणाइं घिप्पंति ।
ते पुण सम्मद्दिट्ठी जेसि मणो चडणपयडीए ॥३९८॥

विशिष्टः श्रावकस्तप्तायोगोलकरूप एव, यदुक्तम् —

[2]जीवघायरओ धम्मं जं कत्थइ कुणई गिही ।
साधुधम्मगिरिंदस्स राइमित्तो वि नो इमो ॥३९९॥

तथा गर्भयोगिनो जितेन्द्रिया अपि तीर्थकरा यदि संयमं गृहीत्वा तपः कुर्वन्ति ततः परेषां किमुच्यते ? यतः —

[3]तित्थयरो चउनाणी सुरमहिओ सिज्झियव्वयधुवम्मि ।
अणिगूहियबलविरिओ सव्वत्थामेण उज्जमइ ॥४००॥
[4]किं पुण अवसेसेहिं दुक्खक्खयकारणा सुविहिएहिं ।
होइ न उज्जमियव्वं सपच्चवायम्मि माणुस्से ? ॥४०१॥"

इत्युक्त्वा वैराग्यरञ्जितो राजा संयमग्रहणायोदतिष्ठत् । तेन प्रधानेन बहूक्तियुक्तिवारितोऽपि न तस्थौ, यद् गजः कर्णगृहीतः सिंहः शृङ्खलाबद्धश्च न तिष्ठिति । तथा —

विषयगणः कापुरुषं करोति वशवर्तिनं, न सत्पुरुषम् ।
बध्नाति मशकमेव हि लूतातन्तुर्न मातङ्गम् ॥४०२॥

**[ प्रव्रजितुकामस्य जिनभवनस्थितस्य जिनदत्तस्य केवलज्ञानावाप्तिः, जिनदत्तकेवलिनो देशना च ]**

ततो राजा श्री**जिनदत्तो** दीक्षाग्रहणार्थं गुरुपार्श्वे गन्तुकामश्चचाल । ततः पृष्ठलग्नानां करौ योजयित्वा संयमाद् वारयतां पुत्र-प्रियादिसर्वस्वजनानां पौरजनानां च मोहवचनानवगणय्य

1. जानीयात् [तान्] 'मिथ्यादृष्टीन्' ये पतनालम्बनानि गृह्णन्ति । ते पुनः सम्यग्दृष्टयः येषां मनः आरोहणप्रकृतौ ॥

2. जीवघातरतः धर्मं यं कुत्रचित् करोति गृही, साधुधर्मगिरीन्द्रस्य राजिकामात्रोऽपि न अयम् = गृहिधर्मः ॥

3. तीर्थकरः चतुर्ज्ञानी सुरमहितः ध्रुवसेधितव्ये अनिगूहितबलवीर्यः सर्वस्थाम्ना उद्यच्छति ॥ 4. किं पुनः अवशेषैः दुःखक्षयकारणाय सुविहितैः भवति न उद्यमितव्यं सप्रत्यपाये मानुष्ये ॥

नगरान्निर्गच्छन् नरपतिर्निजं जिनभवनं निरीक्ष्य देववन्दनार्थं परमभक्त्या तत्र जगाम। ततः पृथ्वीशस्य निरञ्जनजिनप्रतिमां वन्दित्वा निभालयतस्तन्मयतया वीतरागत्वं ध्यायतश्च प्रतिक्षणं प्रवर्द्धमानविशुद्धतरपरिणामेन क्षपकश्रेणिमारूढस्य ज्ञानावरणीयादिघातिकर्मचतुष्टये क्षीणे तत्क्षणं केवलज्ञानमुत्पेदे। यतः —

[1]रे! मन एक झबुक्कडउ जइ किमइ थिरु थाइ।
चंदि लिहावउं लीहडी, जगि ऊभावउं बाहि ॥४०३॥

ततो 'जयतु समुत्पन्नज्ञानः श्री**जिनदत्त**राजर्षिः' इत्याद्याकाशवाणीमुच्चरन्त्या शासनदेवतया दत्तवेषस्तत्कालसमायातसुर-नरनिकरकृतकेवलमहोत्सवः सुरकृतसहस्रदलकमलमलङ्कुर्वाणः श्री**जिनदत्त**केवली धर्मदेशनां ददाति। यथा —

"भो भो भव्याः! भवकोटिदुष्प्रापां मनुष्यभवादिसमग्रसामग्रीं प्राप्य पुण्यमेव कुरुध्वम्, यन्मयाऽपि पूर्वभवकृतैः दानादिभिः सुकृतैः सत्कुल-सल्लक्ष्मी-सुराज्य-सद्भोगादिकं प्राप्तम्। इहापि भवे धर्मकल्पद्रुम एव निर्ममतादिभावनाभूरिनीरसिक्तो मह्यं केवलज्ञानफलं ददौ। ततो यूयमपि पुण्यमेव कुरुत। यतः —

धर्माज्जन्म कुले कलङ्कविकले जातिः सुधर्मात् परा,
धर्मादायुरखण्डितं गुरु बलं धर्माच्च नीरोगता।
धर्माद् वित्तमनिन्दितं निरुपमा भोगाः सुकीर्तिः सुधीः,
धर्मादेव च देहिनां प्रभवतः स्वर्गाऽपवर्गावपि ॥४०४॥

यावच्चित्तं च, वित्तं च, यावदुत्सहते मनः।
तावदात्महितं कुर्याद्, धर्मस्य त्वरिता गतिः ॥४०५॥

यावन्न ग्रसते रोगैर्यावन्नाभ्येति ते जरा।
यावन्न क्षीयते चायुस्तावत् कल्याणमाचर ॥४०६॥

यास्त्रिलोकेऽपि दृश्यन्ते सम्पदः सुख-दुःखयोः।
जानीहि ताः फलं भद्र! प्रकटं पुण्य-पापयोः ॥४०७॥

किं चिन्तामणि-कल्पद्रु-कामधुक्प्रमुखैः स्तुतैः?।
पुण्यमेव सतां स्तुत्यं यस्यैते किङ्करा इव ॥४०८॥

---

1. रे! मनसः एक उद्योतः यदि किमपि स्थिरः स्यात् [ तर्हि ] चन्द्रमसि लिखापयामि रेखाम्, जगति [ च ] उद्भावयामि बाहू ॥

स्थैर्यं सर्वेषु कार्येषु शंसन्ति नयपण्डिताः ।
बह्वन्तरायविघ्नस्य धर्मस्य त्वरिताः गतिः ॥४०९॥ ”

ततः सभ्यलोकैः पृष्टम् — भगवन्! निजं भवस्वरूपं श्रावय । ततः केवलिना प्रोक्तम्—

[ जिनदत्तकेवलिकथिता निजपूर्वभवकथा ]

**जम्बूद्वीपेऽत्र दक्षिणभरतार्द्धे** मध्यमखण्डे बहुनगर-ग्रामाऽऽकर-पत्तनादिभूषितो**ऽवन्ति**नामा देशः । तत्र **चण्डप्रद्योतं** गृहीत्वा स्वदेशं गच्छता **उदायननृपेण** निवेशितं **दशपुरं** नाम नगरं सर्वर्द्धिप्रवरं वापी-कूप-तटाकादिशोभितमस्ति । तत् पुरं पुन**रवन्तिनाथो** दृप्तारिवारनिवारणो **विक्रमवर्म**नामा राजा प्रतिपालयति । तत्र पुरे **शिवधन**नामा वणिग् वसति । तस्य भार्या **यशोमती** समयौवन-रूप-शीलसम्पन्नाऽस्ति । तयोः पूर्वार्जितपुण्यफलमनुभवतोः कालक्रमेण **शिवदेव**नामा पुत्रो जातः । यावता सोऽष्टवर्षो जातः तावता पिता **शिवधनः** शिरोवेदनया पञ्चत्वं प्राप्तः । ततो **यशोमती** पतिविरहाग्निज्वलितहृदया विविधकरुणप्रलापपरायणा तस्य मृतकृत्यानि कृत्वा चिन्तयति, यथा —

“ [1]अव्वो ! किं नाम मए विच्छोहो कस्सई पुरा रइओ ? ।
पडिआ जेणाऽयंडे दुक्खचडक्का मह सिरम्मि ॥४१०॥

[2]वयभंगो किं व कओ ?, ‘ रंडा होसु ’त्ति का वि परिसविआ ।
हा हा ! केरिसपावस्स एरिसं घोरमाहप्पं ? ॥४११॥

[3]किंवा कयंत ! निग्घिण ! अवरद्धं किं पि तुज्झ मे पुव्वं ? ।
इअ दुस्सहाइं जेणं कोवफलाइं पयंसेसि ॥४१२॥ ”

एवं सा विलपन्ती पुरपुरन्ध्रीभिः करुणया संस्थापिता तं बालं पालयति ।

अत्रान्तरे स्तोकदिनमध्ये न ज्ञायते विभवः कुत्राऽपि गतः । ततस्तया चिन्तितम्— “धनिकेन सह धनं गतम्, दारिद्र्यं प्रसृतम्, पुण्यैरर्थो भवति, तानि पुण्यानि भर्त्रा सह गतानि, अथ मम निर्भाग्यायाः को जीवनोपायः ? परगृहकर्मकरणं विनाऽन्योपायो नास्ति, अहो ! विधिविलसितं मद्गृहे ये योजितहस्ताः कर्म कुर्वन्ति स्म तद्गृहेषु मया कथं कार्यं

---

1. अहो ! किं नाम मया वियोगः कस्यचित् पुरा रचितः ? पतिता येन अकाण्डे दुःखविद्युद् मम शिरसि ॥
2. व्रतभङ्गः किं वा कृतः ?, ‘ रण्डा भव ’ इति काऽपि परिशप्ता, हा हा ! कीदृशपापस्य ईदृशं घोरमाहात्म्यम् ॥
3. किंवा कृतान्त ! निर्घृण ! अपराद्धं किमपि तव मया पूर्वम् ?, एवं दुःसहानि येन कोपफलानि प्रदर्शयसि ॥

कर्तव्यम् ?, अथवा दैवभग्नदन्ताया मे कोऽभिमानः ?, यादृशं वाद्यते तादृशं नृत्यते, यादृग् वायुर्वाति तादृगाश्रयो गृह्यते, एकदशया कस्याऽपि कालो न याति, यतः —

कस्य स्यान्न स्खलितं ?, पूर्णाः सर्वे मनोरथाः कस्य ? ।
कस्येह सुखं नित्यं ? दैवेन न खण्डितः को वा ? ॥४१३॥

तथापि नात्र स्थातुं युज्यते, यत् पूर्वावस्था शल्यति, यदुक्तम् —

[1]इह भमिआ इह रमिआ, इह कुविया इह पसाइआ इत्थ ।
दीसंति ते पएसा, ते पुरिसा नेव दीसंति ॥४१४॥

ततस्तत्र कुत्रापि व्रजामि यत्र निजलोकं न पश्यामि ” ।

एवं विचार्य सा **शिवदेवेन** सह **दशपुरा**न्निर्गत्य कियता कालेन **उज्जयिनी**मागत्य एकं सविवेकं श्रेष्ठिनं समाश्रिता । तेनापि भगिनीप्रतिपत्तिपूर्वं दत्ताश्रया सुखेन खण्डन-पेषणादि तद्गृहे करोति **शिवदेवो**ऽपि वत्सपालत्वं विधत्ते । एवमतिक्रान्तः कोऽपि कालः ।

अन्यदा वने वत्सरूपाणि चारयता **शिवदेवेन** धर्मध्यानस्थित एको महातपस्वी मुनिर्दृष्टः । लघुकर्मतया सबहुमानं वन्दित्वा तेन पदोर्विश्रामणा कृता, हर्षनिर्भरेण किञ्चित् कालं तत्समीपे स्थितम् । गृहमागत्य च मातुस्तत् प्रोक्तम् । मात्राऽपि स बहुमेने, भणितं च — “ वत्स ! धन्यो महात्मा यः परलोकार्थे तपस्तप्यते, स पुनर्धन्यातिधन्यो यस्तस्मै अन्नपानादिकं दत्ते, अस्माकं पुनः पुण्यरहितानां न तपो न दानं, नरपशुतया मोघजन्म याति, यतः —

येषां न विद्या न तपो न दानं, न चापि शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति ॥४१५॥

ततो वत्स ! त्वयाऽपि प्रत्यहं तद्वन्दनेन स्वात्मा कृतार्थनीयः ” ।

ततः **शिवदेवो** विशिष्टभक्तिभरनिर्भरो नित्यं वत्सरूपचारणमिषेण तं वन्दते, पर्युपास्ते, एवं च चिन्तयति — “ यद्यसौ मुनिर्मम गृहे पारणं करोति तदा सुन्दरं स्यात्, अथवा कुतो रङ्कस्य रत्नं सम्पद्यते ?, अथवा मातङ्गस्य कुतोऽर्द्धासनम् ?, अन्यच्च —

वनकुसुमं कृपणश्रीः कूपच्छाया सुरङ्गधूली च ।
तत्रैव यान्ति नाशं मनोरथा भाग्यहीनानाम् ॥४१६॥

तथा —

1. इह भ्रमिता, इह रमिता, इह कुपिता, इह प्रसादिता, अत्र दृश्यन्ते ते प्रदेशाः, ते पुरुषाः नैव दृश्यन्ते ॥

[1]पत्ते वि अ पाहुणए किं काही दुग्गओ तुरंतो वि ? ।
अंधो मिलिएहिं वि लोयणेहिं अंधो च्चिय वराओ ॥४१७॥

सर्वथा नास्ति मे भाग्यम्" । एवं चिन्तयतस्तस्य माघी पूर्णिमा समागता । तस्मिन् दिने लोकमध्ये मिथो लाहनानि भ्रमन्ति । भोजनसमये **शिवदेवो** गृहमागतः तावता 'सुसहजेयम्' इति **यशोमत्या** गृहे लाहनानि समेतानि । ततः **शिवदेवो** भोक्तुं निविष्टः ।

अत्रान्तरे तद्वासनाप्रेरित इव गोचरचर्याक्रमेण कोऽपि ऋषिः शिवदेवभवने समागतः । तं दृष्ट्वा रोमाञ्चितेन तेन चिन्तितम् —

" [2]मरुत्थलीए जह कप्परुक्खो, मायंगगेहे जह हत्थिराया ।
दरिद्दगेहे जह हेमवुट्ठी, मुणी महप्पा तह अम्हगेहे ॥४१८॥।

[3]एआइं ताइं चिरसंचिआइं तिन्नि वि कमेण पत्ताइं ।
साहूण य आगमणं वित्तं च मणप्पसाओ अ ॥४१९॥

सर्वथा पुण्यवानहम्, एतल्लाभार्थं क्षीणा मे धनऋद्धिः" इति भावयता तेन सम्मुखं गत्वा ऋषिर्वन्दितः । ततोऽनेन कूरभाजनं गृहीत्वा तदर्द्धं दत्तम्, 'जननी खेदं मा कार्षीः' इति शङ्कया सर्वं न दत्तम्, पुनर्गृहीतं पायसभाजनं तस्यापि तथैवार्द्धं दत्तम्, पुनर्दत्तौ खण्डशर्करागर्भौ द्वौ मण्डकौ । अत्रान्तरे सर्वरससम्पूर्णस्थाली समागता, ततो जनन्या भणितः— वत्स ! एतदपि महाभागाय ऋषये देहि । ततो वर्द्धमानशुभाध्यवसायेन ऋषेढौकिता स्थाली । ऋषिणाऽपि श्रद्धावृद्धिं दृष्ट्वा कवलमात्रं गृहीतम्, भणितं च — धर्मशील ! सम्पूर्णं जातम्, इदानीमाग्रहं मा कुरु । ततो भक्ति-बहुमानपूर्वं हृष्टमुखपङ्कजेन कृतकृत्यमात्मानं मन्यमानेन **शिवदेवेन** कृतवन्दनानुव्रजनो मुनिर्निर्गतः ।

अत्रान्तरे लाहनकहस्ताभिः पञ्चभिः कन्याभिः **शिवदेवः** प्रशंसितः — "हे गुणवज्जन-सज्जनशिरोमणे ! त्वं धन्योऽसि येनेदृशे सुपात्रे वितीर्णमिति, अपि च —

---

1. प्राप्तेऽपि च प्राघूर्णके किं करिष्यति दुर्गतः त्वरन्नपि ?, अन्धः मिलितैः अपि लोचनैः अन्धः एव वराकः ॥

2. मरुस्थल्यां यथा कल्पवृक्षः, मातङ्गगृहे यथा हस्तिराजः, दरिद्रगेहे यथा हेमवृष्टिः, मुनिः महात्मा तथा अस्मद्गेहे ॥

3. एतानि तानि चिरसञ्चितानि त्रीणि अपि क्रमेण प्राप्तानि साधूनां च आगमनम्, वित्तं च, मनःप्रसादश्च ॥

[1]दिन्नं तस्स गणिज्जइ, अपहुप्पंतो वि धणसमिद्धीए ।
जो देइ इट्ठमिट्ठं चिरपत्तं सत्तिसंजुत्तो ॥४२०॥

[2]दाणोवभोगपरिवज्जिएण दव्वेण किं व किवणस्स ? ॥
लद्धेण वि नत्थि गुणो पक्ककविट्ठेण कायस्स ॥४२१॥

तथा —

[3]जे पूअंति कयत्था साहुजणं निअविढत्तदव्वेण ।
ताण सुलद्धो जम्मो, सफला ताणं च धणरिद्धी ॥४२२॥

[4]देविंद-चक्कि-केसव-हलधर-मंडलियपमुहरिद्धीओ ।
जे विअरंति सुपत्ते तेसिं करपल्लवत्थाओ ॥४२३॥ "

एवमनुमोद्य पञ्चापि कन्याः स्वस्वगृहं गताः । **शिवदेवो**ऽपि तुष्टचित्तो भोजनमकार्षीत् ।

ततः प्रभृति च शुभजीवितत्वेन जीवित्वा आयुःक्षये मृतः सन् **वसन्तपुरे जीवदेव-श्रेष्ठगृहे जिनदत्त**नामाऽहमुत्पन्नः । पात्रदानफलेनेदृशी राज्यर्द्धिर्मे जाता, जननीशङ्काविरत्या च स्तोकस्तोकमन्तरे दुःखं जातम् । पूर्वभवे याभिर्दानानुमोदना कृता ताः पञ्चापि मम पत्न्यो रूपसौभाग्यादिभाजनं जाताः ।

इति केवलिपूर्वभवं श्रुत्वा चमत्कृता जना ऊचुः — "अहो ! दानधर्मफलं पश्यत, यदुक्तम् —

धर्माणां तेन दानेन समं का समशीर्षिका ? ।
करं देवाधिदेवोऽपि यस्यार्पयति सङ्गमे ॥४२४॥

तथा —

दानेन **भरतश्चक्री**, दानेन **ऋषभो** जिनः ।
दानेन **शान्तिनाथस्तु**, दानेन चरमो जिनः ॥४२५॥

प्रस्तावे भाषितं वाक्यं, प्रस्तावे दानमङ्गिनाम् ।
प्रस्तावे वृष्टिरल्पाऽपि, भवेत् कोटिफलप्रदा ॥४२६॥

---

1. दत्तं तस्य गण्यते, अप्रभवन्नपि धनसमृद्धया यः ददाति इष्टमिष्टं चिरप्राप्तं शक्तिसंयुक्तः ॥
2. दानोपभोगपरिवर्जितेन द्रव्येण किं वा कृपणस्य ?, लब्धेन अपि नास्ति गुणः पक्वकपित्थेन काकस्य
3. ये पूजयन्ति कृतार्थाः साधुजनं निजोपार्जितद्रव्येण तेषां सुलब्धं जन्म, सफला तेषां च धनर्द्धिः ॥
4. देवेन्द्र-चक्रि-केशव-हलधर-माण्डलिकप्रमुखर्द्धयः ये वितरन्ति सुपात्राय तेषां करपल्लवस्थाः ॥

[ **विमलमत्यादीनां पञ्चानां जिनदत्तपत्नीनां जातिस्मरणं दीक्षाग्रहणं जिनदत्तकेवलिमोक्षगमनं च** ]

अत्रान्तरे विमलमत्यादीनां पञ्चानामपि जातिस्मरणं जातम्, ततो भवविरक्ताः पतिमार्गानुरक्ता बहुलोकयुक्ता **विमलमत्याद्याः** पञ्चापि प्रियाः करयोजनपूर्वं प्रव्रज्यां प्रार्थयन्तीः प्रव्राज्य केवली 'किमेतत्?' इति साश्चर्यैं राजसहस्रैरनुगम्यमानो महीमण्डले चिरं विहृत्यानेकलोकान् प्रतिबोध्य घनघातिकर्मक्षये मुक्तिपदं प्राप ।

[ **जिनदत्त-विमलमतीपुत्रस्य विमलबुद्धिकुमारस्य राज्यपालननिरूपणपूर्वकं ग्रन्थोपसंहारः** ]

ततस्तस्य पट्टे सर्वराजप्रधानपुरुषैर्**विमलमती**कुक्षिभूर्**विमलबुद्धि**कुमारः प्रतिष्ठितः सन् प्राज्यं राज्यं पालयन् सकलश्रेयःसुखानि भुङ्क्ते ।

तदेवं धर्मतः श्रुत्वा फलं यावन्महोदयम् ।
उत्तरोत्तरसौख्याय कार्यो धर्मोद्यमो बुधैः ॥१॥

[ **ग्रन्थकारप्रशस्तिः** ]

एतां श्री**जिनदत्त**भूपतिकथां श्री**पूर्णिमापक्ष**स-
न्मुख्यः श्री**गुणसागरा**ख्यसुगुरोः शिष्येण संक्षेपतः ।
वेदोर्वीधरविश्ववर्ष( १४७४ )विहितां पुण्यप्रभावाद्भुतां
श्रुण्वन्तु श्रवणामृतां शिवकृते भव्याः ! भवन्तश्चिरम् ॥१॥

**संयमसिंह**गणेशाग्रहतः श्री**गुणसमुद्रसूरि**वरैः ।
मुग्धानुग्रहबुद्ध्या कृता कथेयं चिरं जीयात् ॥२॥

॥ इति जिनदत्तकथा सम्पूर्णा ॥

॥ ग्रन्थाग्रम् — २६३७ अक्षर २६ ॥

॥ शुभं भवतु ॥ [1]सं० १६६७ वर्षे ॥

1. प्रतिलेखनवर्षमिदम् ॥

# प्रथमं परिशिष्टम्

## ग्रन्थगतविशेषनाम्नामनुक्रमः


| विशेषनाम | किम् ? | पृष्ठांकः |
|---|---|---|
| अग्निस्तम्भिनी | विद्या | २२ |
| अञ्जनी | ,, | २२, २५ |
| अनिबन्धनी | ,, | २२ |
| अरिमर्दन | राजा निर्ग्रन्थश्च | २, ४६. ६२, ६४तः ७२, ७४, ७९, ८३, ८४, ८९, ९० |
| अवन्ती | देशः | ९१ |
| अशोकश्री | राज्ञी | २० |
| उज्जयिनी | नगरी | ९२ |
| उदायन | राजा | ९१ |
| औदत्त | श्रेष्ठी | ८, १३, १८, १९, ६० |
| कान्तिपुरी | नगरी | ३२ |
| गजवशीकरणी | विद्या | ३५ |
| गुणसमुद्रसूरि | जैनाचार्यः–प्रस्तुग्रंथकारः (ग्रंथकारप्रशस्तौ) | ९५ |
| गुणसागर | जैनाचार्यः (ग्रंथकार-प्रशस्तौ) | ९५ |
| गुणाकरसूरि | जैनाचार्यः | ४० |
| घनवाहन | राजा | ९ |
| चण्डप्रद्योत | ,, | ९१ |
| चम्पापुरी | नगरी | ३, १८, १९, २४, २५, २८, ५८, ६० |
| जम्बूद्वीप | द्वीपः | ९१ |
| जलशोषणी | विद्या | २२ |
| जिनदत्त | श्रेष्ठिपुत्रः, श्रेष्ठी, राजा, निर्ग्रन्थश्च | १, ६–१३, १५, १९–२८, ३८, ४०, ४७. ५१, ५८, ६०, ६१, ६३–६६, ६८–७२, ७९, ८०, ८४, ८९, ९०, ९४ |
| जिनदत्तकथा | प्रस्तुतग्रंथः (ग्रंथकार-प्रशस्तौ) | ९५ |
| जिनदत्तकथानक | ,, | १ |
| जिनश्री | श्रेष्ठिनी | २ |
| जीवदेव | श्रेष्ठी निर्ग्रन्थश्च | २, ३८, ४७, ७१, ७९, ८४, ९४ |
| तारणी | विद्या | २२, २७ |
| दशपुर | नगरम् | ८, १८, ६०, ९१, ९२ |
| धर्मघोषसूरि | जैनाचार्यः | ७४ |
| नगरपुरक्षोभिणी | विद्या | २२ |
| पूर्णिमापक्ष | निर्ग्रन्थगच्छः (ग्रन्थकार-प्रशस्तौ) | ९५ |
| प्रतिष्ठानपुर | नगरम् | २८ |
| बहुरूपिणी | विद्या | २२ |
| भरतखण्ड | भूखण्डः | १ |
| मकरध्वज | राजा | ३२ |
| मदनमञ्जरी | राजपुत्री श्रेष्ठिनी राज्ञी च | ३४, ३६, ३९, ६० |
| यशोमती | वणिक्पत्नी | ९१, ९३ |
| रत्नपुरी | नगरी | २०, ६० |

| विशेषनाम | किम् ? | पृष्ठांक |
|---|---|---|
| वर्धमान | तीर्थकरः | १ |
| वसन्तपुर | नगरम् | १, ४५, ४६, ६०, ८०, ८३, ९३ |
| विक्रमवर्मन् | राजा | ९१ |
| विज्जाहर | ,, | २० |
| विज्जाहरी | राजपुत्री, श्रेष्ठिनी, राज्ञी च | २०, २४–२६, २८, ४१, ६० |
| विमल | श्रेष्ठी | ३, २६ |
| विमलबुद्धि | राजपुत्रो राजा च | ९५ |
| विमलबोध | अमात्यः | ८६ |
| विमलमती | श्रेष्ठिपुत्री, श्रेष्ठिनी, राज्ञी, निर्ग्रन्थिनी च | ३, १८, १९, २४, २७, २८, १४, ४१, ६६, ८३, ९५ |

| विशेषनाम् | किम् ? | पृष्ठांकः |
|---|---|---|
| शत्रुञ्जय | पर्वतः | ८३ |
| शिवदेव | वणिक्पुत्रः | ९९–९३, ९५ |
| शिवधन | वणिक् | ९१ |
| श्रीमती | राजपुत्री, श्रेष्ठिनी, राज्ञी च | ९, ११, १३, १५, १६, १८, १९, २७, २८, ४१, ६०, ८३ |
| सम्मेत | पर्वतः | ८४ |
| संयमसिंहगणि | निर्ग्रन्थः (ग्रन्थकार-प्रशस्तौ) | ९५ |
| सिंहलद्वीप | द्वीपः | ९, ६० |
| सौभाग्यलता | राजपुत्री राज्ञी च | ६९ |
| हापा, हापाक | श्रेष्ठी | २८, २९, ३०, ३१, ३३ |


❋

# द्वितीयं परिशिष्टम्

## जिनदत्तकथानकान्तर्गतसंस्कृत-प्राकृत-अपभ्रंश-प्राचीनगुर्जरभाषानिबद्धसुभाषितानामनुक्रमः

### संस्कृतसुभाषितानि


| सुभाषितपद्यादिः | पृष्ठांक |
|---|---|
| अग्रे गीतं सरसकवयः | ४१ |
| अघटितघटितानि घटयति | २० |
| अजीर्णे भोजनत्यागी | ४ |
| अतिरूपेण वै सीता | ४९ |
| अनुचितकर्मारम्भः | ४७ |
| अवश्यम्भाविभावानां | ५९ |
| अशुभस्य कालहरणं | ३७ |
| असत्यमप्रत्ययमूलकारणं | ७० |
| असन्तोषवतः सौख्यं | ७१ |
| असम्भाव्यं न वक्तव्यं | ५५ |
| असारे संसारे कथमपि | ४ |
| असुरसुरपतीनां यो न | ६८ |
| अस्थिरेण शरीरेण | १० |
| अस्माभिः किं जघ्ने | ६४ |
| अस्मिन् जगति महत्यपि | ४५ |
| अस्मिन्नसारे संसारे | ५१ |
| अहो मोहपिशाचोऽयं | ११ |
| आचारः कुलमाख्याति | २१ |
| आज्ञाभङ्गो नरेन्द्राणां | ४५ |
| आढ्याः सन्ति भुवस्तले | ८२ |
| आयुर्यौवनवित्तेषु | ७३ |
| आरोग्यं सौभाग्यं | ८ |
| आस्तन्यपानाज्जननी पशूना- | ५ |
| आस्तां तावदियं प्रसूतिसमये | ४४ |
| आहारनिद्राभयमैथुनानि | ३७ |
| उदयति यदि भानुः | २१ |
| उद्यमः साहसं धैर्यं | १२ |
| उद्यमे नास्ति दारिद्र्यं | १२ |

| सुभाषितपद्यादिः | पृष्ठांक |
|---|---|
| उपाया बहवः प्राज्ञैः | ६६ |
| एकेनापि सुपुत्रेण | ६० |
| एकोऽपि यः सकलकार्यविधौ | ६० |
| एतत् करोमीति कृतप्रतिज्ञो | ४९ |
| ओमिति पण्डिताः कुर्युः | २६ |
| कदर्योपार्जिता लक्ष्मी- | ३१ |
| कनकभूषणसङ्ग्रहणोचितो | ३६ |
| कन्दे सुन्दरता दले सरलता | ६८ |
| कर्तुः स्वयं कारयितुः परेण | ७२ |
| कस्य स्यान्न स्खलितं | ९२ |
| काकाः कृष्णाः शुका नीला | ५० |
| कान्तावियोगः स्वजनापमानं | २४ |
| कालः सृजति भूतानि | ३७ |
| किमिह कपालकमण्डलु- | ४९ |
| किं चिन्तामणिकल्पद्रु- | ९० |
| किं तेन जातु जातेन | ५३ |
| कृशानुसेवा फलकन्दवर्तनं | ४९ |
| केनाञ्जितानि नयनानि मृगाङ्गनानां | ६४ |
| को विदेशः सविद्यानां | १४ |
| क्रमेण भूमिः सलिलेन भिद्यते | ५६ |
| क्रियैव फलदा पुंसां | ८७ |
| क्षणेन लभ्यते यामो | ३७, ५४ |
| गगनं विपुलं तुरङ्गमाः | ५९ |
| गन्तव्यं नगरशतं | ६० |
| गर्वं नोद्वहते न निन्दति परं | ३ |
| घटवत् परिपूर्णोऽपि | २ |
| चलति कुलाचलचक्रं | ६५ |
| चान्दनी चर्चना येन | ८१ |

चित्रं जगत्त्रयीनाथे ८१
जनमालिन्यदारिद्र्या ७
जनापवादं कुलशीललाञ्छनं १८
जिह्वाग्रे वर्तते लक्ष्मी- ५५
जिह्वादोषेण बध्यन्ते ५५
जीवन्तोऽपि विमुक्तास्ते ७१
जीवितव्यं यशः पुंसां ५१
जैनं मंदिरमादरेण कुरुते ८०
तगो न तप्तं वयमेव तप्ता ६८
तावद् भयस्य भेतव्यं ५१
तृणं ब्रह्मविदः स्वर्गः १०
तृणं लघु तृणात् तूलं ६९
तृष्यन्बु क्षुधि भोजनं १९
त्यक्त्वा जीर्णमिदं देहं ८५
त्यक्त्वा सङ्गमपारपर्वतगुहा ८५
त्यजेत् स्वामिनमत्युग्र- २
त्यजेदेकं कुलस्यार्थे ४८
त्रसरेणुसमोऽप्यत्र ७१
त्रिवर्गसंसाधनमन्तरेण ४
दग्धं दग्धं पुनरपि पुनः ६७
दधत तावदमी विषयाः सुखं ४०
दाता बलिर्याचयिता च विष्णु- ५९
दानं भोगो नाशः ३०
दाने तपसि मृत्यौ च ४
दुःखे दुःखाधिकं पश्येत् ४३
धनेऽपि सतिभोजनं २९
धनेषु जीवितव्येषु ४०
धन्यानां गिरिकन्दरे निवसतां ८५
धन्यैव सा जगति सज्जननी ६१
धर्माणां तेन दानेन ९४
धर्माद् धनं धनत एव ४१
धर्मोऽयं धनवल्लभेषु २३
धीरेण कातरेणापि ४९
न दशति मन्त्रज्ञमहि- ५३
नद्यो नीचतरा दुरापपयसः ६८
नपुंसकत्वं तिर्यक्त्वं १८
नमन्ति फलिता वृक्षा ६४
न स प्रकारः कोऽप्यस्ति ५९
निदाघे दावार्त- १८
निद्रा मूलमनर्थानां २५
निन्दन्तु नीतिनिपुणा ५०
पञ्चभिर्वर्णकैर्योऽर्ह- ८१
परपरिवादे मूकः २
परिग्रहमहत्वाद्धि ७१
परोपकाराय कृतघ्नमेत- ५१
परो रुष्यतु वा मा वा ५
पात्रे त्यागी गुणे रागी ४४
पितृभिस्ताडितः पुत्रः ५८
पित्रा स्वपुत्रा इव पालनीयाः ४७
पुष्पैरपि न योद्धव्यं ४६
प्रणिहन्ति क्षणार्द्धेन ८२
प्रत्यासीदति तस्य निर्वृतिपदं ८१
प्रथमे नार्जिता विद्या ३९
प्रभूतेनापि किं तेनो- ४४
प्रस्तावे भाषितं वाक्यं ९४
बहवो न विरोद्धव्याः ४७
भवन्ति भूरिभिर्भाग्यै- ७४
भस्मनापि तृणेनापि ४९
भाराय दिग्भूधरसिन्धुरास्ते ५२
मज्जत्वम्भसि यातु मेरु- ५९
मनसि वचसि काये ३
मनःशुद्धिमबिभ्राणा ८७
महताप्यर्थलाभेन ७१
माता यदि विषं दद्यात् ५१
मानमुल्लसति यत् पदे पदे १४
मितं ददाति हि पिता २२
मुहूर्तमपि जीवेत ६
यथैव पापस्य कुकर्मभाजां ८६
यदाशाया न विषयं १३
यद्भक्तेः फलमर्हदादिपदवी- ८२
यद्यपि कृतसुकृतभरः ८
यद्यपि रटति सरोषं ४६

यन्मनोरथशतैरगोचरं २१
यस्य त्रिवर्गशून्यस्य ४
यः सद् बाह्यमनित्यं च ८२
याता यान्ति महीभुजः ५०
यान्ति न्यायप्रवृत्तस्य ६३
यावच्चित्तं च वित्तं च ९०
यावन्न ग्रस्यते रोगै- ९०
यास्त्रिलोकेऽपि दृश्यन्ते ९०
ये तीर्थनाथागमपुस्तकानि ८१
ये बाह्ये लोचने ताभ्यां ८१
येषां न विद्या न तपो ९२
येषां मनांसि करुणारस- १२
यैस्त्यक्ता किल शाकिनी- ८५
योगे सति सुखं स्वल्पं १४

रणे वने शत्रुजलाग्निमध्ये २०
राज्यं यातु श्रियो यान्तु ३६
राज्ञि धर्मिणि धर्मिष्ठाः ८६

वनकुसुमं कृपणश्रीः ९२
वरं प्रवेष्टुं ज्वलितं हुताशनं १५
वरं प्राणपरित्यागो ६
वरं वृक्षोऽपि सिक्तोऽसौ ५३
वसेन्मासाधिकं स्थानं ६
विक्रमाक्रान्तविश्वोऽपि १६
विज्ञानं किमु नोर्णनाभ- ३७
विद्यया सह मर्तव्यं २३
विलम्बो नैव कर्तव्यः ७३
विषयगणः कापुरुषं ८९
वृक्षं क्षीणफलं त्यजन्ति २३
वैदेशकुट्यां पुरुषा द्रुमे छदा ७६
व्याघ्रो नैव गजो नैव ९

शरणागता भटानां ६६
शर्वरीदीपकश्चन्द्रः ६०
शोचनीयः स एवायं ८५
श्रावको बहुकर्मापि ८८
श्रियो नाशं यान्तु ६३
श्रीशांतिनाथादपरो न दानी ४८
श्वभ्रे शूलकुठारयन्त्रदहन- ७६
श्वःकार्यमद्य कुर्वीत ७३

सकृज्जल्पन्ति राजानः ६९
सज्जनस्य हृदयं नवनीतं १०
सतीत्वेन महत्त्वेन २
सन्तप्तायसि संस्थितस्य पयसो ३
स पुत्रो यः पितुर्मातु- ५३
समुद्राः स्थितिमुज्झन्ति ३६
सर्वत्राज्ञा भवति जगति ४६
सर्वविनाशाश्रयिणः ७१
सहसिद्धमिदं महतां ५२
संसारमूलमारम्भा- ७१
सामायिकव्रतस्थस्य ८८
सा सा सम्पद्यते बुद्धिः ५९ ५९
सिंहः करोति विक्रम- ४६
सुकुलजन्म विभूतिरनेकधा ३९
सुखस्यानन्तरं दुःखं ४३
सुखी न जानाति परस्य दुःखं १०
सुधामधुविधुज्योत्स्ना ८६
सृजति तावदशेषगुणालयं ८५
स्थानभ्रष्टा न शोभन्ते ७
स्थैर्यं सर्वेषु कार्येषु ९१
स्वयं वरयते कन्या १३
स्वाधीनं राज्यमुत्सृज्य ७१

हरति कुलकलङ्कं १६
हसन्नपि नृपो हन्ति ५४
हसा गतिं पिकयुवा किल २१


× ×

## प्राकृतभाषासुभाषितानि


| सुभाषितम् | पृष्ठांकः |
|---|---|
| अक्खाणऽसणी कम्माण | ११ |
| अगुणमवि गुणड्ढं | ५२ |
| अच्छंतु निरंतरगुरु- | १४ |
| अन्नन्नसुहसमागम | ७८ |
| अन्नं कुडुंबमेयं | ७६ |
| अपरिक्खिऊण कज्जं | ५७ |
| अलसंतेहिं वि हु सज्जणेहिं | ३६ |
| अवलंबिया तिणा न हु | ४८ |
| अंधत्तं बंभदत्तस्स | ४७ |
| आउज्जनट्टकुसला | ८८ |
| आरंभस्स निवारणं सुहमणो- | ८२ |
| आसन्ने रणरंगे | ३४ |
| इक्कं पि नत्थि लोयस्स | ६५ |
| इक्को कम्माइं समज्जिणेइ | ७५ |
| इय कम्मपासबद्धा | ७६ |
| उत्तमजणसंसग्गी | ३ |
| उवएसमंतरेण वि | ५ |
| एकस्स कए नियजीवियस्स | ५१ |
| एगदिवसं पि जीवो | ७९ |
| कह आयं ? कह चलियं ! | ७३ |
| कालेण अणंतेणं | ७५ |
| किं जंपिएण बहुणा | ४१ |
| को चित्तेइ मयूरे | ३५ |
| को जाणइ पुणरुत्तं | ७९ |
| गयसुकुमालस्स सीसम्मि | ४३ |
| गहियं जेहिं चरित्तं | ७९ |
| गिहासमसमो धम्मो | ८८ |
| छक्खंडवसुहसामी | ७५ |
| जइ हुज्ज मज्झ जम्मो | २४ |
| जह जह बंधइ नेहो | २६ |
| जं जस्स पुव्वलिहियं | २२ |
| जं जं दुलहं जं जं | २२ |
| जं जेण कयं कज्जं | १७ |
| जाणंतो वि य तरिउं | ८८ |
| जाणिज्ज मिच्छदिट्ठी | ८९ |
| जीयं कस्स न इट्ठं | १० |
| जीवघायरओ धम्म | ८९ |
| जे कोडिसिलं वामिक | ७१ |
| जे पूअंति कयत्था | ९४ |
| जो न कुणइ तुह आणं | ८१ |
| जो न हु दुक्खं पत्तो | ९ |
| तवनियमसुट्ठियाणं | ८५ |
| ताव च्चिय होइ सुहं | १५ |
| तित्थयरो चउनाणी | ८९ |
| तुल्ले वि उयरभरणे | ३८ |
| दाणोवभोगपरिवज्जिएण | ९४ |
| दिन्नं तस्स गणिज्जइ- | ९४ |
| दीसइ विविहऽच्छरियं | ७ |
| दु च्चिय हुंति गईओ | ४१ |
| दुपयं चउप्पयं वा | ९ |
| देविंदचक्किकेसव- | ९४ |
| धणसयणबलुम्मत्तो | ७५ |
| धम्मीणं जागरिया | ८६ |
| धित्तोसि गामनगराणं | ५६ |
| धिद्धी अलद्धपुव्वं | ८६ |
| नयणेहि को न दीसइ | १३ |
| निसाविरामे परिभावयामि | ७३ |
| निंबफलं किवणधणं | २८ |
| पत्ता य कामभोगा | ६८ |
| पत्तो वि य पाहुणए | ९३ |
| बहुसत्तिजुओ सुरकोडि- | ७१ |
| बालस्य मायमरणं | ६१ |
| भक्खणे देवदव्वस्स | १६ |
| भुत्ता दिव्वा भोगा | ४० |
| भुत्तूण चक्किरिद्धिं | ७६ |
| मा वहउ कोइ चिंतं | ५० |
| मा होह सुयग्गाही | ६३ |
| मियापुत्ताइजीवाणं | ९३ |

मुत्ताहलं न गिण्हइ २०
रज्जुग्गहविसभक्खण- १७
राईसरिसवमित्ताणि ६५
रागंधो मोहंधो १५
रूव पतिट्ठा माणं ६
रे विहि ! मा मा सज्जसि २५
रोगजरामच्चुमुहा- ५५
लोभो सव्वविणासी ३२
वावाराणं गुरुओ ८७
विज्जा अणुसरियव्वा २३
विज्जा वि होइ बलिया २३
विरला जाणंति गुणे १०
विहलं जो अवलंबइ ४८
विहिणो वसेण कज्जं १६
सणंकुमारपामुक्खा ४३
सयलतियलोयपहुणो ७५
सव्वो पुव्वकयाणं ४२
सहस च्चिय सम्ममचिंतिऊण ५७
संझब्भरागसुरचाव- ७४
सीलब्भट्ठाणं पुण १६
सुयणा न दिंति हिययं १४
सुवन्नरूप्पस्स य पव्वया भवे ७१
सुसीसा खंदरस्सावि ४३
सो को वि नत्थि सुयणो ४२


## अपभ्रंश-प्राचीनगूर्जरभाषासुभाषितानि


अन्न घिंतवीइ अन्न हुइ १६
अप्पु धूलिहिं मेलियं १५
अंबर पवणि न पूगीइ ३९
आयह लोयह लोयणइं ५५
आसातरुयर मउरिउ १७
काज परीछी जे करइ ५५
कां किज्जइ कृपणह तणइ २८
कां किज्जइ लहुडइ वडइ ३५
चिंता डाइणि जिहां वसइ ३७
जउ पूगी पंचास ३९
जाउ लच्छि धणकणसहिय ३८
जोउ जगविख्यात ४२
थी पीहर नरु सासरइ ७
थीयहं तिन्नि पियारडां ७
दहइ गोसीस सिरिखंड छारकए ४
देव आगलि न राय न राणउ १७
धणु संचइ केई कृपण ३१
धन राउलि जीविय जमह ३०
धम्म न संचिय तव न तवीय ४४
धम्मि न वेचइ रूयडउ २९
धर्मनरेसर भेटीइ ४६
पुण्यहीण घण दोण ८
पूनिम विण ससि खंडिउ थाइ २२
बग ऊडाडया बापडा ६७
भूमीतलि भमंतेहिं १९
माणु पइट्ठइ जइ न तणु ६
मायावंतह माणुसह १५
मिसि विण माथामांहि ५९
राम किं मत्थइ जड वहइ ४२
रे मन एक झबुक्कडउ ९०
वरि ते पंखीया भला २४
विहि विहडावइ विहि घडइ २०
सव्वह दुक्खह उल्लीचणुं ४२
सासू दिइं जमाइहं ७
साहुण सउण न चंदबल १२
हंसा जिहिं गय तिहिं गय ६४
हीयडा झूरि म झूरि २५
हीया मणोरह मा करउ १८

# शुद्धिपत्रकम्

| अशुद्धं | शुद्धपाठः | पत्रपङ्क्तौ | अशुद्धं | शुद्धपाठः | पत्रपङ्क्तौ |
|---|---|---|---|---|---|
| एक | 'एक | ३–२२ | ग्रत ° | ग्रुत ° | ५८–३ |
| ° कोटीमर्भो ° | ° कोटीर्भो ° | ३–२५ | ,, | ,, | ५८–४ |
| ° पराह्नने | ° पराह्णे ° | ५–२५ | ,, | ,, | ६०–१ |
| माणं | माणो | ६–१० | ,, | ,, | ६६–१८ |
| धम्मं | धम्मो | ,, | ,, | ,, | ६७–१ |
| ° कत्रम ° | ° कत्र म ° | ८–२१ | ,, | ,, | ५७–६ |
| ° ऽग्र ° | ° ऽग्रो ° | १०–१९ | ओदत्त ° | औदत्त ° | ६०–३ |
| छटति | छुटति | १७–४ | दीपका | दीपको | ६०–२६ |
| दशपु | दशपुरं | १८–१४ | त्रोक्यपि | त्रीण्यपि | ६१–२६ |
| पत्यौ | पतौ | १८–१७ | श्रेष्ठ ° | श्रेष्ठि ° | ६२–२४ |
| ° वाचाङ्ग ° | ° वाचाभङ्ग ° | २१–२० | कि | किं | ६४–२५ |
| पुरु | पुरुषं | २३–३ | ,, | ,, | ७४–२२ |
| ज्ञर ° | ज्ञूरं ° | २५–१८ | मा॰: | मोक्षः | ६४–२६ |
| ° ग्रुक्त्वा | ° ग्रुक्त्वा | २६–११ | सम्यक | सम्यक् | ६६–३ |
| ° नेव | ° नेन | २७–११ | दृष्ट्वा ° | दृष्ट्वो ° | ६६–२३ |
| ° मतीः | ° मती | ,, | यथा-'म° | 'यथा म° | ७२–५ |
| गृहीणि ° | गृहिणी ° | ३०–२ | °भाय | °भार्यं | ७४–७ |
| ° त्तिष्ट | ° त्तिष्ठ | ३०–९ | °राइणा | °राहुणा | ७५–१३ |
| कल्तित | कल्पितं | ३०–२३ | °क्करय° | °कक्करय° | ७५–१४ |
| श्रेष्ठि | श्रेष्ठी | ३१–१८ | अशरम् | अशरणम् | ७५–१८ |
| हार्पाक | ह्रापाकः | ३१–२० | बल च° | बल-च° | ७५–२२ |
| द्वाः स्थे ° | द्वाःस्थै ° | ३१–२१ | अंस | अंसं | ७६–४ |
| भ्रान्ता | भ्रान्ताः | ३२–१ | चक्रिय ° | चक्रय ° | ७६–२५ |
| वि : | विघ्नः | ३२–२६ | ° निकः | ° नि कः | ७६–२८ |
| ° श्रष्ठि ° | ° श्रेष्ठि ° | ३२–११ | ° वर्जि ° | ° वर्जि ° | ७७–२७ |
| ° मूषण ° | ° भूषण ° | ३२–१३ | श्रद्धा क ° | श्रद्धाक ° | ७८–१८ |
| क म ° | कर्तुम ° | ३४–२४ | ° गं राया | ° गं पत्था राया | ७८–२३ |
| ° ऽग्र | ° ऽग्रे | ३५–२ | ° जिनदेव श्रे ° | ° जीवदेवश्रे ° | ७९ शीर्षके |
| सुजात | सुजति | ३७–७ | जिव ° | जीव ° | ७९–१० |
| नार्जित | नार्जिता | ३९–१९ | अह | अर्हं | ७९–१७ |
| स्त्रीष | स्त्रीषु | ४०–२ | ° रि युता | ° रियुता | ७९–२० |
| ° भर्ता | ° भृतां | ४०–९ | ° राणुका ° | ° रानुका ° | ८०–६ |
| ° पाश्व | ° पार्श्वे | ४०–१९ | घन्याः | धन्याः | ८२–२६ |
| षट ° | षट्द ° | ४०–२४ | ° श्रष्ठि ° | ° श्रेष्ठि ° | ८४–२१ |
| ° ष्टक ° | ° ष्ट्रक ° | ४५–१४ | ° प्रमा ° | ° प्रेमा ° | ८५–२० |
| अङ्ग | अङ्गे | ४६–२८ | ° सोभ व ° | ° सो भव ° | ८६–७ |
| ब्रते | ब्रूते | ४७–१४ | ° हल्ला ° | ° हल्लो ° | ८६–१८ |
| राजान | राजानं | ४७–१९ | घिग घि | धिग् धिग् | ८६–२५ |
| श्रय ° | श्रय ° | ४८–२१ | ° त्ययो | ° त्ययोः | ८७ शीर्षके |
| ° पति ° | ° पती ° | ४९–११ | निर्मेल ° | निर्मल ° | ८७–४ |
| मत्त्ववं | मत्त्वैवं | ५०–५ | पूजाद्यः | पूजाद्यैः | ८८–२१ |
| ° मुल ° | ° मुल्ल ° | ५१–१५ | तिष्ठिति | तिष्ठति | ८९–१७ |
| धृत ° | घृत ° | ५२–४ | ग्रसते | ग्रस्यते | ९०–२० |
| ° ज्ञलि ° | ° ज्ञुलि ° | ५५–११ | ° त्नीनां | ° त्नीनां ° | ९५ शीर्षके |